Sl. No. 50116 मत्कुणयन्त्रोद्धारविधिः Ms. No. P. 1029–18

Beginning :

मत्कुणयन्त्रविधिः, ... वत्सरमासतिथिवारदलि यजमानस्य तस्य गृहे मत्कुणदोषपरिहारार्थं मत्कुणयन्त्रोद्धारणं करिष्ये । इन्द्र अग्नि यम नैर्ऋत्य वरुणवायव्य कुबेर ईशान्यादि अष्टदिक्षु पूर्वदिग्भागे मत्कुणं उच्चाटय मारय दक्षिणदिग्भागे ––

End :

गृहमत्कुण उच्चाटयोच्चाटय । मत्कुणयन्त्रोद्धारणदेवताभ्यो नमः । षोडशोपचारपूजां करिष्ये ॥

Colophon :

———

43

Sl.No. 50117 मदनगोपालकल्पः Ms. No. P. 3972-11

Beginning :

'सम्मोहनगोपालम्'

सनत्कुमारमासीनं सिद्धाश्रमनिवासिनम् ।
ब्रह्मनिष्ठमुनिं शान्तं प्रसन्नादित्यवर्चसम् ॥
विनयेनोपसङ्गम्य प्रणिपत्याभिवाद्य च ।
नारदः परिपप्रच्छ ब्रह्मज्ञो सर्वकालवित् ॥

End :

शुद्धस्फटिकसङ्काशं अथवा पुरुषोत्तमम् ।
ध्यायेन्नित्यं जपन्मन्त्रं मोक्षार्थी त्रिसहस्रकम् ।
संसारसागरं तीर्त्वा याति विष्णोः परं पदम् ।
बहुना किमुक्तेन धर्मकामार्थमोक्षदम् ॥

Colophon :

इति सनत्कुमारनारदसंवादे सनत्कुमारप्रोक्तो मदनगोपालकल्पं समाप्तम् ॥

44

Sl. No. 50118 मदनमातृकाकामरतिन्यासविधिः Ms. No. P. 5002-44

Beginning :

अथकामान् न्यसेद्देवि दाडिमीकुसुमप्रभान् ।
वामाङ्के शक्तिसहितान् पुष्पबाणेक्षुकार्मुकान् ॥
शक्तयः कुंकुमनिभाः सर्वाभरणभूषिताः ।
नीलोत्पलकरा ध्येया त्रैलोक्याकर्षणक्षमाः ॥

End :

क्लीं पं खेलाकान्त्यै नमः ।
क्लीं सं उन्मत्ताय कलकण्ठ्यै नमः ।
क्लीं हं मत्तकाय वृकावत्यै नमः ।
क्लीं ळं श्यामाय व्यामायै नमः ।
क्लीं क्षं विमलाय श्रियैः नमः ।

इति मातृका स्थानेषु क्षान्तं विन्यसेत् । अनेन न्यासयोगेन त्रैलोक्यक्षोभको भवेत् ।

Colophon :

हरिः ओं ॥

45

Sl. No. 50119 मदनमातृकाविधिः Ms. No. P. 5002-37

Beginning :

अस्य श्री मदनमातृका मन्त्रस्य संमोहन ऋषिः । गायत्री छन्दः । सकलमनोरञ्जनी मातृका सरस्वती देवता । हलो बीजानि स्वराः शक्तयः । बिन्दवः कीलकम् । मदनमातृकासरस्वतीप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

End :

बालार्ककोटिरुचिरां स्फटिकाक्षमालां
कोदण्डमिक्षुरचितं स्थिरपञ्चबाणाम् ।
विद्यां च हस्तकमलैर्दधतीं त्रिनेत्रां
ध्यायेत् समस्तजननीं नवमन्त्रमूलाम् ॥

ओं क्लीं अं नमः, ओं क्लीं आं नमः । .... क्षान्तं विन्यसेत् ॥

Colophon :

॥ श्रीः ॥

46

Sl.No. 50121 | **मदनमोहनमन्त्रः** | Ms.No. P. 5657–43

Beginning :

ಓಂ ನಮೋ ಭಗವತಿ ಮದನಮೋಹನಮಹಾಮಾಯೆ ಪಂಚಭೂತಮೋಹಿನೀ ಚತು-ರ್ವಿಧಜೀವರ ಮೋಹಿಸು ಮೋಹಿಸು ।

End :

ಬ್ರಹ್ಮಾವಿಷ್ಣುಮಹೇಶ್ವರರಾಣೆ । ಶ್ರೀಕಾಮದೂತರಾಣೆ । ಕ್ಲಿಂ ಮೋಹಿಸು ಮೋಹಿಸು । ನಿನಗೆ ನಿನ್ನಾಣೆ ! ಮೋಹಿಸು ಗುರುಪ್ರಸಾದಮ್ ॥

Colophon :

———

47

Sl. No. 50125 | **मध्यमान्यासविधिः** | Ms. No. P. 5002–65

Beginning :

अथ मध्यमा न्यासः —

ऐं ह्रीं श्रीं अकथात्मने सविकृतनाथाय नमः । आकथात्मने शून्यनाथाय नमः । बिन्दुद्वयात्मने स्पर्षनाथाय नमः । षङ्कोणरे खात्मने नाथनाथाय नमः । अर्ध-चन्द्रात्मने ध्वनिनाथाय नमः ॥

End :

हंसरूपात्मने अक्षरनाथाय नमः । इति ब्रह्मरन्ध्रे ललाटे भ्रूमध्ये आस्ये कण्ठे हृदये नाभौ स्वाधिष्ठाने आधारे यथाक्रमं विन्यसेत् ॥

Colophon :

॥ हरिः ओम् ॥

48

Sl. No. 50126 मध्याह्नवाराहीविधानम् Ms. No. P. 4461–17

Beginning :

अस्य श्री मध्याह्नवाराहीमन्त्रस्य विश्वामित्रर्षिः गायत्री छन्दः । मध्याह्नवाराही देवता । ह्नां बीजम् । स्वाहा शक्तिः । हुं कीलकम् । मम वाराहीप्रसादसिध्यर्थे जपे विनियोगः ।

End :

ततस्तु तिलकीभूतः स पत्नो भवति ध्रुवम् ।
सपत्नवेषं सङ्कल्प्य मृदा वा लोहकेन वा ॥
संस्थाप्य याम्यकुण्डे तं हुनेत्पादरजः कणैः ।
अयुतं सञ्जयेन्मूलं त्रिसप्तक्षणदां बुधः ॥
तन्मां सरक्तमेदोऽस्थि मज्जा शुक्राणि वैरिणः ।
योगिन्यो भक्षयन्त्याशु पञ्चमी पादसेविनः ॥

Colophon :

———

49

Sl. No. 50127 मनुचिद्बोधचन्द्रिका Ms. No. P. 3949

Beginning :

\+ + + + +
\+ + + + +

मनक्षित्रीक्षितशचिकान्तादि बृन्दारकम् ।
अध्यारुह्यसमाधिपीठमखिलानागन्तुकान् पातयन्
विद्यारण्ययतीश्वरो विजयते श्रीमत्तपोवर्षणा ॥ २ ॥

\+ + + + +

End :

इत्थम् — नवरात्रिस्कन्धमभिधाय नवरात्रिस्कन्धपूर्तिप्रतिपादकशिखरिणीवृत्तमभि-
धातुमारभते—तदीक्षान्मीनाक्षीत्रिणयनसमैक्यार्थ + + + +

Colophon :

+ तायामाधारमनुराट् कलास्तुतिसंकेतत्रयगूढार्थदीपिकायां वाञ्छाकल्पलतायां

+ + + + +

50

Sl. No. 50131 मन्त्रकाण्डम् Ms. No. P. 5840-1

Beginning :

यो नित्याकुलकालशोभितवपु × × दित जृम्भते ।
पूर्णाभान्मितशक्तिदापरिपरामन्त्रात्मिका सिद्धिदा ॥
मालापुस्तकधारिणी × × × ।
नित्यनन्दकुले प्रकाशजननी वागीश्वरी पातु वः ॥

+ + + +

तन्त्रसारं समुद्धृत्य दध्नो घृतमिवादरात् ।
साधकानां हितार्थाथ मन्त्रकाणमिहोच्यते ॥

End :

पुष्यभास्करयोगेन तिलोक्षेन तु वेष्टितैः ।
मूर्ध्निस्थं केचरत्वं स्याद्योजनानां शतावधि ॥
एते सर्वे महायोगाः चण्डामात्रेण सिद्धिदाः ।

Colophon :

इति श्री पार्वतीपुत्रनित्यनाथविरचिते रसरत्नाकरे मन्त्रकाण्डे कक्षपुटी नाम विंशतितमोपदेशः ॥

51

Sl. No. 50133 मन्त्रग्रहणकालाकालनिर्णयः Ms. No. P. 10053-54

Beginning :

मासनियमः —

असिद्धिर्भूमिसम्पत्तिर्मरणं बन्धुनाशनम् ।
शुभप्राप्तिः स्थाननाशं सम्पत्तीरन्नसम्पदः ॥

ज्ञानप्राप्तिर्ज्ञाननाशोथमोहार्थो वशीकृतिः ।
एवं चैत्रादि मासानां फलान्याहुर्मनीषिणः ॥

× × × +

End :

अथोपदेशार्थं तिथिवारनक्षत्रादि नियमो लिख्यते —

अश्विनीरोहिणी चार्द्रा तथा पुष्योत्तरत्रयम् ।
हस्तचित्तास्वाती मैत्रं विशाखा च धनिष्टा च प्रशस्तं मन्त्रसंग्रहे ।
मैत्रं = अनूराधा पुनर्वसुरेवती पूर्णिमापञ्चमी चैवद्विती(या)सप्तमी तथा ।
त्रयोदशी दशमी प्रशस्ता मन्त्रसंग्रहे ।
तृतीया पिहिता नित्यं षष्ठी सर्वत्र गर्हिता ॥

Colophon : ———

52

Sl. No. 50136 मन्त्रग्रहणनिर्णयः Ms. No. P. 4925-27

Beginning :

अथ सर्वमन्त्राणां ग्रहणे गुरोरसम्भवे कल्पांतरोक्तप्रकारेण उपायविशेषो लिख्यते ।

गुरोरभावे मन्त्राणां ग्रहणक्रम उच्यते ।
कृष्णे पक्षे त्रयोदश्यां दक्षिणामूर्तिसन्निधौ ॥
लिखित्वा राजते पत्रे तालपत्रेऽथवा पुनः ।
मन्त्रं तु स्थण्डिलेस्थाप्य पूजयित्वा महेश्वरम् ॥

End :

तालपत्रे लिखित्वा मन्त्रं तत्र निधाय वै ।
आवाह्य भास्करं तत्र यथाविधि सुपूजयेत् ॥
तत्सन्निधावष्टशतं पठेद्देशिकतो यथा ।
एवं गृह्णीत मतिमान् पूर्वोऽयं विधिः स्मृतः ॥

Colophon :

———

53

Sl. No. 50142 मन्त्रजपक्रमविधिः **Ms. No. P. 4925-44**

Beginning :

कनिष्ठानामिकाङ्गुष्ठमध्यमाभिर्जपेत्सदा ।

कनिष्ठेति अनाममध्यमूल कनिष्ठामूल मध्याग्रानामाग्रमध्यमाग्रामध्यमूलपर्यन्त-
मिति नवसु पर्वसु गणनायां नववारं जपो भवति । + + +

End :

अथवा मध्यमामध्यमूलपर्वद्वयं प्रिये ।
मेरुं कृत्वा जपेद्देवि तर्जनीमूलकाविधिः ॥
अनामामध्यपर्वादि प्रादक्षिण्य क्रमेण वै ॥
अङ्गुलीजपोरेखा जपः । पर्वजपश्च कनिष्ठाद्यङ्गुलिगतरेखाभिर्जपो रेखाजपः ।

भैरवीतन्त्रे —

करमालामध्यमारभ्य कनिष्ठानुक्रमेण तु ।
मध्यमामूलपर्यन्ता करमालाप्रकीर्तिता ॥

Colophon :

———

54

Sl. No. 50147 मन्त्रजपक्रमविधिः Ms. No. P. 4335–62

Beginning :

दुर्गाजपं करिष्ये । अस्य श्रीजातवेदस इत्यस्य मन्त्रस्य । काश्यपऋषिः । दुर्गा देवता । त्रिष्टुप् छन्दः । क्लीं बीजम् । ह्रीं शक्तिः । श्रीं कीलकम् । दुर्गा प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

तमीशानमित्यस्य मन्त्रस्य । गौतम ऋषिः । ईशानो देवता । जगती छन्दः । क्लीं बीजम् । ह्रीं शक्तिः । श्री सौः कीलकं + × + लमीति पञ्चपूजा । यथशक्तिजपः ॥

Colophon :

———

55

Sl. No. 50148 मन्त्रजपस्थाननिर्णयः Ms. No. P. 4525–26

Beginning :

स्थाननियमः ।

समुद्रतीरेऽप्यथवाद्रिशृङ्गे
समुद्रगानां सरितां च पारे ।

जपेद्विविक्ते निज एव गेहे
विष्णोर्गृहे वा पुरुषो मनस्वी ॥

End :

सर्वदा गे नदीतीरे बिल्वमूले शिवालये ।
अग्निहोत्रे केशवस्य सन्निधौ च जपेत्तु यः ॥
नैवास्य विघ्नं कुर्वन्ति दानवा यक्षराक्षसाः ।
तन्न स्पृशन्ति पापानि शिवसायुज्यमृच्छति ॥

Colophon :

॥ श्रीः ॥

56

Sl. No. 50151 मन्त्रज्योतिषम् Ms. No. C. 779-6

Beginning :

अथ मन्त्रज्योतिषम् —

असिद्धिः भूमिसम्पत्तिः मरणं बन्धुनाशनम् ।
शुभप्राप्तिस्थाननाशः सम्पदो ह्यर्थसम्पदः ॥
ज्ञानप्राप्तिः ज्ञाननाशो ह्यमोवोऽथवशीकृतिः ।
एवं चैत्रादिमासानां फलान्याहुर्मनीषिणः ॥

End :

कन्यायां सिद्धिदो × ष्के निस्फलो वृश्चिकोऽर्थदः ।
मकरे पुत्रदकुम्भे महद्धनविवृद्धिदः ॥
मानेदुःखप्रदं नित्यं एवं राशिफलं शिवे ॥

Colophon :

इति मन्त्रज्योतिपम् ॥

57

Sl. No. 50152 मन्त्रदशसंस्कारविधिः Ms. No. P. 4925-18

Beginning :

मन्त्राणां दश कथ्यन्ते संस्काराः सिद्धिदायिनः ।
जननं जीवनं पश्चात्ताडनं बोधनं तथा ॥
अथाभिषेको विमलीकरणाप्यायने ततः ।
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ॥

End :

ताम्रपट्टे मन्त्रं विलिख्य मन्त्रान्ते अमुकं
मन्त्रं तर्पयामि नमः इति तर्पयेत् ।
तारमायारमायोगो मनोर्दीपनमुच्यते ॥
जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम् ।
संस्कारा दशसम्प्रोक्ता सर्वमन्त्रेषु गोपिताः ।

Colophon :

———

58

Sl. No. 50154 मन्त्रदीक्षाविधिः Ms.No. P. 8714-44

Beginning :

श्री देव्युवाच —
देवेश श्रोतुमिच्छामि देवेश शुभलक्षण ।
उपदेशक्रमश्चैव दीक्षाभेदं च मे वद ॥
ईश्वरः —
दीक्षाविधिं प्रवक्ष्यामि यो शिष्यः सुमनोहरः ।
दीयते सकलं देवि गुरवे प्राणसंयुतम् ॥

End :

पूर्णदीक्षाक्रमो देवि यस्य कस्यापि नोच्यताम् ।
द्वादशाब्दं क्रमं तस्य परीक्ष्य विधिमुच्चरेत् ॥
पूर्णदीक्षाविधिं सम्यग्ज्ञात्वा किञ्चित्प्रकाशितः ।
समासेन वरारोहे किं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्रीपरमानन्दतन्त्रे द्वितीयोपदेशे मन्त्रखण्डे पूर्णदीक्षाविधिर्नाम षोडशोद्रेकः ।

59

Sl. No. 50155 मन्त्रदीपप्रकाशिका Ms. No. P. 5133-2

Beginning :

यन्त्रप्राकारः —

क्रमेण यन्त्रं मन्त्राणि शृणु वक्ष्ये महामुने ।
ओं ह्रीं श्रींतु तथाक्ष्मीं च ह्सौ बहि सचह्रीं तथा ।
अग्निमण्डलबीजानि भवेदेकाक्षराणि वै ॥
सहस्रारेपि चोक्ताथ हुंफडन्तं समुच्चरेत् ॥

End :

त्रिखण्डमुद्रालक्षणम् —

हस्तद्वयाङ्गुलियोनिमुद्रावदबद्धाकरतलद्वयस्य पृष्ठभागे कनिष्ठिका द्वयमधः कृत्वा अन्योन्यमूलाग्रं सम्पेषयेत् । एषा त्रिखण्डनाम मुद्रा ॥

Colophon :

इति मन्त्रदीपप्रकाशिकायां मुद्राप्रकरणं समाप्तम् ।

60

Sl. No. 50156 मन्त्रदेवताप्रकाशः Ms. No. C. 3052

Beginning :

ओङ्कारात्माक्षर × × भुवनथशिवचिद्दक्षिणामूर्तिचिन्ता × × × × ति
हरणमहागाणपत्यादिरूपिन् ।
अष्टार्णद्वादशार्णप्रियनृहरितनो श्रीवराहात्प्रचक्रिन् ।
कृ × × त्मन् राम विष्णो विविधमहाशक्तिभास्वन्नमस्ते ॥ १ ॥

\+ + + + +

\+ + + अथ प्रपञ्चसारादि मन्त्रशास्त्रानुसारतः ।
गुरूपदिष्टमन्त्राणां देवतादि प्रकाश्यते ॥ ७ ॥
मननन्त्राणधर्माणो सप्तार्थभाजो वा मन्त्राः । तदुक्तम् ।

End :

श्रीमत्पञ्चसारादिशास्त्रसंग्रहविग्रहा ।
कृतिर्विजयते सैषा मन्त्रदेवप्रकाशिका ॥
परमाराध्यपौत्रस्य लक्ष्मीध × × सूरिजन्मनः ।
कृतिश्श्रीविष्णुदेवस्य श्रीमत्कोटीश्वरेऽर्पिता ॥

Colophon :

इति श्रीमन्त्रदेवताप्रकाशिकायां देवत्वप्रतिपादको द्वाविंशः पटलः ।
समाप्तोऽयं मन्त्रदेवप्रवरः ।

61

Sl. No. 50159 मन्त्रदेवताप्रकाशः Ms. No. A. 570

Beginning :

ओङ्कारात्माक्षरादिः भुवनत्रशिवचिद्दक्षिणामूर्तिचिन्ता रत्नं
× घ्नविहरणमहागाणपत्यादि रूपिन् ।

अष्टार्णद्वादशार्णप्रियनृहरितनो श्रीवराहाख्यचक्रिन्
कृष्णात्मन् राम विष्णो विविधगुणमहाशक्तिभास्वन् नमस्ते ॥

अथप्रपञ्चसारादिमन्त्रशास्त्रानुसारतः ।
गुरूपदिष्टमन्त्राणां देवतादिप्रकाश्यते ॥

End :

आख्यां मध्ये सतारेम × युक्तविंशत्पुटेषु
प्राक्षु × रिकमनुव × दशावृत्तिमन्त्री ।
विंशद्वन्द्वाष्टशूला कलितविरचितं यन्त्रमेतत् सजप्तं
बन्धाक्ष्वेलग्रहार्तिं हरति विजयलक्ष्मीप्रदं कीर्तिदं च ॥

Colophon :

इति मन्त्रदेवताप्रकाशिकायां एकोनत्रिंशत्पटलः ।

62

Sl. No. 50164 मन्त्रनिर्माणविधिः Ms. No. C. 2111-4

Beginning :

नित्यातन्त्रे —

अथ मन्त्रनिर्माणविधानमभिधीयते ।
मन्त्रवीर्यं सुसिद्धानां इतरेषां विनाशकृत् ॥
मन्त्र एकक्षराः पिण्डाः कर्तव्यो द्व्यक्षराः स्मृताः ।
वर्णत्रयं समारभ्य नवार्णावधिबीजकाः ॥

End :

अन्यास्तु तत्र तत्रैव द्रष्टव्या यत्र चोदिताः ।
एषां पञ्चप्रकाराणां अर्थाः तादृग्विधा मताः ॥

सम्यक्त्वमेषां केन स्यात् सर्वेषांमप्ययत्नतः ।
असम्यक्त्वं च केनस्यात् तत्सम्यक्करणं कथम् ॥

Colophon :

॥ श्रीः ॥

63

Sl. No. 50165 मन्त्रन्यासविधिः Ms. No. P. 5002–59

Beginning :

अथ मन्त्रन्यासमाह —

ओं ऐं ह्रें स्वाहा अं आं इं एकलक्षकोटि भेदप्रणवाद्येकाक्षरात्माखिलमन्त्राधिदेवतायै सकलफलप्रदायै एककूटैश्वर्याम्बादेवतायै नमः मूलाधारे । ओं ईं उं ऊं द्विलक्षकोटिभेदहंसाद्यक्षरात्माखिलमन्त्राधिदेवतायै —

End :

षोडशाक्षरात्माखिलमन्त्राधिदेवतायै सकलफलप्रदायै षोडशमाहेश्वराद्यम्बायै देव्यै नमः । ब्रह्मरन्ध्रे । ओं अकारादिक्षकारान्तं समस्तमातृकामुच्चार्य सर्वमन्त्रात्मिकायै श्रीपराम्बादेव्यै नम इति व्यापकं विन्यसेत् ॥

Colophon :

इति मन्त्रन्यासः शिवम् ॥

64

Sl.No. 50179 मन्त्रप्राणप्रतिष्ठामन्त्रः Ms. No. P. 10739–17

Beginning :

सकलवाद मन्त्रगळिगे प्राणप्रतिष्ठे मन्त्र ॥
ओं प्रणमं शिवं ईश्वरः । यथास्थानं निवेश्य ॥

ओं प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुस्सामथर्वणवेदांसि सफलं जगत् । इन्द्रियाणि ॥

End :

देतदत्तस्य अघनं रक्ष स्वाहा । ओं हाः पारूश्वनाथाय देवदत्तस्य उदरं रक्ष स्वाहा । ओं ह्रीं पारूष्यनाथाय देवदत्तस्य शिरसंरक्ष स्वाहा ॥ असुनीते ॥

Colophon :

65

Sl. No. 50180 मन्त्रमहोदधिः Ms. No. P. 5839

Beginning :

प्रणम्य लक्ष्मीनृहरिं महागणपतिं गुरूम् ।
तन्त्राण्यनेकान्यालोक्य वक्ष्ये मन्त्रमहोदधिम् ॥
प्रातरुत्थाय शिरसि ध्यात्वा गुरुपदाम्बुजम् ।
आवश्यकं विनिर्वर्त्य स्नातुं यायात् सरित्तटम् ॥

End :

विश्वेशो गिरिजाबिन्दुमाधवो मणिकर्णिका ।
भैरवो जाह्नवी दण्डपाणिर्मे तन्वतां शिवम् ॥
अब्दे विक्रमतो याते बाणवेदनृपैर्मिते ।
ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः ॥

Colophon :

इति श्रीमन्त्रमहोधौ षट्कर्मनिरूपणं नाम पञ्चविंशत्तरङ्गः ।

66

Sl. No. 50182 मन्त्रमहोदधिः Ms. No. C. 4017-1

Beginning :

महालक्ष्मीं दक्षभागे वामभागे सरस्वतीम् ।
पुनर्दक्षे यजेद्विघ्नं गङ्गां च यमुनामपि ॥ ५ ॥
पुनर्वामे क्षेत्रपालं स्वः सिन्धुयमुने अपि
पुनर्दक्षे तु धातारं विधातारं तु वामतः ॥ ६ ॥

End :

विश्वेशो गिरिजा बिन्दुमाधवो मणिकर्णिका ।
भैरवो जाह्नवीदण्डपाणिर्मे तन्वतां शिवम् ॥ १३१ ॥
विक्रमार्कात् गते वर्षे बाणवेदनृपैर्मिते ।
ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः ॥ १३२ ॥

Colophon :

इति श्रीमन्महीधरकृते मन्त्रमहोदधौ षट्कर्मादिनिरूपणं नाम पञ्चविंशत्तरङ्ग ॥२५॥

67

Sl. No. 50186 मन्त्रमहोदधिव्याख्या Ms. No. C. 4017-2
(नौकासमाख्या)

Beginning :

शङ्खपद्मौ निधी तद्वत् दक्षवामयोः द्वारपालांस्तत्तद्देवतानां वक्ष्यमाणत्वात् ॥ ७-८ ॥ द्वात्रिंशद्वारं प्रणवं जपन् प्राणं पूरयेत् चतुः षष्टिवारं जपन् कुम्भयेत् । षोधशवारं जपन् रेचयेदित्यर्थः ॥ ९-१० ॥

End :

ग्रन्थनिष्पत्तिकालमाह विक्रमार्कादिति । बाणवेदनृपैर्मिते वर्षे पञ्चचत्वरिंश-दुत्तरषोडशतमे विक्रमनृपात् गते सति शिवरामेश्वरस्याग्रे मन्त्रमहोदधिः समाप्ति-मगात् ॥ १३२ ॥ +

श्रीमद्वत्सकुलोद्भवो महिधरः श्रीतीर्थराजो व्याधात
स्वीये मन्त्रमहोदधौ गुणयुतां नावं विदां तुष्टये ॥ १ ॥
लक्ष्मीनृसिंहो मणिकर्णिकार्कः काशीशं दुर्गा ददतां शिवं मे ॥ २ ॥

Colophon :

इति श्रीमन्मसीधरविरचितायां मन्त्रमहोदधिटीकायां नौकासमाख्यायां षट्-कर्मादिनिरूपणं नाम पञ्चविंशस्तरङ्गः ॥

68

Sl. No. 50192 मन्त्ररहस्यम् Ms. No. P. 4461–90

Beginning :

अथ वक्ष्ये + + + मन्त्राणामुपदेशके ।
कालस्तु बोध्यते पूर्वं सर्वानुग्रहसाधकैः ॥
असिद्धिश्चैत्रमासे स्याद्वैशाखे भुवि संददः ।
ज्येष्ठे भरणमुद्दिष्टमाषाढे बन्धुनाशनम् ॥
आयुष्यं हि श्रावणे स्यात्प्रजा नाशो नभस्यके ।
सम्पादाश्वयुजे मासि कार्तिके रत्नसम्पदः ॥

\+ + + +

End :

सर्वसौभाग्यजनकं मृतानाममृतपदम् ।
आदौ मन्त्रं ततो नाम पुनर्मन्त्रं समालिखेत् ॥

एवमेवं त्रिधा कृत्वा भवेद्भुक्तिविवर्जितम् ।
सर्वव्याधिहरं प्रोक्तं भूतापस्मारमर्दनम् ॥
एकैकं साध्यवर्णं तु कृत्वा मन्त्रविवर्जितम् ।
पूर्ववत्कथितं चान्यं तस्याद्यन्ते प्रकल्पयेत् ॥
विदर्भगथितं नाम मन्त्रलक्षणमुत्तमम् ।
सर्वकर्मकरं प्रोक्तं सर्वैश्वर्यफलप्रलप्रदम् ॥
एवमेते प्रयोगाः स्युः सर्वमन्त्रस्य सिद्धिदाः ॥

Colophon :

इति श्रीनारायणमुनिविरचिते मन्त्ररहस्ये प्रथमोऽध्यायः ।

69

Sl. No. 50194 — मन्त्ररहस्यम् — Ms. No. P. 1908-3

Beginning :

आदौ वृत्तं समालिख्य तत्राधिष्ठानमालिखेत् ।
साध्यनामं च तत्रैव बहिष्षट्कोणमालिखेत् ॥ १ ॥
षट्कोणेषु षड्वर्णानि सुदर्शनमनोर्लिखेत् ।
श्रीचक्राद्यङ्कषट्कानि तत्सन्धौ विलेखेत्क्रमात् ॥ २ ॥

End :

पौष्पं यश्शुक्रवारे तु सौमङ्गल्यै प्रयच्छति ।
श्रियं सौभाग्यमायुश्च स विन्दति न संशयः ॥

Colophon :

इति परपहंसपरिव्राजकाचार्यस्य षष्टिप्रबन्धनिर्मातुर्नारायणमुनेः कृतिषु मन्त्ररहस्ये अष्टाविंशोऽध्यायः ।

70

Sl.No. 50196 मन्त्ररहस्यम् Ms.No. P. 792-1

Beginning :

प्रणम्य देशिकान् सर्वान् वेदान्तार्थविशारदान् ।
सौदर्शनादि मन्त्राणां संग्रहः क्रियतेऽधुना ॥
सुदर्शनस्य + + +
+ + + + +
+ + महात्म्यं पञ्चरात्रैः प्रपञ्चितम् ॥

End :

विष्णोर्निवेदितात् किञ्चित् बिश्वक्सेनाय दापयेत् ।
अवशिष्टं तु भक्तेभ्यः दत्त्वा भुञ्जीत च स्वयम् ॥

Colophon :

इति मन्त्ररहस्ये त्रयोदशोऽध्यायः ।

71

Sl. No. 50206 मन्त्ररामायणव्याख्या Ms. No. C. 814-2

Beginning :

नारायणद्रुमं नौमि रामरक्षानवङ्कुरम् ।
गायत्रीबीजमाम्नायमूलं मोक्षमहाफलम् ॥
अत्र रामरक्षायां रामायणद्रुमाङ्कुरत्वं स्पष्टमवगम्यते ।

End :

नावा न नौकया यथा .... महाकारुणिको रामभद्र एव शरणीकरणीय इति दर्शितम् ॥

लक्ष्मणार्यपरतां .... प्रमोदताम् ।
श्रीरामरक्षाव्याख्यानं मन्त्ररामायणाभिधम् ।
व्याख्यातं राघवङ्केन प्रीयतां करुणानिधिः ॥
दर्शिता(तः)सीतया ध्यायं (?) वेदारण्ये निरध्वनि ।
सत्तोविपुलयन्त्वेनं यास्कभाष्यानुयायिनः ॥

Colophon :

इति श्रीमत्पदवाक्प्रमाणज्ञमर्यादाधुरन्धरचतुर्धरवंशावतंसगोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतौ स्वोद्धृतमन्त्ररामायणव्याख्या मन्त्ररहस्यप्रकाशिकाख्या समाप्तिमगमत् ॥

72

Sl. No. 50211 मन्त्रविभागजपविधिः Ms. No. P. 4925–17

Beginning :

मन्त्रविद्याविभागेन द्विविधा मन्त्रजातयः ।
मन्त्राः पुंदेवतामन्त्राः विद्याः स्त्रीदेवताः स्मृताः ॥
पुंस्त्रीनपुंसकात्मानो मन्त्रः सर्वे समीरिताः ।
पुम्मन्त्रा हुं फडन्ताः स्युः .... न्तास्तुस्त्रियो मताः ॥

End :

अतिवृद्धाः प्रयोगेषु परित्यज्याः सदाबुधैः ।
सहस्रार्णाधिकामन्त्रा दण्डकामपीडिताह्वयाः ।
द्विसहस्राक्षरमन्त्राः खण्डशश्शतधा कृताः ॥
ज्ञातव्याःस्तोत्रसूयूपास्ते मन्त्रा एते यथा स्थिताः ।
तथा विद्याश्चबोद्धव्याः मन्त्रिभिः काण्डकर्मसु ।
दोषानिमानविज्ञाय यो मन्त्रान् जपेत जडः ।
सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥

Colophon :

———

73

Sl. No. 50213 मन्त्रशुद्धिसंस्कारः Ms. No. C. 2512-4-C

Beginning :

अथ शुद्धिसंस्कारः —

तद्दक्षिणभागे स्थलशुद्धिं कृत्वा गायत्र्याप्रोक्ष्य । ओं ईं सौः । इति पशुत्व-विमोचनं दक्षिणकर्णे उपदिश्य । ओं जों सः । इत्यमृतसञ्जीविन्या सन्दीप्य × × क्त आप्यायतां प्राणस्त आप्यायतां चक्षुस्त आप्यायताँ श्रोत्रं

× × × ×

End :

नेत्रमन्त्रेण संवीक्ष्य अस्त्रमन्त्रेण ताडयेत् । मूलेनाभिमन्त्रणं गरुडधेनु योनि-मुद्राः प्रदर्श्य ।

Colophon :

इति शुद्धिसंस्कारः ।

74

Sl. No. 50215 मन्त्रसंस्कारविधिः Ms. No. P. 8714-35

Beginning :

भूर्जपत्रे लिखेत्सम्यक्त्रिकोणं रोचनादिभिः ।
दारुणं कोणमारभ्य सप्तधा विभजेत्समम् ॥ +
ततः समुद्धरेन्मन्त्रं जननं समुदीरितम् ।
जपो हंसपुटस्यास्य दीपनं समुदीपितम् ॥ +

सहस्रं तं जपेदस्त्रपुटितं ताडनं तु तत् ।
वाग्घंसतारैर्जप्तेन सहस्रं पा साधसा मनुम् ॥

End :

तैरेव बीजैरभिषिञ्चेत् । इत्यभिषेकः । ओं क्रौं वषट् । इति पुटितं सहस्रं जपेत् । इति विमलीकरणम् । स्वधा वषट्पुटं सहस्रं जपेत् । इति जीवनम् । क्षीराज्योदकैस्तर्पयेदिति तर्पणम् । ह्रीं इति पुटितं सहस्रं जपेत् । इति गोपनम् । हसाः इति पुटितं सहस्रं जपेत् । इत्याप्यायनम् ।

Colophon :

इति दशविधसंस्काराः ।

75

Sl. No. 50219 मन्त्रसंहिता Ms. No. C. 2569–1

Beginning :

गुणानांत्वा गृत्समदो गणपतिर्जगती । गणानां त्वागणपति हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पतं आनः शृण्वन्नूतिभिस्सीद-सादनम् । निषुसीद गणपते .... चित्रमर्च ।

End :

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्कृतं तु मया देव परिपूर्णं तदस्तु मे ॥

पितुः प्रतिसांवत्सरिक श्राद्धे अग्नौ करणब्राह्मणभोजनपिण्डप्रदानकर्मत्रयात्मके यज्ञरूपी परमेश्वरः प्रीयताम् ॥ सर्वेऽप्याचमनं कुर्युः ॥

Colophon :

॥ हरिः ओम् ॥

76

Sl. No. 50222 मन्त्रसन्ध्याविधिः Ms. No. P. 1019-12

Beginning :

आचम्य प्राणानायम्य, तीर्थ + + सङ्कीर्त्य एवं गुण—तिथौ ललिताम्बाप्रीत्यर्थं मन्त्रसन्ध्यां करिष्ये । नद्यादि चले वा पात्रस्थजले वा चतुरश्रं मण्डलं कृत्वा । तत्र ब्रह्माण्डोदरतीर्थानि करैः स्पृष्ट्वा ।

End :

.... इति मन्त्रेण त्रिरर्घ्यं दत्वा, एवं त्रिवारं सूर्यतर्पणं कृत्वा, मूलेन त्रिसन्तर्प्य, आचम्य, ऋषिविन्यासपूर्वकं मूलमष्टोत्तशतं + + राना + र्त्वा जपं श्रीदेव्यै समर्पयेत् ॥

Colophon :

इति सन्ध्याविधिः ।

77

Sl. No. 50225 मन्त्रस्वीकारविधिः Ms. No. P. 5614-7

(कालप्रकाशिकान्तर्गतः)

Beginning :

अथात्र वासरे काल उच्यते —

मन्त्रारम्भश्चैत्रमासे बहुदुःखफलप्रदः ।
वैशाखे रत्नलाभः स्याज्ज्येष्ठे तु मरणं भवेत् ॥
आषाढे बन्धुनाशः स्याच्छ्रावणे वृद्धिरुत्तमा ।
प्रज्ञानाशो भाद्रपदे भवेदाश्वयुजे सुखम् ॥
× × × × ×

End :

भारद्वाजकुलीनेन वरदार्यस्य सूनुना ।
नृसिंहसूरिणाध्यायो द्वादशोऽयं प्रचिन्तितः ॥ श्रियै नमः ॥

Colophon :

इति कालप्रकाशिकायां द्वादशोऽध्यायः ।

78

Sl. No. 50228 मन्त्रारूढचक्रम् Ms. No. P. 4862-19

Beginning :

अथ मन्त्रारूढचक्रम् —

चतुष्कोणं लिखेच्चक्रं वारणेन्द्रत्रयं लिखेत् ।

रेखात्रयं यमस्योमे पदं षोडशसंख्यया ॥

End :

आम्नायसिद्धमन्त्राणां सिद्धारिं नैव लोकयेत् ।

स्वप्नलब्धे स्त्रिया दत्ते मालामन्त्रे विशेषतः ॥

× × × × ×

× × × सिद्धारिं नैव शोधयेत् ।

Colophon :

इति ब्रह्मतान्त्रिक सिद्धारिचक्राङ्गं सम्पूर्णम् ।

79

Sl. No. 50229 मन्त्रार्थसंग्रहः Ms. No. C. 1873

Beginning :

ओं इति प्रणवमन्त्रर्थस्तु देशतः कालतो गुणत ओतत्वादों सर्वस्वामित्वेन सर्वत्र प्रसिद्धत्वादों इति । सर्वभिन्नत्वान्निर्दोषत्वात् सर्वोत्कृष्टत्वादु + सर्ववेदादि-वेद्यत्वाज्ञानस्वरूपत्वान्म इति वर्णत्रयात्मकोंकारार्थो ज्ञेयः ।

End :

भागवत्तर इति। अनन्याधीन निरवधिकानन्तसमग्रैश्वर्यादि गुणवानतिशयेनेति भगवत्तरः। विश्वभेषजः सर्वारिष्टनिवर्तकत्वेननौषधस्थानीयः। शिवस्य परम-मङ्गलस्य अभिमर्शनं संबन्धो यस्मात् शिवाभिमर्शनः इति मन्त्रार्थः।

Colophon :

इति श्रीमन्त्रसारोक्त मन्त्रार्थसंग्रहः श्रीमद्यदुपत्याचार्यपूज्यपादाराधक श्रीश्रीनि-वासार्यपुत्र वेंकटेशाचार्यकृत तन्त्रसाराख्यव्याख्यानात् उद्धृत्य लिखितः समाप्तः।

80

Sl. No. 50233 मन्त्रोद्धारशतकम् Ms. No. P. 1889-4

Beginning :

ओं ह्रीं श्रीं क्लीं ग्लभंगंगणपतेवरद वरद सर्वजनं मे वशमानय स्वाहा। ओं श्रीं ह्रीं क्लीं ततो ग्लौं तदनुसमवेददगं परस्ताद्गणपति पश्चादव्धुयात्पते —

End :

आदौ तारं पठित्वा तदनु समवदेद्दृष्टियुक्तं च केशं
खद्गीशस्तत्परस्तात्तदनु च विमलोदक्षकर्णेन युक्तः।
झिब्व्याढ्यां वारुणींतत्परमिह च वदेत्तत्परं स्याद्धृदन्तः
सप्तार्ण × × रयमददात सर्वविद्यां सदामे ॥ ३४ ॥

Colophon :

———

81

Sl. No. 50234 मन्त्रोद्धारशतकम् Ms.No. P. 1889-3

Beginning :

श्रीं सौः क्लीं ऐं ह्रीं औ ह्रीं श्री कऍं रं लह्रीं हमतुहलह्रीं सकलह्रीं। ह्रीं ऐं क्लीं सौ श्रीं॥

श्रीर्बालाकामवाचौ तदनु च भुवने श्रीध्रवशक्तिलक्ष्मौ
+ + + + +
+ + निरवधिकं मङ्गलं संविधत्ताम् ॥

End :

उक्तं श्रीकृष्णमार्येण सर्वेषां विदुषां मुदे ।
मन्त्रोद्धारस्यशतकं इदं परमया मुदा ॥
गृह्णन्तु सन्तस्सर्वत्र अनुगृह्णन्तु मामपि ।
य इदं शृणुयान्नित्यं × × सन्ततं स्यान्नसंशयः ॥

Colophon :

श्रीशैलवेङ्कटकृष्णमार्यपादसेवालब्धमन्त्रशास्त्रेण वात्स्यानन्तार्यसूनुना वेङ्कटकृष्ण-मार्येण कृतं मन्त्रोद्धारशतकं संपूर्णम् ।

82

Sl. No. 50235 मन्त्रोद्धारशतकम् Ms. No. P. 1889–1

Beginning :

श्रीं सौं क्लें ऐं ह्रीं ओं ह्रीं श्रीं कणं रं लह्रीं हस्तलश्रीं सकल श्रीं ह्रीं ऐं क्लीं सौः श्रीं ॥ श्रीर्बालाकामवाचौतदनु च भुवने श्रीध्रुवः शक्तिलक्ष्म्यै । विद्या-खण्डत्रयं तु .... निरवधिकं मङ्गलं संविधत्ताम् ॥

End :

मन्त्रोद्धारस्य शतकं इदं परमया मुदा ।
गृह्णातु सन्तस्सर्वत्र अनुगृह्णन्तु मामपि ॥
इदं शृणुयान्नित्यं पठेद्वा विजितेन्द्रियः ।
संप्राप्नोत्यखिलान् कामान् सन्ततं स्यान्नसंशयः ॥

Colophon :

॥ श्रीः ॥

83

Sl. No. 50237 मन्त्रोपदेशविधिः Ms. No. P. 4922–28

Beginning :

कृष्णपक्षे त्रयोदश्यां दक्षिणामूर्तिसन्निधौ ।
लिखित्वा राजते पत्रे तालपत्रेऽथवा पुनः ॥
मन्त्रं तु स्थण्डिके स्थाप्य पूजयित्वा महेश्वरम् ।
पायसादि निवेद्यं तु कृत्वा तं प्रतिपत्य च ॥

End :

ताळपत्रे लिखित्वा तु मन्त्रं तत्र निधाय च ।
आवाह्य भस्करं तत्र यामावधिसुपूजयेत् ॥
तत्सन्निधावष्टशतं परेद्देशिकतो यथा ।
एवं गृहीतमतिमानपूर्वोऽयं विधिः स्मृतः ॥

Colophon :

इति मन्त्ररत्नोदधौ गुरोरभावे मन्त्रग्रहणोपायः ।

84

Sl. No. 50239 मन्मथमहामन्त्रः Ms. No. P. 6128–55

Beginning :

अस्य श्रीमन्मथमहामन्त्रस्य शक्तिसंमोहनी ऋषिः । अनुष्टुप् छन्दः ।
मन्मथो देवता । क्लां बीजम् । .... वशीकरणसिद्ध्यर्थे विनियोगः ....

ध्यानम् —

उद्यद्भानुसहस्रकोटि ....

.... ध्यायेज्जगन्मोहनम् ॥

End :

क्लौं नेत्रायवौषट् । आः अस्त्रायफट् । भूर्भुवस्सुवरोमिति दिग्विमोकः ।
ध्यानम् — लमित्यादि पञ्चपूजा ।

Colophon :

॥ शुभमस्तु ॥

85

Sl. No. 50240 मन्युकल्पः Ms. No. P. 4868-45

Beginning :

श्री गुरुवे नमः ॥

अस्य श्री मन्युकल्पमहामन्त्रस्य मन्युस्तापनऋषिः । मन्युर्देवता । मन्युमूल-मन्त्रोक्तरषडङ्गानि × रिन्द्रो मन्युरेवास्य बीजम् । अभि हि मन्यो इति शक्तिः । स्वेष्टधनमिति कीलकम् । मम इष्टकाम्यसिद्ध्यर्थे .... योमः ।

End :

ज्वलनार्कप्रतीकाशं जटामकुटमण्डितम् ।
ब्रह्मश्रिया विराजन्तं दीप्यमानमुखाम्बुजम् ॥
पद्मासने समासीनं ध्यायन्तं धेनुमुद्रया ।
ध्यायेत्तं तापसं (मन्यो) मन्युं ममामीष्टकरं परम् ॥

इति ध्यात्वा लमित्यादि पञ्चपूजां कुर्यात् ।

Colophon :

———

86

Sl. No. 50241 मन्युकल्पः Ms. No. P. 7943-5

Beginning :

राजोवाच ।

मार्कण्डेय महाराज मुनिशार्दूल सुव्रत ।
त्वत्तः सर्वं विजानामि किञ्चिदस्ति हि मे प्रियम् ॥
विज्ञापनीयमार्यत्वं समाचक्ष्व ममानघ ।
जितोऽहं दस्युभिः क्रूरैस्त्यक्तं राज्यं मयानघ ॥

End :

एवं प्रकारेण व्युत्क्रमपठनं च । एवं प्रणवपूर्वकं पादार्धं ऋग्भिः षड्वारं पठित्वा ततः प्रणवपूर्वकं सूत्रं अनुलोमविलोमेव समग्रं पठेत् । एवं सप्तधा एको जपः ।

Colophon :

॥ श्री कृष्णार्पणमस्तु ॥

87

Sl. No. 50245 मन्युसूक्तविधिः Ms. No. C. 3500-1

Beginning :

अथ मन्युसूक्तविधिरारभ्यते —

तत्र प्रयोगार्णवे चतुर्दशर्चं सूक्तम् । विनियोगदीपिकायां सूक्तद्वयमुक्तम् । सप्तर्चमाद्यं द्वितीयं सप्तर्चम् । ग्रन्थद्वयेऽपि ऋषिच्छन्दोदेवता संज्ञापिकैव ।

End :

ऋग्विधाने तु विधिना कर्तव्यं कार्यसिद्धये ।
शान्तं कुटुम्बिनं दान्तं मन्त्रज्ञं च यशस्विनम् ॥

विधिज्ञं वेदविद्वांसं प्रयोक्तं ब्राह्मणं वृणेत् ।
विधिहीनं न कर्तव्यं मन्त्रहीनं तथैव च ।
एवं यः कुरुते सम्यक् सद्यः सिद्धिमवाप्नुयात् ॥

Colophon :

इति श्रीशिवोक्तविधानेन मन्युसूक्तविधानं समाप्तम् ॥

88

Sl. No. 50246 मन्युसूक्तविधिः Ms. No. C. 3500-2

Colophon :

अथातः सम्प्रवक्ष्यामि शत्रूणां न पराभवम् ।
शत्रुभिः परिभूतासु ऋचमेकाममुं जपेत् ॥
संसृष्टां धनमित्यस्य न्यासं कुर्याद्यथाविधि ।
लिखित्वाऽष्टदलं पद्मं इन्द्रशत्रुपरं जपेत् ॥

End :

ऋतुदिने नागकेसरं चूर्णमभिमन्त्र्य गोदुग्धेन प्राशयेत् । एवं कृत्वा पुत्रप्राप्तिर्भवति । नष्टपुत्रप्राप्त्यर्थं दशसहस्रं जपेत् । कमलैः शतपत्रैर्वा होमः । मनसीष्टप्राप्तिर्भवति ॥

Colophon :

इति विनियोगदीपिकायां प्रयोगार्णवमतानुसारेण मन्युसूक्तविधानं समाप्तम् ॥

89

Sl. No. 50255 मलयाळीमन्त्रः Ms. No. P. 6915-12

Beginning :

ओं मलयळि उच्छिष्टचाण्डालि शत्रुहृदयमांसभक्षिणि वेश्याद्रिमातङ्गि

त्रैलोक्यसंहारकारिणि ल ल ल ल ल ल गड गड गड गर गर गर धं धं धं धं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं सिष्ट ।

End :

आवेशहांकारभैरवाय महाकोपभैरवाय सुर्ज सुर्ज गुर्ल गुर्ल नागुरुवीरव्रह्मेश्वर-पादयाने ह्रीं ह्रीं नागुरुबालव्रह्मेश्वरु पादमाने ओं पट्ठु पट्ठु स्वाहा ॥

Colophon :

॥ शुभमस्तु ॥

90

Sl. No. 50257 महाभैरवकल्पः Ms. No. P. 8772

Beginning :

गुरुगणपतिं देवीं भैरवं शरभेश्वरम् ।
नमस्कृत्वा प्रवक्ष्यामि मन्त्रशास्त्रविभूतये ॥
साङ्गं सलक्षणं देवं सारभूतगतिप्रदम् ।
ज्ञानदं सर्वजन्तूनां साधकानां सुखावहम् ॥

End :

भीषणः कन्यकां पातु भार्यामग्नगणेश्वरः ।
त्वरितःपातु चात्मानं धर्मकर्मकृतूत्तरः ॥
सिद्धिं पातु महादेवो भगवान् भुजगाशनः ।
सततं पातु मे श्रेष्ठः स्वस्तिदः शुचिरात्मवान् ॥

\+ + + + +

Colophon :

इति महाकाशभैरवकल्पे गरुडप्रयोगभेदो नाम त्रयोदशोऽध्यायः ।

91

Sl. No. 50258 महाकालभैरवपटलः Ms. No. B. 952-3

Beginning :

श्रीदेव्युवाच —

भगवन्करुणाम्भोजे सर्वज्ञमरमेश्वरः ।
महाकालस्य देवस्य पञ्चाङ्गं वद मे प्रभो ॥

ईश्वर उवाच —

शृणुदेवि प्रवक्ष्यामि वक्ष्ये पञ्चाङ्गमुत्तमम् ।
महाकालस्य देवस्य गुह्यं परमदुर्लभम् ॥

End :

इतीदं परमं तत्त्वं मन्त्रस्यास्य मयेरितम् ।
अदातव्यमभक्तेभ्यो रहस्यं परमं प्रिये ॥
इत्येषपटलौ देवि गुह्यो परमदुर्लभः ।
गुह्यो गुह्यतमो मोप्यः सद्यः फलप्रदायकः ॥

Colophon :

इति श्री विश्वनाथसारोद्धारे तन्त्रे उत्तरखण्डे मन्त्रप्रदीपिकायां कामेश्वररहस्ये षडाम्नायनिर्णये श्री महाकालपटलः संपूर्णः ।

92

Sl. No. 50261 महाचम्पकन्यासः Ms. No. P. 4554-12

Beginning :

अथ महाचम्पकन्यासोच्यते । तकारस्य प्रह्लाद ऋषिः । गायत्री छन्दः । अग्निः देवता । थां बीजम् । प्रह्लादिनी शक्तिः । तं कीलकम् । पृथ्वी तत्त्वम् । चम्पकवर्णः ।

End :

पल्लवमुद्रा । गायत्रीपदे विनियोगः । यार्कीराय नम इति ब्रह्मरन्ध्रे न्यसेत् ।
तदनन्तरं हृदये न्यसेत् ।

यार्कीरं तु शिखाप्रोक्तं चतुर्वेदेन संयुतम् ।
प्रत्यक्षरपरं ब्रह्म विष्णुरुद्रनमस्कृतः ॥

Colophon :

इति महाचम्पकन्यासः ।

93

Sl. No. 50263 **महादिग्बन्धक्रमः** **Ms. No. P. 902-2**

Beginning :

अथ महादिग्बन्धक्रमः ।

अस्य श्री प्रत्यङ्गरादिग्धमहामन्त्रस्य प्रत्यङ्गिरा ऋषिः । प्रत्यङ्गिरा देवता ।
ह्रां बीजम् । ह्रीं शक्तिः । ह्रूं कीलकम् । दशदिग्बन्धनार्थे जपे विनियोगः ।

ध्यानम् —

End :

अथोदग्दिग्भागादागतः ।

ओं नमो विष्णुगणेभ्यः । विष्णवे नमः । अथ उदग्भागं बन्धयामि ।
इंति दिग्बन्धः ।

ध्यानम् ।

ध्यायेत् समस्तशत्रुघ्नीं जपेन्मन्त्रं यथाविधि ॥

Colophon :

इति महादिग्बन्धः ॥

94

Sl. No. 50265 महापादुकाविधिः Ms. No. C. 2111-2

Beginning :

अथ संहितोक्ता महापादुका ।

हंस्नामादौ समालिख्य हंसक्षमलवा निलात् ।
हंह्वियुक्ता त्रिधालेख्या त्रिधा संभूष्यते स्वरैः ॥
मुखवेष्टनवामाङ्ग श्रीति नेत्रेषु मण्डितैः ।
बीजत्रयमिदं भद्रे बिन्दुनादकलात्मकम् ॥

End :

हसौं हसक्षमलवरयूं दसौं सहौः सह क्षमलरवरयूं हसौः स्वच्छप्रकाशपरिपूर्ण-परप्रकाशविमर्शात्मक अमुकानन्दनाथ श्रीपादुकां पूजयामि नमः ॥

Colophon :

95

Sl. No. 50267 महामायाविद्यामन्त्रः Ms. No. P. 4999-25

Beginning :

प्रकाशमध्ये स्थितचित्स्वरूपां
वराभये संदधतीं त्रिणेत्राम् ।
सिन्दूरवर्णामति कोमलाङ्गीं
माया × × × मातृमर्यां नमामि ॥

अस्य श्रीमहामायाविद्यामन्त्रस्य ब्रह्मा ऋषिः गायत्रींच्छन्दः श्रीमहामायात्रिपुर-सुन्दरी देवता ।

End :

ओं नमो अवधूतगुरुब्रह्मणे नमः ।

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पादं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

Colophon :

॥ श्रीः ॥

96

Sl. No. 50269 महायागविधिः Ms. No. P. 2517-2

Beginning :

अदितिर्द्यौरदितिरन्तरिक्षम् । अदितिं माता स पिता स पुत्रः । अदिति-देवाः अदितिः पञ्चजनाः । अदितिर्जातमदितिर्जनित्रम् । इत्यावाहयेत् । देहे-परित् । ओं ऐं भगइगे ।

End :

तर्पयेदखिलं विश्वं स्वात्मानन्दान्महेश्वरि ।
अयमेव महायागः प्रोच्यते वारुणः प्रिये ॥
इत्यर्चनं कृत्वा स्वेष्टं विहरेदिति शिवम् ।

Colophon :

इत्यानन्दतन्त्रे महायागप्रकरणं समाप्तम् ।

97

Sl. No. 50270 महाराज्ञीमहोदयमालामन्त्रविधिः Ms. No. C. 2916-1

Beginning :

मालामन्त्रं प्रवक्ष्यामि महाराज्ञी महोदयम् ।
यस्य स्मरणमात्रेण पूजासिद्धिः प्रजायते ॥

त्रितरां प्रणवं प्रोच्य (?) नमस्त्रिपुरसुन्दरि ।
हृदयादेवि (?) शब्दान्ते शिरोदेवीतिकीर्तयेत् ॥

End :

सर्वेश्वरोऽथ सकलजननीललिताम्बिका ।
करुणाकरकामेशः कामकोटिश्च तद्वधूः ॥ ८३ ॥
लीलावती च ललिता कामो लावण्यनायकः ।
हरेश्वरी हिरण्या च बाहुस्तद्भर्तृशङ्करः ॥ ८४ ॥

Colophon :

॥ शुभमस्तु ॥

98

Sl. No. 50271 महारुद्रपद्धतिः Ms. No. C. 4000

Beginning :

ओं नमो ब्रह्मवेदाय । ओं नमो विघ्नहर्त्रे । अथर्ववेदोक्त महारुद्रपद्धतिर्लिख्यते । प्रथमतः । नित्यमैत्रिकं वा सुपूजनं चलत्वा(?) गौर्यादिचतुर्दश ।

End :

मया यत्कृतं यथा कालं यथा देशं यथा ज्ञानं यथा शक्ति च महारुद्रादिकर्म, कृतेन भगवान् । श्रीमहारुद्रः प्रीयतां ओंतत्सतु ब्रह्मार्पणमस्तु । अद्य पूर्वोच्चरितमहारुद्रविधिः सर्वं परिपूर्णमस्तु ।

Colophon :

इति आङ्गिरसकल्पोक्ते अथर्ववेदे महारुद्रपद्धतिः ।

99

Sl. No. 50276 महालक्ष्मीकल्पः Ms. No. P. 2357-3

Beginning :

भद्रकृत्या नमो देवि अङ्गिरा ऋषिरुच्यते ।
छन्दो गायत्रमेव स्यात् भद्रकृत्या तु देवता ॥
क्षं बीजं ह्रीं ततश्शक्तिः —

End :

यन्त्रं पूर्वोक्तमेव स्यात् प्रयोगं च तथाविधम् ।
पञ्चमस्य महेशानि शातातप ऋषिः स्मृतः ॥
छन्दोऽनुष्टुप् महेशानि परमे × × ×

Colophon :

इति महालक्ष्मीकल्पे उमामहेश्वरसंवादे शङ्करेण विरचिते प्रत्यक्षसिद्धिप्रदे महालक्ष्मीरत्नकोशे एकसप्ततितमोऽध्यायः ।

100

Sl. No. 50277 महालक्ष्मीकल्पः Ms. No. A. 587-1

Beginning :

मन्दरस्थं सुखासीनं भगवन्तं त्रिलोचनम् ।
सम्यक्प्रणम्य चरणौ पार्वती पर्यपृच्छत ॥
श्री देव्युवाच —
नरनारीहितार्थाय बालानां रक्षणाय च ।
राज्ञां मण्कलिकानां च दीनानां च महेश्वर ॥
विदुषां च द्विजातीनां विशेषात्सर्वसाधिनी ।
महाभयेषु सर्वेषु विद्युदग्निभयेषु च ॥

End :

विंशकोष्ठे लिखेन्मूलं तद्बाह्ये दलपञ्चकम् ।
दलेषु विलिखेद्वर्गं पञ्चस्ते तु पुटीकृतम् ॥
बाह्ये भूसदने साध्यं चक्रं त्रैलोक्यनाशनम् ।
कृते प्रयोगे देवेशि निवृत्तिर्नैव विद्यते ।
अनेनैव निवृत्तिः स्यात् अस्त्रेण वरवर्णिनि ॥

Colophon :

(इति महालक्ष्मीकल्पे उमामहेश्वरसंवादे शङ्करेण विरचिते प्रत्यक्षसिद्धिप्रदे महालक्ष्मीरत्नकोशे षट्षष्टितमः अध्यायः ।)

इति महालक्ष्मीकल्पे चतुस्सप्ततितमः अध्यायः ।

101

Sl. No. 50280 महालक्ष्मीकल्पः Ms. No. P. 3017

Beginning :

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
नानापुष्पलताकीर्णे नानासिद्धसमन्विते ॥
मुनिसङ्घैस्समाकीर्णे योगिवृन्दैर्निषेविते ।
प्रमण्य विधिवद्देवमिदं वचनमब्रवीत् ॥
देव्युवा च ।
देवदेव जगन्नाथ त्रिगुणातीत शङ्कर ।
ज्ञानमूर्ते परंधाम विद्यानाथ नमोऽस्तु ते ॥

End :

चतुर्दिक्षु महेशानि पूजयेन्नियतेन्द्रियः ।
तद्बहिर्लोकपालानां पूजयेद्दिक्षु तत्क्रमात् ॥

एवं मातङ्गि × त्र वैभवं तव वर्णितम् ।
इतः परं महा × विभुवनेशि शृणु प्रिये ॥

Colophon :

इति श्रीमहालक्ष्मीकल्पे उमामहेश्वरसंवादे शङ्करेण विरचिते प्रत्यक्षसि × प्रदे महालक्ष्मीरत्नकोशाख्ये अष्टत्रिंशोऽध्यायः ।

102

Sl. No. 50284 महालक्ष्मीन्यासमन्त्रः Ms. No. P. 10264–6

Beginning :

अस्य श्रीमहालक्ष्मीमन्त्रस्य मङ्कणो ऋषिः । देवीगायत्री छन्दः । महालक्ष्मी-देवता । + + महालक्ष्मीप्रसादसिध्यर्थे जपे विनियोगः ॥

End :

कल्याणानामविकलानि .... रिति ध्यानम् । ओं श्रीं श्रियै नम इति मन्त्रः । प्रणवं विनैव पञ्चाक्षरोऽयं मन्त्रः ।

Colophon :

———

103

Sl. No. 50286 महालक्ष्मीन्यासमन्त्रः Ms. No. P. 3400–9

Beginning :

अस्य श्रीमहालक्ष्मीमहामन्त्रस्य अनुष्टुप् छन्दः । श्रीमहालक्ष्मी देवता ।
+ + +

ध्यानम् —

वन्दे लक्ष्मीं निरवधिकरूपां शुद्धजाम्बूनदाभां
तेजोरूपां कनकवसनां सर्वभूषोज्वलाङ्गीम् ।
बीजापूरं कनकलशं हेमपद्मं दधानां
आद्यां लक्ष्मीं सकलजननीं विष्णुवामाङ्कसंस्थाम् ॥

End :

पञ्चपूजां कृत्वा — ओं ऐं ह्रीं श्री क्लीं मं सौः
प्रणवञ्चर मा मा रं महालक्ष्मीपदद्वयम् ।
राह्येहि सर्वसौभाग्ये देहि मेऽस्तु ततः परम् ।
श्रीमहालक्ष्म्यै नमो नमः ॥

Colophon :

———

104

Sl. No. 50290 महालक्ष्मीस्तोत्रमन्त्रः Ms. No. P. 4525–39

Beginning :

अस्य श्रीमहालक्ष्मीस्तोत्रमहामन्त्रस्य श्रीमन्नारायण ऋषिः । गायत्री छन्दः । श्री महालक्ष्मीर्देवता । श्री बीजम् । ह्रीं शक्तिः । क्लीं कीलकम् । श्रीमहालक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

End :

मायां मं ये चाष्टकोणेषु कृत्वा
पादानष्टौ मातृकार्णे प्रवीतान् ।
भूगेहस्थं सर्व भूतामयघ्नं
रक्षायु श्रीराज्यपुत्रप्रदं च ॥

Colophon :

———

105

Sl. No. 50291 **महावाक्यमहामन्त्रः** Ms. No. B. 679-3

Beginning :

अस्य श्री महावाक्यमहामन्त्रस्य, परब्रह्मऋषिः । पंक्तिछन्दः । परमात्मा देमता । ह्वां बीजम् । ह्वीं शक्तिः । ह्वूं कीलकम् । श्रीपरब्रह्मप्रसादसिध्यर्थे जपे विनियोगः ।

End :

स्तम्भनं चतुरस्रं च मत्सङ्गो खुरमेव च ।
योनिमुद्रेति विख्याताः पञ्च मुद्राः प्रकीर्तिताः ॥

यस्य स्मृत्यादि । अनेन महावाक्यजपसाङ्गेन भगवान् सर्वात्मकः तेन (?) श्रीपरमेश्वरः प्रीयताम् ॥

Colophon :

॥ ब्रह्मार्पणमस्तु ॥

106

Sl. No. 50294 **महाविद्या** Ms. No. P. 4527-2

Beginning :

मङ्गलं दिशतु मे विनायकौ
मङ्गलं दिशतु मे सरस्वती ।
मङ्गलं दिशतु मे महेश्वरी
मङ्गलं दिशतु मे महेश्वरी ॥

अस्य श्री वनदुर्गास्तोत्रमहामन्त्रस्य अरण्यकशीश्वर ऋषिः ।

End :

श्रीवनदुर्गामहाविद्यायै नमः । चण्डप्रजाप्रदायक दक्षिणामूर्तये नमः । श्री

मङ्गलमूर्तये नमः ।

अनिर्वाच्या महाविद्या त्रिगुणा परिणामिनी ।

चाम्बिके महादेवी चामुण्डी चण्डिकेऽम्बिके ॥

Colophon :

॥ महाविद्या संपूर्णा ॥

107

Sl. No. 50297 महाविद्या Ms. No. B. 664-31

Beginning :

अथ महाविद्याप्रारम्भः ॥

ओं सहनाववतु ॥ ० ॥ ओं शान्तिश्शान्तिश्शान्तिः । भद्रं + + + + दधातु । ओं शान्तिः ॥ ३ ॥ ओं भद्रन्नोपि वा ते नमः । ओं शान्तिः ॥ ३ ॥

अस्य श्री वनदुर्गा महाविद्यास्तोत्रराजमहामन्त्रस्य । किराइरूपधरईश्वरऋषिः । नानाविधानि छन्दांसि । .... दुर्गाप्रसादसिध्यर्थे जपे विनियोगः ॥

End :

पुस्तके लिखितान् मन्त्रान् अवलोक्य जपे × यः ।

स जीवन्नेव चण्डालो मृतश्वासो भविष्यति ॥ इति षड्विद्यागमे ॥

॥ वन्रदुर्गाचरणारविन्दार्पणमस्तु ॥

सृष्टिस्थितिरोधान .... अनन्यधीः ॥

Colophon :

॥ इति पारायणक्रमविधिः ॥

108

Sl. No. 50298 महाविद्यामन्त्रविधिः Ms. No. B. 686-2

Beginning :

महाविद्याजपप्रारम्भः —

महाविद्यामथो वक्ष्ये ब्राह्मणजपतिशुभा ।
उत्तमं सर्वविधानां त्रैलोक्येषु वशङ्करो ॥
सा राज्ञीं सर्वविद्यानां मोहिनी प्राणिनां सदा ॥
अस्य श्री महाविद्यास्तोत्रमहामन्त्रस्य किरातरूपः ईश्वर ऋषिः देवीगायत्रीं छन्दः ....

End :

श्रिय एवैनं ताच्छ्रूयमादधाति सन्तनमृचावषट् कृत्यं सन्तत्यै संधीयते प्रजया पशुभिर्य एवं वेद ।
शिबिके शिरजारोह शोभयन्तीमुखं मम ।
मुखं हि मम शोभयतुयाँसं च भगं कुरु ॥
ओं सहनांववतु .... शान्तिः । यदक्षराद् .... प्रसीद परमेश्वरि ॥

Colophon :

॥ श्रीः श्रीः ॥

109

Sl. No. 50303 महाशास्त्रामहामन्त्रः Ms. No. P. 6128-51

Beginning :

अस्य श्री महाशास्त्रामहामन्त्रस्य ब्रह्माऋषिः । अनुष्टुप् छन्दः । श्रीमहाशन्स्ता देवता । श्रीं बीजम् । ह्रीं शक्तिः क्लीं कीलकम् ।

End :

हरिहरपुत्राय महाशास्ताय × × क्षुद्रपिल्लिशून्यभूतप्रेतयक्षराक्षसादिनिवरणं कुरु कुरु स्वाहा ॥

Colophon :

———

110

Sl. No. 50304 महाशैवतन्त्रम् Ms. No. P. 2592-3

Beginning :

शृणु देवि प्रवक्ष्यामि दिव्यशासनमद्भुतम् ।
यस्य स्मरणमात्रेण साधकः सर्वकृद्भवेत् ॥
विभक्ता पञ्चधा बाधा लोकव्यसनकारिणी ।
भूतबाधा रोगबाधा चोरबाधा तथारिपोः ॥
राजबाधेति लोकानां कृतपापानुरूपिणी ॥

End :

पितृमातृकुलैः श्लिष्टैः स्निग्धैः शिष्यैरकल्मषैः ।
अनुभूयाखिलान् कामान् मुक्तिमेति सनातमम् ॥
इति सुमशरशेषदेवतानां
भजनविधानविशेषसूक्ष्मम् ।
गुरुवरकरुणाकटाक्षलब्धं
सपदिकरोतु शिवैक्यभावसिद्ध्यै ॥

Colophon :

इति महाशैवतन्त्रे एकोनविंशोपदेशः ।

111

Sl. No. 50310 महाषोढान्यासः Ms. No. P. 2366-4

Beginning :

अथ महाषोढान्यासः —

प्रपञ्चो भुवनं मूर्तिः मन्त्रदैवतमातरः ।
महाषोढाह्वयन्यासः सर्वन्यासोत्तमोत्तमः ॥

ओं अस्य श्रीमन्महात्रिपुरसुन्दरी महाषोढान्यासमन्त्रस्य सच्चिदानन्दभैरवीदेवी देवऋषिः । चिन्मयश्छन्दः । पराम्बा देवता । हं सां बीजम् ।

End :

त्रिलोके नास्ति सन्देहः सत्यं सत्यं वरानने ।
ऊर्ध्वाम्नाय प्रवेशं च पराप्रासादचिन्तना ॥
महाषोढा परिज्ञानं नाल्पस्य तपसः फलम् ॥
महाषोढाह्वयन्यासं कृत्वा यो यत्र तिष्ठति । तत्र क्षेत्रं महाशैवं शतयोजनमायतम् ॥

Colophon :

इति महाषोढान्यासः समाप्तम् ॥

112

Sl. No. 50311 महाषोढान्यासः Ms. No. P. 8106-16

Beginning :

अथ महाषोढा वड्डामरेश्वरतन्त्रप्रकारः ।
अथातः सम्प्रवक्ष्यामि महाषोढं सुखप्रदम् ।
क्षुद्रो विन्यासकृद्यैश्च शिव एव न संशयः ।
प्रपञ्चो भुवनं मूर्तिः मन्त्रदैवतमातरः ।

End :

ऊर्ध्वाम्नायं प्रकुर्वीत ब्रह्मादीनां च दुर्लभम् ।
श्रीप्रासादपरां न्यासं पराप्रासादमेव च ।
ततः परं महाशक्ति न्यासं कुर्याद्यथाविधि ॥

Colophon :

इति श्रीन्यासखण्डे वड्डामरेश्वरतन्त्रे महाषोढान्यासः संपूर्णः ।

113

Sl.No. 50317 **महासौरमन्त्रः** Ms.No. P. 6536

Beginning :

पूर्वोच्चरितैवंगुणविशेषणविशिष्टायां शुभतिथौ मम संभावितसमस्तपाप ....
.... सूर्यनारायणदेवताप्रीत्यर्थं महासौरमन्त्रजपं करिष्ये —

End :

उदयन् ब्रह्मस्वरूपश्च मध्याह्ने तु महेश्वरः ।
अस्तमाने स्वयं विष्णुः तुर्यमूर्तिर्दिवाकरः
नमो ब्रह्मण्यदेवाय .... नमो नमः ॥

Colophon :

॥ इति महासौरः समाप्तः ॥

114

Sl. No. 50320 **मातङ्गेश्वरीमन्त्रः** Ms. No. B. 288-19

Beginning :

ओं मातङ्गेश्वरीमन्त्रस्य मतङ्ग ऋषिः ।
छन्दोऽतिजगती प्रोक्ता देवता श्रीमतङ्गिनी ।
वाक्कामो बीजशक्तिश्च परा कीलकमुच्यते ॥
त्रिकारञ्च कुमारीं च समाहृत्य च कारकम् ।
नमो भगवती प्रोक्ता श्रीमातङ्गेश्वरीति च ॥

End :

एवं मतङ्गिनीमन्त्रवभवं तव वर्णकम् ।
इतःपरं महादेवि भुवनेशीं शृणु प्रिये ॥ ८९ ॥

Colophon :

इति श्रीमहालक्ष्मीकल्पे प्रत्यक्षसिद्धिपदे महालक्ष्मीरत्नकोशे श्रीराजश्याम ळमन्त्रकथनं संपूर्णम् ॥

115

Sl. No. 50323 मातृकाचक्रम् Ms. No. B. 890-1

Beginning :

जाग्रत्सुषुप्तिकृतदक्षिणवामपार्श्वां
स्वप्नस्वभावपरिक्लृप्तजघन्यभागाम् ।
तुर्यातितुर्यघटितानन हृत्प्रदेशां
प्राणेश्वरी परशिवस्य परामृशामः ॥

End :

आत्मापकारवपुषाणुरुकार एव
देहात्मनैव खलु संसृतिरस्य जन्तोः
देहं च तात्विकममुष्य सुषुप्तमेव
स्वप्ने तदत्र मन एव शरीरता भावम् ॥
शम्भोर्दक्षिण .... एतत्त्रयं देहिनाम् ॥

Colophon :

॥ हरिः ओम् ॥

116

Sl. No. 50324 मातृकाचक्रविवेकः Ms. No. B. 890-2

Beginning :

शिष्यमस्तकनिरन्तरस्थितं चित्सुखामृतपयोधिकरणम् ।
श्रीगुरोररुणपादपङ्कजं सेवकाळिकुलसंकुलं भजे ॥ ....

—एवं परम्परासौ महामन्त्रार्थशासने ।
श्लाघ्यते मातृकाचक्रविवेको नामसंग्रहः ॥

End :

मायां ये समुपासते कृतधियः तेषां यवर्गस्थितं
मायास्फूर्तिरहस्यमन्तरचिरादुद्योतते स्वात्मनि ।
शिवानन्देन मुनिना देशिकादेशवर्तिना
तृतीयं मातृकाचक्रविवेके व्याकृतं पदम् ॥

Colophon :

॥ हरिः ओम् ॥

117

Sl. No. 50325 मातृकाचक्रविवेकः Ms. No. P. 1312

Beginning :

शिष्यमस्तकनिरन्तरस्थितं चित्सुखामृतपयोधिनिर्भरम् ।
श्रीगुरोस्तरुणपादपङ्कजं सेवकालिकुलसंकुलं भजे ॥
नमस्ते जगत्त्रयीसर्गविश्रान्तिस्थानशक्तये ।
तदुत्तीर्णोर्ध्वविश्रान्तिस्फूर्तये गुरुमूर्तये ॥
स्वतन्त्रो नाम सिद्धोऽभूदादिनाथस्य लोचनात् ।
मातृकास्योपदेशेन लोकाननुजिघृक्षतः ॥
समाहितमताश्चक्रे मातृकार्थ प्रचिन्तनम् ।

End :

इति परमरहस्य मातृकात्मप्रदीपं
स्फुटतरमुपदिष्टं चक्रराजाभिनीतम् ।
लयनियमदमर्थं शक्तिसिद्धान्तज्ञैं
न तु पुनरितरत्र प्रत्ययवायो न तन्मे ॥

शिवानन्देन मुनिना देशिकादेशवर्तिना ।
व्याख्यातमातृकाचक्रविवेके पञ्चमं पदम् ॥

Colophon :

इति मातृकाचक्रविवेके पञ्चमः पट + + ।

118

Sl. No. 50333 मातृकान्यासविधिः Ms. No. P. 4461-70

Beginning :

अथ मातृकान्यासप्रकारः । तथा दक्षिणामूर्तिकल्पे ।
अपार्धं सर्वमन्त्राणां विन्यासेन लिपेर्विना ।
कृते तं निष्फलं विद्यात्तस्मादादौ लिपिं न्यमेत् ॥
वामया पूरयेद्वायुं स्वरैः काद्यैश्च कुम्भयेत् ॥
रेचयेद्यादिभिर्वर्णैस्ततः पिङ्गलया पुनः ॥

End :

छोटिकाभिर्दिशाबध्वा तत्तदस्त्रेणमन्त्रवित् ।
अस्त्र तेजोमयांश्चैव प्राकारान् परितः स्मरेत् ॥

ध्यानम् ।
पञ्चाशद्वर्णभेदैर्विहितवदनदोः पादयुक्कुक्षिवक्षोदेहं
भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुम्भालिखितकरवरां त्रीक्षणां पद्मसंस्थां
च्छाकल्पामतुस्ततजघनभरां भारतीं तां नमामि ॥
+ मातृकासरस्वतीं ध्यात्वा । मानसोपचारैः पूजयेत् ।

Colophon :

———

119

Sl. No. 50335 मातृकापुष्पमाला Ms. No. P. 5943-13

Beginning :

अप्रत्यक्षकथामकृत्रिमगिरां अप्यप्रकाशक्रमां
असच्चित्तगृहामतर्क्य विभवामव्याजनि + कृपाम् ।
अक्षाणामधिदेवतां अविदितां अभ्यारागामध्वगां
अक्षीणागमसम्पदभ्युदयदामन्वेमि दक्षात्मजाम् ॥ १ ॥

End :

इति गिरिवरपुत्री .... मातृकापुष्पकमाला ॥ ५३ ॥
संपूर्णेयं मातृकापुष्पमाला
सपूर्णेभिः भाभिरानन्दनीभिः ।
संपूर्णानां अक्षवर्णावलीनां
पूर्णानन्दा मे सदा सन्निदत्ताम् ॥
नमः शिवाय .... नमो नमः ॥
करकृतमपराधं .... अर्हन्त्यदोषम् ॥

Colophon :

॥ साम्बशिवार्पणमस्तु ॥

– श्रीः –

120

Sl. No. 50336 मातृकापूजाविधिः Ms.No. P. 1779-4

Beginning :

ब्राह्मे मुहूर्ते उत्थाय ब्रह्मरन्ध्रे सिताम्बुजे ।
चिच्चन्द्रमण्डले शुद्धे स्फटिकाभं वराभये ॥

दधानं रक्तया शक्त्या श्लिष्टं वामाङ्गसंस्थया ।
दधत्योत्पलदण्डं च नेत्र द्वन्द्वोपशोभिते ॥

End :

हृद्दोर्मूलपरगळकक्षेषु हृदादिपाणिपादयुगे जठराननयोर्वा व्यापकसंज्ञान्यनेदधाक्षरान् क्रमशः । ऋष्यादि हृदादि न्यासध्यानं पञ्चपूजां कुर्यात् ।

Colophon :

इति बहिर्मातृका ॥

121

Sl. No. 50338 मातृकाभैरवीन्यासविधिः Ms. No. P. 5002-61

Beginning :

अथ मातृकाभैरवीन्यासमाह —

आं क्षां ब्रह्मण्यम्बादेव्यै नमः । अनन्तकोटिभूचरिसेवितायै अं क्षं मङ्गलनाथाय आं क्षां ब्रह्मण्यम्बा देव्यै नमः । अनन्तकोटिभूतसेवितायै अं क्षं मङ्गलाम्बा देव्यै नमः । आं क्षां असिताङ्ग भैरवनाथाय नमः ।

End :

माहाषोढाह्वयं न्यासं कृत्वा यो यत्रतिष्ठति ।
तत् क्षेत्रं हि महाशैवं शतयोजनमायतम् ॥
इति ते कथितं ध्यातं देवि न्यासादिकप्रिये ।
षण्मासेन कुलेशानि किं भूयः श्रोतुमिच्छसि ॥

Colophon :

॥ हरिः ओम् ॥

122

Sl. No. 50340 मातृकाभैरवीन्यासविधिः Ms. No. P. 8781–6

Beginning :

दशविधमातृकान्यासप्रकारः —

शुद्धं बिन्दुयुतं विसर्गसहितं हृल्लेखया श्रीयुतं
बालासंपुटितं तथैव परया श्रीविद्यया संयुतम् ।
आरोहादवरोहतस्त्वजपया न्यासं पुनर्मालिनीं ।
यो जानाति स एव सर्वजगतां सृष्टिस्थितिध्वंसकृत् ॥

End :

इच्छादित्रयसंयुक्तां शूलदण्डकरां पराम् ।
रक्तपङ्कजमध्यस्थां मालिनीं भावये शिवाम् ॥
पूजादिपूर्वत् । ईं सैः अं नमः सौ ईं आं नम इत्यादिक्षान्तं शेषं पूर्ववत् ॥

Colophon :

इति दशविधमातृका समाप्ता ॥

123

Sl. No. 50342 मातृकाविनियोगविधिः Ms. No. P. 7538–61

Beginning :

अं ह्रां अः अक्षपादजय + +
आं ह्रां आः आकर्षणम् ।
इं ह्रां इं सिद्धिः
ईं ह्रां ईं मोहनम् ।
उं ह्रां उं द्रव्यशुद्धिः
+ + + + +

End :

शं ह्रां शं वाग्बन्धनम्
षं ह्रां षं सर्वकार्यसिद्धिः
सं ह्रां सं भूलाभं
हं ह्रां हं शिवप्रसन्न
ळं ह्रां ळं पशुलाभं
क्षं ह्रां क्षं सर्वकार्याणि सिद्धिः
श्रीं ह्रां श्रीं इष्टकाम्यार्थसिद्धिः

Colophon :

त्रिलक्षजपं तद्दशांशतर्पणं तद्दशांशहोमं तादशांशब्राह्मणभोजनम् । कार्यसिद्धि + + विषहरं यन्त्रराजं नमामि ।

124

Sl. No. 50344 मातृकासरस्वतीपूजाविधिः Ms. No. P. 4461–78

Beginning :

वर्गस्वरमाद्यंशक्रमेण कलधौतपीतताम्राः स्युः ।
इति रचितरुचिक्रमिदं साधकसर्वार्थदायिसततं स्यात ॥

अस्यार्थः–वर्ग इति कादिपञ्चवर्गाणां सारत्वात् सूर्यस्य च द्वादशकलात्मकत्वात् तेन सूर्यात्मकं द्वादशांशमित्यर्थः । + +

End :

एवं केशवादिन्यासं कृत्वा आत्मानमर्धनारीश्वरं ध्यात्वा अं श्रीकण्ठाय पूर्णोधर्ये नाम इत्यादिप्रकारेण श्रीकण्ठादिन्यासोऽपि कर्तव्यः । प्राग्बीजसंयुतान्वापीत्य-स्यायमर्थः । केवल आकारादिवर्णेभ्यः प्राक् शक्त्यादिबीजानि संयुक्त्वा वा न्यासेदिति । एवं न्यासे उक्तफलं भवति ।

× × × × ×

न्यासस्ते दशधापृथङ्मिगदिताः स्युर्न्नयागान्तिकः(!) ।
सर्वे साधकसिद्धिसाधनविधौ सङ्कल्प कल्पद्रुमाः ॥
इति जगदनुक्रान्ता + + इति भावः ।

Colophon :

———

125

Sl. No. 50347 मातृकास्तोत्रम् Ms.No. B. 642

Beginning :

अकारं ब्रह्मदैवत्यं श्वेतं सर्ववशंकरम् ।
सर्वज्ञत्वं मनोज्ञत्वं काममापत्वमम्बिके ॥ १ ॥
आकारन्तु पराशक्तिः श्वेशमाकर्षं (?) सिद्धिदम् ।
इकारं वृष्टिदं प्रोक्तं सर्वसस्यसमृद्धये ॥ २ ॥

End :

स्मरणात्तेन सिद्धिः स्यात् नानाकर्मक्रियादिषु ।
सर्वेषां मन्त्रवेत्तानां यदा साध्यं युगे युगे ॥ ६१ ॥
तत्सर्वं स्मरणादेव सिद्धिर्भवति तत्त्वतः ॥

Colophon :

इत्याकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे + + + पञ्चविंशः पटलः ॥

126

Sl. No. 50352 मारणसुदर्शनविधिः Ms. No. P. 4868–40

Beginning :

मारणमन्त्रस्य अहिर्बुध्न्या ऋषिः । गायत्री छन्दः । चक्रराजादेवता । ह्रीं बीजम् । ग्लौं शक्तिः । हूं कीलकम् । जपे विनियोगः । सं अं हन्तस्वाम् । रं क्ष हुं फट् ।

End :

चक्रं खड्गं च चापं परशुमसि मिषुं चाग्निशूलं च बाणं
शङ्ख वज्रं च खेटं हलमुसलगदापाशमप्यङ्कुशं च ।
नित्यानन्दं करालं निरुपमनिगमं प्रौढकालाग्निरूपं
एवं चक्रं सुदर्शं + + + +
+ + + + सन्मारणम् ॥

पुनः ऋष्यादिन्यासं ध्यानादिं कुर्यात् ।

Colophon : ————

127

Sl. No. 50357 मालनीन्यासविधिः Ms. No. P. 8032-16

Beginning :

अस्य श्री मालिनीन्यासस्य परमेश्वर ऋषिः । पंक्तिश्छन्दः । परमसंवित्कला श्रीमहात्रिपुरसुन्दरी देवता । न्यासे विनियोगः । आ ई इत्यादि षड्दीर्घस्वरैः करषडङ्गं विन्यस्य —

End :

ध्यानम् —

प्रकाशमध्यस्थित चित्स्वरूपां
वराभये सन्दधती त्रिणेत्राम् ।
सिन्दूरवर्णामतिकोमलांगीं
मयामयीं तत्त्वमयीं (नमामि) ॥

+ + + + +

Colophon : ————

128

Sl.No. 50361 मिथुनजयमालामहामन्त्रः Ms. No. B. 664–28

Beginning :

अस्य विथुनजयमालामहामन्त्रस्य । पुरुपतत्त्वाधिष्ठायी महेश्वररूपसायमादित्य ऋषिः । विकृतिः छन्दः । राजसह्रींकारभट्टारिकपीठस्थित .... हिरण्यबाहुकनामकामेश्वरभट्टारको देवता । मोक्षसिद्ध्यर्थे जपे विनियोगः ॥

End :

महामहामाये महामहामाय जयजय । महामहाशये महामहाशय जय जय । महामहाश्रीचक्रनगरसाम्राज्ञी महामहाश्रीचक्रनगरसाम्राज्य जय जय । नमस्ते नमस्ते स्वाहा नमस्ते नमस्ते स्वाहा जय जय ॥

Colophon :

इति सप्ताष्टमालानां विधानं प्रतिपादितम् ।
ललिताभक्तियुक्तानां भोगमोक्षैककारणम् ॥ १ ॥
मालामन्त्र .... नाशकाः ॥ २ ॥
ज्वरिणां च .... परीक्षयम् ॥ ३ ॥
एतन्मन्त्रिता .... विचारणा ॥ ४ ॥
सप्ताष्टसंख्या .... वती भवेत् ॥ ५ ॥
इति ललिता .... इत्यलमिति प्रासङ्गेन ।

129

Sl. No. 50364 मिथुनस्वाहामालामहामन्त्रः Ms. No. B. 664–26

Beginning :

अथ मिथुनस्वाहामालामहामन्त्रस्य । मनस्तत्वाधिष्ठायी ब्रह्मस्वरूपप्रातरादित्य ऋपिः । घृतिछन्दः । राजसक्ककारभट्टारकपीठस्थितकामकोटिनामललिताभूषि-

ताङ्ककरुणाकरकामेश्वरभट्टारको देवता । सर्वपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ॥

End :

महामहाशयायै महामहाशयाय स्वाहा । महामहाश्रीचक्रनगरसाम्राज्ञ्यै महा-महाश्रीचक्रनगरसाम्राज्याय स्वाहा । नमस्ते नमस्ते स्वाहायै स्वाहा । नमस्ते नमस्ते स्वाहाय स्वाहा ॥

Colophon :

———

130

Sl. No. 50367 **मिश्राम्बामन्त्रजपविधिः** Ms. No. P. 7538-45

Beginning :

मिश्राम्बामन्त्रस्य सदाशिवऋषिः । गायत्री छन्दः । मिश्राम्बा देवता । ऐं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । मम मिश्राम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

× × × × × ×

End :

ध्यानम् —

ओंकारे विद्रुमाभे हरिहरपरमे आदिमूलस्वरूपे
हाहाहोहाररेत्न अमृतवर्षदे अन्नमन्नादिरूपे ।
ईं का शक्तिमूले इह परम इह परम हमे ईक्षणध्यानरूपे
नामाद्ये नादनाथे नवनवमहिमे नादनादात्ममिके ॥

ऐं मिश्राम्बा श्री ।

Colophon :

———

131

Sl. No. 50371 मुख्यप्राणयन्त्रम् Ms. No. P. 1024-4

Beginning :

अथ यन्त्रं प्रवक्षामि सर्वकामार्थसिद्धये ।
आदौ चन्द्रं समालिख्य त्रिकोणं वर्तुलं लिखेत् ॥

बहिरष्टदलं पद्मं तद्बाह्यो द्वादशारकम् ।
षोडसारं ततः पश्चात् द्वात्रिंशद्दलसंयुतम् ॥

End :

त्रैलोक्यमोहनमिदं किमु + + + जनस्य वै ।
सत्यं सत्यन्तु देवेश नात्र कार्या विचारणा ॥

सीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र दूतोहं अर्यतां (?) भवतां(?) शरणागतोऽस्मि ॥

ख्यातः श्रीरामदूताः ....
.... दद्यात् ॥

Colophon :

———

132

Sl. No. 50374 मुद्राप्रकाशः Ms. No. C. 3836

Beginning :

द्रुहिणहरिहराद्यैर्देववृन्दैर्नमस्य भिमतमर्थं भक्तिभाजां जनानाम् ।
परिहृतसकलार्थैर्योगिध्यायमानं हरचरणसरोजं क्षेमकामाभजध्वम् ॥ १ ॥

गत्वा गुरुपदं रामकिशोरेणेष्टसिद्धिदम् ।
साधकानां मुदे मुद्राप्रकाशोऽयं विरच्यते ॥ २ ॥

अन्यत्रापि त्रिकोणाशनिमुद्रा स्यात्कनिष्ठाङ्गुष्ठयो गतं इति तन्त्रसारे दक्षिणा-निविडामुष्टिर्नासिकार्पिततर्जनी मुद्राविस्मयसंज्ञा स्याद्विस्मयावेशकारिणां मुष्टिरुद्धीकृतोऽङ्गुष्ठा दक्षिणानादमुद्रिका । + तस्माद्रामकिशोरईश्वर समाद्यो रुद्रनारायणात् । जातो युग्मशिरस्थिराधरध × रामानेशकाब्दे गते तेना सौत्रिपुरारिराजनगरे मुद्राप्रकाशः कृतः ॥

Colophon :

इति श्रीरामकिशोरशर्मविरचितमुद्राप्रकाशः समाप्तः ॥

133

Sl. No. 50380 **मुद्रालक्षणम्** **Ms. No. C. 2110-2**

Beginning :

अथ मुद्रालक्षणं डामरतन्त्रे —

करद्वयाङ्गुष्ठतर्जन्यग्रसंयोगे गालिनी मुद्रा । करद्वयस्या पृष्ठे संयोज्य कनिष्ठिकामवष्टभ्याधोङ्गुष्ठौ पुरतः पर्जन्यश्च संयोज्य मध्यमानामिकयोः कक्षयोः पक्षतुल्यत्वे गरुडमुद्रा ॥

End :

सूकरी करसंकोची हंसीमुक्तकनिष्ठिका ।
कनिष्ठा तर्जनींमुक्ता मृगीमुद्रा प्रकीर्तिता ।

केवलकनिष्ठिकारहिता उत्तानेन प्राणिना मुकुलाभेन सूकरी । मध्यमानामिकाङ्गुष्ठे योगेमृगीमुद्रा इति ।

Colophon :

इति मुद्रालक्षणम् ।

134

Sl No. 50381 मुद्राविधानम् Ms. No. P. 5002–78

Beginning :

श्रीदेव्युवाच —

भगवन् त्रिपुरामुद्राः सूचिता न प्रकाशिताः ।
कथं विरचनं तासां क्रियते वद शङ्कर ॥

ईश्वर उवाच —

शृणु देवि प्रवक्ष्यामि मुद्राः सर्वार्थसिद्धिदाः ।
यामिर्विरचिताभिस्तु सुमुखा त्रिपुरा भवेत् ॥

End :

एकाचैव महामुद्रा योनिमुद्रात्वमागता ।
तया विभक्त आत्मा संक्षोभो मे प्रभेदतः ॥
एवं ऋजुविमर्शिन्यासं प्रीत्या षोढशार्णवे ।
शिवानन्दपरामृष्टतृतीयपटलं गतम् ॥

श्रीपञ्चपदा गायत्री ॥ श्रीगुरुदेवतार्पणमस्तु ॥

Colophon :

॥ श्रीः श्रीः ॥

135

Sl. No. 50382 मुद्राविवरणम् Ms. No. P. 5002–77

Beginning :

अथ वक्ष्ये महेशानि मुद्रा विवरणं क्रमात् ।
वामहस्तेन मुष्टिं तु बद्धाकर्णप्रदेशके ॥

तर्जनीसरलिं कृत्वा भ्रामयन्ननुवित्तमः ।
सौभाग्यदण्डिनोमुद्रा न्यासकाले तु सूचिता ॥

End :

मध्यमे कुरु तन्मध्ये योजयेत्तदनन्तरम् ।
अन्योन्यानामिका देवि कनिष्ठे तु यथास्थिते ॥
अंगुंष्ठाभ्यां योजिताभ्यां योन्याकारं तु कारयेत् ।
योनिमुद्रेति सा ख्याता परा त्रैलोक्यमातृका ॥

Colophon :

॥ हरिः ओम् ॥

136

Sl. No. 50385 मूर्तिन्यासविधिः Ms. No. P. 5002–58

Beginning :

अथ मूर्तिन्यासमाह —

ओं ह्रीं श्रीं हसः सोहं अं केशवमूर्ति अक्षयाशक्तिभ्यां नमः शिरसि । आं आं नारायणमूर्ति आर्यशक्तिभ्यां मुखे । ओं इं माधववेष्टदा शक्तिभ्यां नमः ॥

End :

ओं ळं चतुराननललिताशक्तिभ्यां–ललाटे । ओं क्षं हिरण्य गर्भ क्षमाशक्तिभ्यां नमः शिरसि । समस्तमातृकामुच्चार्य । श्री मूर्त्यात्मिकायै श्रीवराम्बादेव्यै नमः इति सर्वाङ्गे व्यापकं विन्यसेत् ॥

Colophon :

॥ इति मूर्तिन्यासः ॥
— शिवम् —

137

Sl.No. 50388 **मूलदुर्गामन्त्रविधानम्** Ms.No. P. 8759-15

Beginning :

अथ मूलदुर्गाविधानं लिख्यते —

अस्य श्रीमूलदुर्गामन्त्रस्य श्रीनारदऋषिः । गायत्री छन्दः । मूलदुर्गा देवता । दुं बीजम् । ह्रीं शक्तिः । दुर्गायै कीलकम् । इष्टार्थे विनियोगः । ओं ह्रीं दुर्गायै ह्रां हृदयाय । ओं ह्रीं दुर्गायै श्रीं शिरः । +

End :

प्रयोगान्तरम् । अमुना कृताभिषेका ललना पुत्रमवाप द्विनितम् । प्रयोगान्तरम् । टवनात्तिलसर्षपैस्सहस्रद्वितयैराशुभर्वचगर्भरक्षा । तिलसर्षणौ पृथगेकैकसहस्रं जुहुयादिति भावः ।

Colophon :

इति मूलदुर्गाविधानम् ॥

138

Sl. No. 50393 **मृतसञ्जीविनीत्र्यम्बकमन्त्रविधिः** Ms. No. P. 5982-11

Beginning :

मृत्युञ्जयत्र्यम्बकमहादेवाय नमः । अथ मृतसञ्जीविनीत्र्यम्बकमन्त्रः कथ्यते । अस्य त्र्यम्बकमन्त्रस्य वसिष्ठ ऋषिः । मृत्युञ्जयत्र्यम्बकरुद्रो देवता । अनुष्टुप् छन्दः । देवदेव्यौ प्रणवो बीजं शक्तिः ॥

End :

स्नेहपूर्णेन मनसा पूर्वोक्तमार्गेण शरणं व्रजेत् ।

मृत्युञ्जयमहादेव त्राहिमां शरणागतम् ।
जन्ममृत्युजरारोगैर्पीडितैः कर्मबन्धनम् ।

तत्पीयूषरसापूरं पूरितान्तर्बहिस्तुनः ॥

Colophon :

इति त्र्यम्बकमन्त्रविधिः समाप्ता ।

139

Sl. No. 50394 मृत्युञ्जयकल्पः Ms. No. P. 8736-6

Beginning :

श्रृणु वक्ष्यामि देवेशि यन्त्रं सर्वार्थसाधकम् ।
मृत्युञ्जय महायन्त्रं सर्वमृत्युनिबर्हणम् ॥

End :

मम प्राणा इह प्राण मम जीव इह स्थितः । मम सर्वेन्द्रियाणि वाङ्मनश्चक्षु-स्तोत्रजिह्वाघ्राणः प्राणाः इहै वा मृत्युसु (?) संचिरं तिष्ठन्तु स्वाहा । अमृतं वै प्राणाः अमृतमापः प्राणानेव यथास्थानमुपतिष्ठते । ओं आं ह्रीं क्रौं यथाशक्ति जपं कृत्वा ॥

Colophon :

———

140

Sl. No. 50395 मृत्युञ्जयजपविधिः Ms. No. P. 6806-6

पाणिभ्यां मणिपूर्णरत्न चषकं रक्तोत्पलं बिभ्रतीं
 सौम्या रत्नघटस्फुरत्नचरणां ध्यायेत् परामम्बिकाम् ॥

श्रीमता—श्रियो लक्ष्म्याः माता । यद्वा मात्येव नामा श्रीशब्दस्तु आदरार्थः ॥

End :

महालावण्यशेवधिः । इमानि चत्वारिनामानि पुल्लिङ्गानि । तद्ब्रह्मपरंधाम साधुपरंज्योतिः । इमानिपञ्चनामानि नपुंसकानि । स्वाहा स्वधा । इदं नामद्वयं अव्ययम् । शेषाणि स्त्रीलिङ्गानि ।

Colophon :

इति श्रीपरमहंसपरिव्राट् श्रीमन्नृसिंहतीर्थकृतं ललितासहस्रनाम व्याख्यानं संपूर्णम् ।

240

Sl. No. 50741 वटयक्षिणीमन्त्रः Ms. No. P. 5746-13

Beginning :

अथातसम्प्रवक्ष्यामि लोकानुग्रहकाम्यया ।
शीघ्रसिद्धेः फलं नृणां शृणु पार्वति साधकः ॥

अस्य श्रीवटयक्षिणीमन्त्रस्य महारुद्रः ऋषिः । गायत्री छन्दः । वटयक्षिणी देवता । + + ध्यानम् —

शबरीहारसंयुक्तां सर्वाभरणभूषिताम् ।
वामहस्ते प्रकोष्ठे तु वारयन्तीति वासिकाम् ॥

End :

शङ्खमालिकया पश्चात् इन्धनैः करवीरकैः ।
घृताक्तैः विविधैः हेम च × × नी प्रतिवासरम् ॥
ददाति + × चकान्यं च मन्त्रतो यक्षिणी सदा ॥

Colophon :

———

241

Sl. No. 50742 वटमूलदक्षिणामूर्तिमन्त्रः Ms. No. P. 6379-4

Beginning :

अस्य श्रीवटमूलदक्षिणामूर्तिमन्त्रस्य शुकऋषिः । अनुष्टुप् छन्दः । दक्षिणामूर्तिरुद्रो देवता । + + + । ध्यानम् —

ततस्सुमेरुत × × पद्मासनसीनं मुद्रटङ्कमृगजानुविलसन्परं भुजङ्गमेखलं शुभ्रचन्द्रालङ्कीकृतं दक्षिणामूर्तिं ध्यायेत् ....

नानापुष्पवृक्षकमलाकरमृगपक्षिसेविते + + +

End :

मनुः —

॥ ओम् ॥ ह्रीं दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने । ध्यानैकनिरताङ्गाय नमो रुद्राय शम्भवे ॥ ह्रीं ओम् ॥

Colophon :

———

242

Sl. No. 50747 वटुकभैरवकवचम् Ms. No. B. 950-1

Beginning :

वटुकभैरवकवचप्रारम्भः

ईश्वरः उवाच —

भगवन् सर्ववेत्ता त्वं देवानां प्रीतिकारकम् ।
भैरवं कवचं ब्रूहि यदि वास्ति कृपामयि ॥
प्राणत्यागं करिष्यामि यदितो कथ ते विभो ।
सत्यं सत्यं पुनस्सत्यं सत्यमेव न संशयः ॥

End :

देयं पुत्राय शिष्याय शान्ताय प्रियवादिने ।
कार्याणि रहितायो च वटुकभक्तिरताय च ॥
यो दद्याद् विभक्तेभ्यः तस्य नश्यन्ति सत्वरम् ।
आयुर्विद्या यशोधर्मबलं चैव न संशयः ॥

Colophon :

इति श्रीकालीतन्त्रे हरगौरीसंवादे शिवविरचितं बटुकभैरवकवचं संपूर्णम् ।

243

Sl. No. 50752 वटुकभैरवकवचमन्त्रः Ms. No. C. 3494–16

Beginning :

अस्य श्री आपदुद्धारकवटुकभैरवमहामन्त्रस्य स्कन्दऋषिः । अनुष्टुप् छन्दः । श्रीआपदुद्धारकवटुकभैरवो देवता । ह्रं बीजम् । ऐं शक्तिः । आं कीलकम् । श्री आपदुद्धारकवटुकभैरवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

लमित्यादिपञ्चपूजा । ओं वं वटुकाय आपदुद्धरणाय कुरु कुरु वटुकाय ह्री स्वाहा इति जपः । आपदुद्धारकाय विद्महे वटुकत्रयाय धीमहि । तन्नो अष्ट-भैरवः प्रचोदयात् । न्यासध्यानं पूर्ववत् । गुह्येति च समर्पणम् ॥

Colophon :

॥ श्रीः ॥

244

Sl. No. 50754 वनदुर्गाकल्पः Ms. No. P. 4859

Beginning :

वनदुर्गामहामन्त्रस्य आरण्यक ऋषिः । अत्यनुष्टुप् छन्दः । वनदुर्गा

देवता । दुं बीजम् । स्वाहा शक्तिः । ब्रह्मबीजमित्यादि । वनदुर्गाप्रसाद-सिद्ध्यर्थे विनियोगः । शिवादि गुरुभ्यो नम इति शिरस्याञ्जलिं कृत्वा ।

End :

बं बीरणाय फट् नमः । धं धनुषे फट् नमः । शुं शूलाय फट् नमः । कं कपालाय फट् नमः । इति लिखेत् ।

Colophon :

इति गुहप्रोक्ते वमदुर्गाकल्पे द्वादशः पटलः ।

245

Sl. No. 50757 वनदुर्गामन्त्रः Ms. No. C. 2512–9

Beginning :

भव हे शुभध्वंसिनि संहरशु दुरितान् दुर्गे नमस्तेऽम्बिके । ओं दुं दुर्गायै नमः । ओं ऐं ह्रीं श्रीं ऐं क्लीं सौः ओं नमो भगवते तिरस्करणी महामाया सकलपशुजनमनश्चक्षुस्तिरस्करणं कुरु कुरु स्वाहा ।

End :

अनेन सूर्यमण्डलमध्यस्थभगवति मम हृदयकमलमध्यस्थिति श्रीमहाविद्यावन-दुर्गास्तोत्रपारायणं मया कृतजपं अहं निवेदयामि । श्रीगुरोरर्पणमस्तु ।

Colophon :

———

246

Sl. No. 50761 वनदुर्गामन्त्रः Ms. No. B. 686–1

Beginning :

अस्य श्रीवनदुर्गामहामन्त्रस्य ईश्वरऋषिः अनुष्टुप् छन्दः । अन्तर्यामिनारा-

यणकिरातरूपधरईश्वरो वनदुर्गाश्रमराम्बा देवता । हुं बीजम् । स्वाहा शक्तिः । ह्रीं कीलकम् । मम महावनदुर्गाप्रसाद—योगः । ओं उत्तिष्ठपुरुष ....

End :

पञ्चपूजा —

ओं उत्तिष्ठपुरुष किं स्वपिषि भयं मे समुपस्थितं यदि शल्यमशल्यं वा दुर्गे भगवति रामय स्वाहा । वनदुर्गाम्बार्पणमस्तु ॥ श्रीः ।

Colophon :

॥ श्रीः ॥

247

Sl. No. 50764 **वनदुर्गामहाविद्यास्तोत्रराजः** Ms. No. C. 576

Beginning :

हरिः ओं सहनाववतु —

अस्य श्री वनदुर्गामहाविद्यास्तोत्रमहामन्त्रस्य किरातरूपधरईश्वर ऋषिः । नानाविधानि छन्दांसि शक्तित्रयसमष्टिरूपिणी श्रीमहाकाली देवता .... लमित्यादिपञ्चपूजा .... ओं ह्रीं दुं उत्तिष्ठपुरुषि किं स्वपिषि भयं मे समुपस्थितं .... तन्मे भगवति शमय स्वाहा ।

End :

महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहिः तन्नो लक्ष्मीः प्रचोदयात् । .... स्वाहा । एनां गुरुमुखादनगम्यैव पठेत् श्रेयते । नान्यथेति श्रीशिव-शासनम् । पुस्तकलिखितान् मन्त्रान् .... श्वानो भविष्यति । इति षड्विद्यागमे ।

Colophon :

———

248

Sl. No. 50767 वनदुर्गास्तोत्रम् Ms. No. C. 2512–7

Beginning :

हरिः ओम् सहनाववतु + + शान्तिः शान्तिः शान्तिः ।

वनदुर्गे महादेवि विरूपाक्षि मनोहरे ।

विश्वेश्वरि नमस्तुभ्यं सर्वपीडां निकृन्तय ॥

अस्य श्रीमहाविद्यावनदुर्गास्तोत्रमन्त्रराजमहामन्त्रस्य अरण्यक ईश्वर ऋषिः । + वनदुर्गा तारकेश्वरी देवता । × ध्यानम् —

ह × × शङ्खचक्रपाणखेटबाणान् सधनुश्शूलकतर्जनी दधानां

मम ता × × × षोत्तमाङ्गसंस्थां वनदुर्गारुदशी स्त्रियैस्तु ।

End :

महादेव्यै च विद्महे + लक्ष्मीः प्रचोदयात् । ओं क्लीं ह्रीं + रक्ष रक्ष हु फट् स्वाहा । अव ब्रह्मद्विषो + + पा स्वाहा । सहनाववतु + शान्तिः । + निर्वाणमुद्रां प्रदर्श्य गुह्य × × श्लोकेन सर्व × × येति महाविद्यापारायण-विधिः । लेखकपाठकानां शुभं भवतु ।

Colophon :

———

249

Sl. No. 50771 वन्दनमहामन्त्रः Ms. No. P. 3591–29

Beginning :

अस्य श्रीवन्दनमहामन्त्रस्य सान्दीपिनी भगवान् ऋषिः । अनुष्टुप् छन्दः । परमात्मा देवता । वन्दने विनियोगः । + + ध्यानम् —

कृत्वा सन्ध्यामभिध्यायेन्नीलग्रीवां सुशोभनाम् ।
वरदाभयहस्तां तां त्रिणेत्रां चन्द्रशेखराम् ॥

End :

शङ्करार्धशरीराणि सर्वदेविनमोस्तुते ।
अहो मायामयीं बभ्रुरूपे दिव्यसन्ध्ये सरस्वति ॥
अजरे चामरे नित्ये ब्रह्मयोनि नमोस्तुते ॥

Colophon :

॥ श्रीः ॥

250

Sl. No. 50775 **वरदगणपतिकल्पः** **Ms.No. B. 1117-3**

Beginning :

प्रणवशक्तिबीजसम्पुटितेन मूलमन्त्रेण प्राणायामत्रयं कृत्वा । अस्य श्री अनुष्टुभो मन्त्रराज्यस्य भार्गव ऋषिः । अनुष्टुप् छन्दः । शिवोमायुतः परमात्मा वरदगणपतिर्देवता ।

End :

उद्धारस्याम क्षीरोदस्याम + + वर्णपदपादस्यान्नाब्यादौ प्रणवशक्तिबीजानां गानम् ।

सर्वत्र मन्त्रान्ते मिश्रिणं स्याम गायेत् । इति गान प्रकारः ।

अनन्तरं मूलमन्त्रं जपित्वा उत्तरन्यासं कृत्वा यस्य स्मृत्येति समर्पणम् ॥

Colophon :

———

251

Sl. No. 50779 वरिवस्यातिरहस्यम् Ms. No. B. 372

Beginning :

विद्यानाञ्च मनूनामनुसंख्यानां च विद्यानाम् ।
उपदेष्टा जयतितरां नरसिंहानन्दनाथ गुरुः ॥

वरिवस्यारहस्याख्यो ग्रन्थो यस्स्वेन निर्मितः ।
तत्र दुर्घटशब्दानाम संक्षिप्यर्थं कथ्यते ॥

End :

निजबुद्धिमात्रजन्या पापं कन्या यथा स्वया ।
अकथासनं हलक्षान्तरं समासाद्य मामकं ज्ञानम् ॥१०७॥

मामकमेव ज्ञानं मह्यं ददतो जयन्ति गुरुचरणाः ।
गुरुचरणैकसहायो भास्कररायो जगन्मातुः ॥१०८॥

वरिवस्यातिरहस्यं वीर नमस्यं व्रजग्रन्थम् ।

Colophon :

इति भास्कररायविरचितं वरिवस्यातिरहस्यं समाप्तिमगमत् ।

252

Sl. No. 50781 वरिवस्यारहस्यम् Ms. No. C. 2532-13

Beginning :

प्रह्लादाभीष्टदाने निबुधसमुदयः स्तूयमानापदाने
शेषक्षोणीभृदन्तः प्रविलसितपदाहोबलक्षेत्रगर्भात् ।
प्रादुर्भूते हिरण्यद्विरदमतिमदध्वान्ततन्त्रं निहन्तुं
धीरे सच्छास्त्रयोनौ मम भुवनगुरौ अस्तु भक्तिः नृसिंहे ॥ १ ॥

End :

अकथासनं हळक्षान्तरं समासाद्य मानकं ज्ञानम् ।
मामकमेवानन्दं मह्यं ददति जयन्ति गुरुचरणाः ॥१६४॥
गुरुचरणैकसहायो भास्कररायो जगन्मातुः ।
वरिवस्यातिरहस्यं वीरनमस्यं प्रज्ञग्रन्थ ॥१६५॥

Colophon :

इति श्रीमत्पदाक्यप्रमाणपारावारीण—सर्वतन्त्रस्वतन्त्रश्रीनृसिंहानन्दनाथचरणारविन्दमिलिन्देन । श्रीमद्गम्भीरराजभारतीदीक्षितात्मजेन भास्कररायापरानाम्ना भासुरानन्दनाथेन प्रणीतं वरिवस्यारहस्यं समाप्तिमगमत् ॥

253

Sl.No. 50787 वरिवस्यारहस्यव्याख्या Ms. No. B. 893-2

Beginning :

विद्यानां च मनूनां मनुसंख्यानां च विद्यानाम् ।
उपदेष्टा जयतितरां नरसिंहानन्दनाथगुरुः ॥
वरिवस्यारहस्याख्यो ग्रन्थोऽयं स्वेननिर्मितः ।
तत्र दुर्गटशब्दानां अर्थः संक्षिप्य कथ्यते ॥

End :

वीरैः अहमीरणाङ्गा श्शोळत —
इदमो वैरिणो नाशं कुर्वाणं परा पञ्चाशिकादौ सिद्धैः इति सर्वमनवद्यम् ॥
वस्तुप्रस्तुत — — वास्तोष्पतिप्रस्तुतम् ॥ १७१ ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणसर्वतन्त्रस्वतन्त्रश्रीनृसिंहानन्दनाथ चरणारविन्दमिलिन्देन श्रीद्गम्भीरराय भारतीदीक्षितात्मजेन भास्कररायपरनाम्ना भासुरानन्दनाथेन प्रणीतं वरिवस्यारहस्यं सव्याख्यं समाप्तम् ।

254

Sl. No. 50799 वशीकरणमन्त्रः Ms. No. B. 674

Beginning :

देशकालौ सङ्कीर्त्य श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं अमुकशर्मण: यजमानस्य मम वशवर्तितसम्पादनार्थं श्रीमहागणपतिप्रीत्यर्थं वशीकरणमन्त्रजपाख्यं कर्म करिष्ये ।

End :

मूलमन्त्रः ॥ ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद अमुकशर्माणं मे वरा वरामानय स्वाहा । एवं जपं कृत्वा वशीकरणं भवति । अनेन यथा ज्ञानेन मय कृत जपेन तेन श्रीमहागणपति: प्रीयतां नमम । श्री महागणपतिः प्रसन्नोऽस्तु ।

Colophon :

॥ शुभं भवतु ॥

॥ इति समाप्तः ॥

255

Sl. No. 50803 वशीकरणवाराहीमन्त्रः Ms. No. C. 2552-2

Beginning :

अस्य श्री वशीकरणवाराहीमहामन्त्रस्य । आ + ऋषिः । गायत्री छन्दः । शिवश्याकर्षणवाराही देवता । क्लीं बीजम् । हां शक्तिः । श्रीं कीलकम् । मम मनोभिलषितकामना सिध्यर्थे वश्याकर्षणार्थे जपे विनियोगः ।

End :

ओं नमो भगवती वीरहनुमन्ताय रुद्रबीजरेम्रेवताराय श्री रामदूताय × × वीरपराक्रमहस्तालसुकी कुशापहारुद्रबीजराद्रोद्भव ओं फट् चिं ह्रां प्रां हुं फट् स्वाहा ।

Colophon :

॥ श्रीः ॥

256

Sl. No. 50806 वशीकरणसुदर्शनमन्त्रः Ms. No. P. 4268--12

Beginning :

अस्य श्रीवशीकरणसुदर्शनमन्त्रस्य । अहिर्बुध्न्य ऋषिः । गायत्री छन्दः । वशीकरणचक्रराजो देवता । क्लीं बीजम् । ह्रीं शक्तिः । क्रीं कीलकम् । मम वशीकरणप्रयोगसिद्ध्यर्थे जपे विनियोगः ।

End :

रक्तवस्त्रधरं देवं रक्तमाल्यालेपनम् ।

वन्देऽहं चक्रबाणाय चक्राजायते नमः × × × पञ्चपूजा । अथ मनुः ओम् आम् सां सीं सूं सें सै सौ सः । क्रों क्लीं ह्रीं क्लीं आम् सां सीं सूं सें सैं सौं सः क्रों । क्रों ओं हुं फट् पुनः हृदयादिन्यासः इति दिग्विमोकः ।

पुनः ध्यानम् । पुनः पञ्चपूजा ।

Colophon :

———

257

Sl. No. 50813 वश्याकर्षणप्रयोगः Ms. No. P. 4252–20

Beginning :

श्री शिवः—वामदेवऋषिः । जगती छन्दः । कालाग्निरुद्रो देवता । खं

बीजम् । स्वाहा शक्तिः । अथवा अस्य श्री शरभसाळ्वपक्षिराजमहामन्त्रस्य कालग्निरुद्रो देवता । भगवान् ऋषिः । जगति छन्दः । शरभेश्वरो देवता ।

End :

आकर्षणे विशेषज्ञः स साध्यः तस्य सिद्धये ।
राजचोरारिनारीणां देवतानां विशेषतः ॥

चेतनाचेतनानां च भूतप्रेतगणस्य च ।
तस्य शीघ्रं भवेद्देवि सर्वाकर्षणमद्भुतम् ॥

Colophon :

इति वश्याकर्षणप्रयोगः ॥

258

Sl. No. 50815 **वश्याकर्षणसुदर्शनमन्त्रः** **Ms. No. P. 4868-38**

Beginning :

अस्य श्री वश्याकर्षणमन्त्रस्य । अहिर्बुध्न्य ऋषिः पंक्तिश्छन्दः । वश्याकर्षण सुदर्शनो देवता । क्लीं बीजम् । ह्रूं शक्तिः । क्रीं कीलकम् । मम वश्याकर्षण-प्र .... योगः ।

End :

चक्रराजनमस्तेऽस्तु सर्वाकर्षणसायक ।
आकर्षय जगन्नाथ शरणं त्वां गतोऽस्म्यहम् ॥

पञ्चपूजा । मनुः ओं आं ह्रीं क्ली क्रीं ह्रूं ह्रां ओं — — — साध्यं वश्याकर्षय स्वाहा । पुनः ऋष्यादिन्यासध्यानं कुर्यात् ।

Colophon :

———

259

Sl. No. 50818 वसिष्ठसंहिता Ms. No. P. 5133-1

Beginning :

वागीशायाः–तं नयामि राजाननम् ।
मनुर्बृधस्पतिर्दक्षः गौतमोऽथयमोऽङ्गिराः ।
योगीश्वरः प्रचेताश्च शातातपपराशरौ ।
ऐतैर्यानि प्रणीतानि धर्मशास्त्राणि वैपुरा ।
तान्येतानि प्रमाणानि न हन्तव्यानि हेतुभिः ॥

End :

त्रिवारं दशवारं वा पञ्चमन्त्राणि सो जपेत् ।
बीजादीन् नववेद्योवै पादविप्रः स एव हि ॥
इत्येतद्विष्णुनाप्रोक्तं सत्यमेतन्महामुने ।
सदाब्राह्मण्यरक्षावै द्विजानां मुक्तहेतवे ॥

Colophon :

इति वसिष्ठसंहितायां ब्रह्मविद्योपदेशे वसिष्ठपराशरसंवादे षट्चत्वारिंशोऽध्यायः ।

260

Sl. No. 50820 वाक्स्तम्भनमन्त्रः Ms. No. C. 2727-2

Beginning :

ओं नमो भगवते बृहस्पते ब्रह्मसभायां राजसभायां प्रज्ञावन्तं कुरु कुरु कुशलं कुरु कुरु क्षेमं कुरु कुरु ।

End :

सर्ववादिनां जिह्वास्तम्भनं कुरु कुरु हुं फट् स्वाहा । ग्रहणं नाडु अयिनन्तां जपं चेशेदि ।

Colophon :

261

Sl. No. 50823 वागीश्वरीमन्त्रः Ms. No. P. 5657-25

Beginning :

अस्य श्री नकुलीवाग्वादिनीमन्त्रस्य । महाचमस ऋषिः । अनुष्टुप् छन्दः । मुखे । परवादिवाग्जिह्वायुक्तिगतिनेत्रधृतिबन्धिनी स्वसेवकस्य प्रसिद्धवागीश्वरी-नकुलीवाग्वादिनी देवता ।

End :

पादाश्च वेदाश्चत्वारो रविचन्द्राग्नयो दिशः ।
अङ्गानि विद्यास्थानानि पुच्छरोमाणि देवताः ॥

नकुलीं रक्तवर्णां तां नौमि व्याप्तां सरस्वतीम् । येत् दुं दुर्गी जय स्वाहा । वद वद वाग्वादिनी स्वाहा ॥

Colophon :

262

Sl. No. 50826 वागीश्वरीव्रतकल्पः Ms. No. P. 2511

Beginning :

प्रणवासनसंरूढां तदर्धत्वेन निश्चिताम् ।
अङ्कुशं चाक्षसूत्रं च पाशपुस्तकधारिणीम् ।
मुक्ताहाराममायुक्तां मोदरूपां मनोहराम् ।
सितेन दर्पणाभेन वस्त्रेण परिशोभिताम् ॥

End :

गुरूणामुपदेशेन विनाऽप्यखिलवेदिनः ।
व्याकुर्वन्त्यखिलाविद्या वागीश्वर्यः कृपावना ॥

याकुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रान्विता .... सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ।

Colophon :

इति भविष्योत्तरपुराणे वागीश्वरीव्रतकल्पः संपूर्णः ॥

263

Sl. No. 50840 वामकेश्वरतन्त्रम् Ms. No. P. 8715–1
(श्रीविद्याचतुरसीतिदर्पणभागः)

Beginning :

जपविधानम् । श्रीदेव्युवाच —

सर्वमेतत्त्वया प्रोक्तं त्रिपुराज्ञानमुत्तमम् ।
कामतत्त्वविधिर्ज्ञानं मोक्षतत्त्वपदावधि ॥

इदानीं जपहोमोऽयं विधानं वद शङ्कर ।
येनानुष्ठितमात्रेण मन्दभाग्योऽपि सिध्यति ॥

End :

रचनं बाह्यं अन्तरं ज्ञानमिति । तदुभयगोचरं ज्ञानमिति । वदेत्यादि इदानीं मूलदेव्याः एकैकाक्षरसाधनमेकैकबीजसाधनं वदेदित्यर्थः । महाज्ञानप्रभावमिति ॥ महाच्च जानन्ति महाज्ञानम् । तस्य तच्च प्रभावं विमर्शरूप. तत्र किमुक्तं भवति । प्रकाशविमर्शरूपौ शिवशक्तिवर्णावकारहकारोपलक्षिता महाज्ञानं तत् । प्रभावोपदिश्यते —

Colophon :

इति श्रीवामकेश्वरशास्त्रे श्रीविद्याचतुरसीतिदर्पणे तृतीयः पटलः ।

264

Sl. No. 50849 वाराहपरमेश्वरीमन्त्रः Ms. No. C. 3524–1

Beginning :

ओं नमो भगवति वाराहपरमेश्वरि । दशभुजे । ब्रह्मकपालमालालङ्कारस्वरूपिणि । रुद्राज्ञापरिपालिनि । शत्रुवाक्स्तम्भिनी । आनन्दसिद्धेश्वरी ।

End :

श्रीमन्त्रं नवकोटिरससिद्धलु चेप्पिन मन्त्रम् । श्रीमन्त्रनिकाय ऊरु मन्त्रालु लेदु । ओं कालि महाकालि मलयालभगवतिं पीडितग्रहानाकर्षिणारं नाना हुं फट् स्वाहा ।

Colophon :

———

265

Sl. No. 50854 वाराहीमहामन्त्रः Ms. No. C. 4686–50

Beginning :

ओं अस्य श्री वाराहीमहामन्त्रस्य । भूवराह ऋषीः । अमृतविराट् छन्दः । श्रीवाराह्याम्बा देवता । ओं ऐं गौं बीजम् । स्वाहेति शक्तिः । सौः कीलकम् । वाराह्याम्बाप्रसादसिध्यर्थे जपे विनियोगः ।

End :

जम्भे जंभिने नमः । स्तम्भे स्तंभिने नमः । सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्चित्तचक्षुगतिजिंहास्तम्भं कुरु कुरु । मम सर्वजनवश्यं कुरु कुरु । ओं गें ग्लौं हव उदं हुं फट् स्वाहा ।

Colophon :

॥ श्रीः ॥

266

Sl. No. 50857 वाराहीवश्ययन्त्रः Ms. No. P. 3091-45

Beginning :

प्रथमं वर्तुलं लिख्य तदन्ते निपुरं लिखेत् ।
अष्टकोणं तदग्रे तु तदग्रे वर्तुलं लिखेत् ॥
पत्रिंशोपत्रमालिख्य तत्र तद्बहिरेव हि ।

End :

वश्यबीजं दशाङ्गं च लिखेदेदं क्रमादिति ।
क्षी ना (?) × × मशुक्रबीजस्य साध्यनामेति निश्चितम् ॥

Colophon :

वाराहीवश्ययन्त्रस्समाप्तः । द्वात्रिंशच्छैवदीक्षायां तृतीयोऽध्यायः ॥

267

Sl. No. 50862 वासुदेवद्वादशाक्षरमन्त्रः Ms. No. P. 10535-9

Beginning :

ओं नमो भगवते वासुदेवायेति प्राणायामः । ओं ओं + वामशिरसि + + ओं नमो भगवते वासुदेवाय अस्त्राय फट् । अस्य श्रीद्वादशाक्षरमन्त्रस्य अन्तर्यामी ऋषिः । + श्रीवासुदेवप्रीत्यर्थे जपे विनियोगः ।

End :

ध्यानम्—

अच्छवर्णोभयवरकरो ध्येयोऽमितद्युतिः । लक्ष्मीनिश्शेषशक्तिमान् इति ध्यात्वा + + श्रीवासुदेवद्वादशाक्षरमन्त्रजपं करिष्ये । ओं नमो भगवते वासुदेवाय इति जपः उपसंहारः पूर्ववत् ।

Colophon :

———

268

Sl. No. 50869 वासुदेवमन्त्रजपविधिः Ms. No. C. 1076–4

Beginning :

गुरुनमस्कारा: 'वासुदेवाय नमः' मन्त्रेण प्राणायामः ओं हृदयाय नमः । नमः शिरसे स्वाहा । भगवते शिखायै वौषट् । वासुदेवाय कवचाय हुम् । ओं नमो भगवते वासुदेवाय अस्त्राय फट् । एवं करन्यासः ।

End :

वासुदेवप्रेरणाया वासुदेवप्रीत्यर्थं वासुदेवमन्त्रजपं करिष्ये । ओं नमो भगवते वासुदेवाय ओं शेषं पूर्ववत् । ओं नमो भगवते वासुदेवाय वासुदेवं तर्पयामि ।

Colophon :

———

269

Sl. No. 50871 वासुदेवमहामन्त्रः Ms. No. P. 4525–20

Beginning :

अस्य श्रीवासुदेवमहामन्त्रस्य भार्गव ऋषये नमः । गायत्र्यै छन्दसे नमः । वासुदेवाय देवतायै नमः ।

End :

व्याख्यामुद्रां दधानं तदितरकरे पुस्तकं सन्दधानं
व्याकुर्वाणं मुनिभ्यो भृगुशिवसनकात्रेयमुख्येभ्य एकम् ।
तत्वं वेदान्तवेद्यं शिवतममधुरं तत्वरीकृत्य जीवान्या-
मादिष्वत्र कर्म स्वधिकृतधिषणा चिन्तयाम्यन्तरङ्गे ॥

ओं नमो वासुदेवाय इति मनुः । उत्तरन्यासादिकं पूर्ववत् ॥

Colophon :

———

270

Sl. No. 50877 विज्ञानभैरवम् Ms. No. B. 126–5

Beginning :

देयुवाच —

श्रुतं देव मया सर्वं रुद्रकामल सम्भवम् ।
त्रिकभेदमशेषेण सारात्सारं विभागशः ॥

श्रीभैरव उवाच —

साधु साधु त्वया दृष्टं तन्त्रसारमिदं प्रिये ।
गुह्याद्गुह्यतमं भद्रे तथापि कथयामि ते ॥

End :

देवदेव महादेव परितृप्तोऽस्मि शङ्करः ।
रुद्रयामालतन्त्रस्य सारमध्यावधारितम् ॥
सर्वत्र शक्तिभेदानां हृदयं ज्ञातमध्य वै ।
इत्युक्त्वा नन्दिता देवी कर्णे लग्नाशिरस्य तु ॥

Coloyhon :

इति विज्ञानभैरवं संपूर्णम् ॥

271

Sl. No. 50878 विज्ञानभैरवव्याख्या Ms. No. B. 126–2

Beginning :

शिष्यमस्तकनिरन्तरस्थितश्रि-
त्सुखामृतपयोधितारणम् ।

श्रीगुरोररुणपादपङ्कजं
सेवतासिकुलसङ्कुलं भजे ॥ १ ॥

....

संविदे विपश्यतादिपदे प्रबुभुत्सुरस्परितस्फुरा भट्टारिकैत्या चक्रसद्रहस्यमुवचा ममर्श । तत उच्यते ॥

श्रीदेव्युवाच —

एवं प्रबुध्या सती नैराकांक्ष्यात् बिभ्रीयात्
सर्वमिति निरक्तरपदभैरवरूपाहमेवोवाचेति ॥

श्रीदेव्युवाच — श्रुतं देवेत्यादि ।

End :

अभिनवगुरुवाणी सम्मघूनां सुपूर्णां
परिणतिमसमां स्वां क्षीरमूचे विमृज्य ।
विकसितमसमानश्रीः श्रीमदुच्चोत्पलाभां
परिमलमतिसारव्याकरोच्छास्त्रमेतत् ॥

Colophon :

विज्ञानभैरवः संपूर्णः ॥

272

Sl. No. 50880 **विद्यागणपतिमन्त्रः** **Ms. No. C. 1435-1**

Beginning :

अस्य श्रीविद्यागणपतिमन्त्रस्य । दक्षिणामूर्ति ऋषिः । दैवी गायत्री छन्दः । श्री विद्यागणपतिर्देवता । ओं बीजम् । श्रीं शक्तिः । ह्री कीलकम् । अभीष्टसिद्ध्यर्थे जपे विनियोगः ।

End :

धवलनलिनराजश्च मध्ये निषण्णं
स्वकरललितपाशं साभयं साङ्कुशं च ।
सवरदममलेन्दुं क्षीरवर्णत्रिनेत्रं
प्रणमत शुभवस्त्रं मंक्षुसंवादन्यम् ॥

स्फुटितम् —

निशान्ते तु प्रतिदिनं चतुर्वारं पठेद्यदि ।
सर्वैश्वर्यं भवेत् सर्वं पादपाठफलं लभेत् ॥

Colophon :

———

273

Sl. No. 50882 विद्यागोपालमन्त्रः Ms. No. P. 10053–33

Beginning :

विद्यागोपालमन्त्रो लिख्यते —

श्रीनारद ऋषिः । अनुष्टुप् छन्दः । श्रीकृष्णो देवता । मन्त्रेण व्यस्तेन समस्तेन च पञ्चाङ्गिनी । ध्यानम् — + = +

End :

मन्त्रः —

कृष्ण कृष्ण महाकृष्ण सर्वज्ञत्वं प्रसीद मे ।
रमारमणविश्वेश विद्यामाशुप्रयच्छ मे ॥ इति मन्त्रः ।

Colophon :

———

274

Sl. No. 50884 विद्यादीपिका Ms. No. B. 340

Beginning :

इह खलु भगवान् सकलविद्यानिधिर्बहुविधशाखामय ऋग्यजुस्सामवेदमूर्ति अपरिच्छिन्नविच्छित्तिकलासमावेशितत्तरङ्गितहृदयो हयग्रीवरूपी महाविष्णु-स्सर्वज्ञानतपोनिधये परसच्चिदानन्दाय चिच्छक्तिस्वरूपं पृष्टवते अगस्त्याय महामुनये ....

End :

अत एव सकलपुरुषावाप्तिपूर्वकालात्मकज्ञानजनकत्वेन जीवब्रह्मसमरसमोक्षसाधनी ।

हयग्रीवाल्लब्ध्वा सकलमिदमाद्यं मनुवरं
कृता टीका तस्य प्रथितमहिमागस्त्यमुनिना ।
कलातत्त्वोद्भासिन्यपरिमितभाग्योदयकरी
त्रयी सारादुद्धृत्य सदुपकाराय सुधिया ॥

Colophon :

इति श्रीपरमशिवापररूप श्रीमदगस्त्यमहर्षिणा विरचिता श्रुतिसारसमुद्धृत-विद्यादीपिका समाप्ता ।

275

Sl. No. 50885 विद्यानुशासनम् Ms. No. A. 817

Beginning :

मन्त्रस्येह यमाहुराद्यवयवं निस्तीर्णविद्यार्णवाः
प्रोक्तं येन शुभं च कर्मनिखिलं कर्माशुभं चाखिलम् ।
शक्तिर्यस्य सुविस्मयैकनिकलया संप्राप्तसौख्योदयी
विद्यानामधिदेवता स भवतान्नः सिद्धये सन्मतिः ॥ १ ॥

End :

यावज्जैनपदद्वयं भवभृतामुच्चाटयत्यापदो
यावद्भव्यजनस्तनोति निपुणः सिद्ध्यङ्गनाकर्षणम् ।
तावत्सद्रुचिशास्त्ररत्नममलं स्थेयादिदं मन्त्रिणां
गम्भीरे मतिसागरे पृथुतरे विद्यासरित्सङ्गते ॥

Colophon :

इत्यार्षे विद्यानुशासने नर्मविधानं नाम चतुर्विंशः समुद्देशः । समाप्तोऽयं ग्रन्थः ।

276

Sl. No. 50886 विद्याभेदविवरणम् Ms. No. C. 2111–3

Beginning

वामकेश्वरतन्त्रे —

संस्थितात्र महाचक्रे महात्रिपुरसुन्दरी ।
श्रृणुदेवि यथा सूत पूज्यते साधकोत्तमैः ॥
वर्गानुक्रमयोगेन देवताष्टकसंयुताः ।
अवर्गाः प्रथमोदेवि वशिनी तत्र देवता ॥

End :

अथ तुर्यप्रकारस्तु कथ्यते भुवि दुर्लभः ।
द्वितीयस्याद्ययुग्मं तु विपरीतं लिखेत् सुधीः ॥
कुलाम्बान्तर्मुखं कृत्वा विलिखेत्तु ततः परम् ।
एतत्सम्पुटितां कुर्यात् तृतीयां परमेश्वरि ॥

Colophon :

इति संहितोक्तविद्याभेदः ।

277

Sl. No. 50894 विभूतिमन्त्रः Ms. No. P. 3835-6

Beginning :

ओं नमो भगवते शीतलनाथाय शीतळभट्टारकाय अनन्तचतुष्टयस्वरूपाय घाति-कर्मनिर्मूलनोच्छेदनकराय जातिजरामरणविनाशनाय समस्तजीवसन्तापनिवारणाय ....

End :

आर्तवभूतप्रेतपिशाचज्वरविनाशनाय सर्वत्राहुसर्वभगन्धरविनाशनाय हं ढं रुं रिरां क्षीं हंस स्वाहा ।

Colophon :

278

Sl. No. 50899 विरूपाक्षपञ्चाशिका Ms. No. P. 7982-56

Beginning :

श्री अमृतानन्द .... नमः ॥
नमो विश्वशरीराय विश्वेकात्मावभासिने ।
नित्यप्रत्यवमर्शाय शम्भवे विश्वसिद्धये ॥ १ ॥
गन्धगजसमररसिकाय ....
.... विरूपज्ञः ॥ २ ॥

End :

इति बोधित इन्द्रो देवेष्वधिकारीमलमपास्य स्वम् ।
अविष्टशक्तितत्त्वः शिववदपश्यत् स्वमात्मानम् ॥ ५३ ॥

Colophon :

इति श्री विरूपाक्षपञ्चाशिका समाप्ता ।

279

Sl. No. 50901 विवेकसिन्धुः Ms. No. C. 466-1

Beginning :

ओम् शिवादिगुरुभ्यो नमः । त्रिपुरानाथस्मरणे हरहरमहादेव ।

श्रीहरं जगदाधारं संविधाक्षरमव्ययम् ।
अभिवन्द्यात्मविज्ञानोपदेशविधिरुच्यते ॥

श्रीमुद्गलसमाख्यस्य पितुः पादाम्बुजद्वयम् ।
नत्वा तनोतिगोपालः विवेकामृतमादरात् ॥

End :

तापत्रयातप्ततनुर्विवेकसिन्धुं विगाह्यैवजहातिपापम् ।
इदं विवेकामृतमाहुपीतं विमुक्तसोपानपरम्परापदम् ॥

Colophon :

इति श्रीमद्विवेकसिन्धौ संहारक्रमे गुरुशिष्यसंवादे श्रीगुरुमाहात्म्यकथनं नाम उत्तरार्धे एकादशप्रकरणं समाप्तम् ॥

280

Sl. No. 50902 विशालाक्षीमन्त्रः Ms. No. C. 2093-8

Beginning :

विशालाक्षीमन्त्रमाटा—ध्रुवेति ध्रुवं ओंकारमाध्यम् । मायाबीजं ह्रीं विशालाक्षीस्वरूपं + + +

विशालाक्षीमन्त्रः यामले ईश्वर उवाच --

ध्रुवमाद्यं समुद्धृत्य मायाबीजं समुद्धरेत् ।
विशालाक्षीपदंङेते हृदयान्तं मन्त्रमुद्धरेत् ॥

End :

एताः पूज्या महेशानि पत्रायोरष्टयोगिनि ।
पश्चमादि क्रमेणैव चाष्टसिद्धिस्वरूपिणि ॥
चतुरस्रो महादेवि लोकपालान् समर्चयेत् ।
तद्बहिश्चव × द्यान् पूजयेद्भाग्यं हेतये ॥
यथाशक्तिततो जप्त्वा पूर्ववच्छेषमाचरेत् ।

Colophon :

॥ श्रीः ॥

281

Sl. No. 50903 विश्वभ्रमरिकादुर्गामन्त्रः Ms. No. C. 548-19

Beginning :

अथ वक्ष्ये महामन्त्रं शाबरं देवसंज्ञितम् ।
विश्वभ्रमरिकानाम्नि विकृतं होमनं मनुः ॥
ओं आं ह्रीं सौं ग्लां श्रीं क्रौं प्रेह्येहि । भ्रमराम्बायै । मोहय । मोहय ।

End :

भक्षणीयं प्रयत्नेन मोहनं द्रावशे भवेत् ।
मन्त्रितं चैव तिलकं कृत्या वद्दर्शनेन × × ॥
स्त्रीणां वा पुरुषं वापि दर्शनातिलकेशवा ।
मोहनं गुह्यते लोके अत्याश्चर्यकरं तथा ॥

Colophon :

इति श्री अथर्वणतन्त्रखण्डे देवशाबरे विश्वभ्रमरिकादेवतामन्त्रन्यासध्यानं संपूर्णम् ।

282

Sl. No. 50905 विश्वामित्रकल्पः Ms. No. C. 4327

Beginning :

विश्वामित्रगायत्रीकल्पः—अथ नित्यविधानम् —

प्रातरुत्थाय कर्तव्यं द्विजेन च दिने दिने ।
तदहं संप्रवक्ष्यामि द्विजानामुपकारकम् ॥ १ ॥
उदयास्तमयं यावन् द्विजस्सत्कर्मकृद्भवेत् ।
नित्यनैमित्तिकैर्युक्तः काम्यैश्चान्यैरगर्हितैः ॥ २ ॥

End :

जपाद्दशांशतो होमः तद्दशांशेन तर्पणम् ।
मःर्जनं तद्दशांशेन भोजनं + + + भोजनम् ।

इति पञ्चाङ्गप्रकारः ।

अङ्गहीनादिकं कर्म जपो द्विगुणमुच्यते ।
तर्पणं मार्जनं चैव भोजनं च चतुर्गुणम् ॥

Colophon :

इति श्रीविश्वामित्रकल्पे नित्यनैमित्तिकादिगायत्रीपुरश्चरणविधानं समाप्तम् ।

283

Sl. No. 50906 विश्वामित्रकल्पः Ms. No. C. 4720-46

Beginning :

श्रीगणेशाय ममः. । अथ विश्वामित्रकल्पः ।

स्वगुरुं पूजयेदेवं उपचारैस्तु पञ्चकैः ।
भक्तिश्रद्धानुसारेण विश्वामित्रं च कल्पयेत् ॥ १ ॥
अस्य मन्त्रस्य हंसस्य प्राणायाम × रुन्धयेम् ॥

End :

शूलायदाशमावर्णे सवितुर्मण्डलं भवेत् ।
पराजिता प्रभाविन्यै पार्वती दुर्गम × × ॥ ३० ॥
दशावर्णानि गायत्रि नमो त × णवोद्धरेत् ॥ ३१ ॥
ध्यानमुद्राषडङ्गानि जपादौ दर्शयेत्तथा ।
जायते दर्शनये × मद्रा × ये दक्ष × दरात् ॥ ३२ ॥

Colophon :

इति विश्वामित्रकल्पः समाप्तः ॥

284

Sl. No. 50909 विश्वामित्रशापविमोचनमन्त्रः Ms. No. P. 5056-5

Beginning :

अथ विश्वामित्रशापविमोचनमन्त्रस्य विश्वामित्र ऋषिः । कामदुधा देवता ।
भगवन् सर्वदेवेश सर्वभूतहिते रत ।
त्वत्तः श्रुता मया कोटिभेदाः पूर्वं हनूमतः ॥
वक्तुमर्हसि देवेश सर्वकामार्थसिद्धये ॥
महादेव उवाच
मन्त्रोद्धारं प्रवक्ष्यामि मन्त्रमाहात्म्यमेव च ।
मन्त्रसंग्रहणेनैव श्रूयतां कमलेक्षण ॥

End :

ध्यायेयं वायुपुत्रं सकलगुणयुतं रामदूतं नमामि । + + निशाष्टक महाराज पश्यन्

व्रज मोहसं × × न शत्रूच्चाटन जलधिवञ्चन फट् स्वाहा मु × × कमलवासिनि सर्वजनमोहिनि स्वाहा ॥

Colophon :

————

285

Sl.No. 50912 — विश्वामित्रसंहिता — Ms. No. P. 20-1

Beginning :

अजस्रमथनिष्पन्दलहरीललितालके ।
कबलीकृतविघ्नाय पुराणध्वरिणे नमः ॥

ताम्बूलेऽङ्कुरितां सूक्ष्मां नाभीपल्लवितां पराम् ।
हृदि कोरकितां वाणीं वक्त्रेकुसुमितां नुमः ॥

\+ + + + +

भक्तिश्रद्धानुसारेण विश्वामित्रस्त्वकल्पयत् ।

End :

ऋक्सामानि स्वगृह्योक्तमाश्वलायनविभाषतः ।
जपान्ते सूर्यमालोक्य सौरपञ्चार्चनं यजेत् ॥ १६ ॥

Colophon :

इति श्रीविश्वामित्रसंहितायां उपस्थानविधियोगो नाम नवमोऽध्यायः ॥

286

Sl. No. 50913 — विषनाशनमन्त्रः — Ms. No. P. 10706-25

Beginning :

ओं नमो भगवते रुद्राय पक्षिराजाय सर्वनागप्रमर्दनं हन हन सर्वविषं नाशय नाशय स्वाहा ।

End :

महागरुड राक्षसं विषं छिन्दि छिन्दि दुष्टराक्षसं विषं छिन्दि छिन्दि आवेशयावेशय स्तोभय स्तोभय नाशाय नाशय हुं फट् स्वाहा ।

Colophon :

———

287

Sl. No. 50916 विष्णुकवचम् Ms. No. P. 2064-1

Beginning :

हरिश्चन्द्रः —

ब्रह्मन् श्रीविष्णुकवचं रहस्यं श्रुतिगोपितम् ।
केनोक्तं को मुनिश्छन्दः दैवतं किं महामुने ॥

अगस्त्यः —

हरिश्चन्द्र प्रवक्ष्यामि सावधानमनाः शृणु ।
श्रीविष्णुकवचं दिव्यं रहस्यं सर्वगोपितम् ॥

End :

इदं श्रीविष्णुकवचं सर्वाभीष्टार्थदायकम् ।
सर्वरोगप्रशमनं सर्वशत्रुप्रणाशनम् ।
एवं जजाप तत्काले आत्मरक्षाकरं परम् ।
त्रिसन्ध्यं यः पठेत् शुद्धः सर्वत्रविजयीभवेत् ॥

Colophon :

॥ श्रीः श्रीः श्रीः ॥

288

Sl. No. 50919 विष्णुयामलम् Ms. No. P. 6835

Beginning :

अथातः संप्रवक्ष्यामि दानं हरिहराभिधम् ।
ज्ञानविज्ञानदं नृणां अज्ञानतिमिरापहम् ॥
दुर्ज्ञेयमपि यद्दानात् ज्ञातं सद्यो भविष्यति ।
तस्मात् ज्ञानादिभिर्मर्त्यैरेतत्कर्तव्यमञ्जसा ॥

End :

इन्द्रादिभिर्विबुधश्चैव स्तूयमानो महर्षिभिः ।
सनकादिमुनीन्द्रैश्च मधुरं भाषयन् गिरः ॥
पन्थानं मनमागम्या सर्वतापविवर्जितम् ।
सर्वगन्धमयो भूत्वा सुनाघैस्सहमोदते ॥

Colophon :

इति श्रीमद्विष्णुयामळे सकलसौभाग्यकरलक्ष्मीप्रीतिकरसुवर्णपुष्पदानविधिः ।

289

Sl. No. 50925 विष्णुषडक्षरीमन्त्रविधिः Ms. No. P. 9529-8

Beginning :

अस्य श्रीविष्णुषडक्षरीमहामन्त्रस्य । ब्रह्मा ऋषिः । देवी गायत्री छन्दः । श्रीमहाविष्णुर्देवता । ओं बीजम् । नमः शक्तिः । श्रीं कीलकम् । श्रीविष्णुप्रीत्यर्थे जपे विनियोगः ।

End :

सशङ्खचक्रं सकिरीटकुण्डलं
सपीतवस्त्रं सरसीरुहेक्षणम् ।

सहारवक्षःस्थलशोभोभिकौस्तुभं
नमामि विष्णुं शिरसा चतुर्भुजम् ।
इति ध्यात्वा यथाशक्ति मन्त्रं जपेत् ।

Colophon :

॥ हरिओम् ॥

290

Sl. No. 50926 विष्वक्सेनमन्त्रः Ms. No. P. 827–28

Beginning :

विष्वक्सेनमन्त्रस्य । नित्यसूरिविश्व ऋषिः । अनुष्टुप् छन्दः । विष्वक्सेनो देवता । + + + अदर्शनदर्शने विनियोगः ।

End :

वन्दे वेकुण्ठसेनान्यं सूत्रवत्या समन्वितम् ।
यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितम् ॥
इति वा ध्यानम् । मन्त्रं च ध्यानं च एतत्स्वरूपम् ।

Colophon :

———

291

Sl. No. 50937 वीरभद्रमन्त्रः Ms. No. P. 7550–10

Beginning :

अघोरास्त्रम् —

ओं नमो भगवते वीरभद्राय उग्ररूपाय आचन्द्रार्कवीरशङ्कराय युगयुगान्तराल-प्रचण्डभयङ्कराय परमेश्वराद्यप्रतिपालक अनेकनिर्पोशाय ब्रह्मविस्णुरुद्रग्रहबन्धनाय ।

End :

यमनिरुरुति शिखान्यादि बन्धयामि । श्री शरभेन्द्राय सर्वदुष्टपिशाचनाशाय सर्वभूतनिवारणाय क्षुद्रोभद्रकाय सर्वशास्त्रनिवारणाय हुं फट स्वाहा ।

Colophon :

— —

292

Sl. No. 50942 वीरभद्रमन्त्रः Ms. No. P. 5933–25

Beginning :

ओं नमो भगवते रुद्राय चिलि चिलि मिलि मिलि पशुपतिराज्ञापयति स्वाहा । .... ओं नमः खण्डरुद्राय कुरु कुरु मुरु मुरु भूतसमये तिष्ठ तिष्ठ ।

End :

गोमये मण्डलं कृत्वा गन्धपुष्पाक्षतादिभिः ।
अर्चयेन्मन्त्रबीयन्यस्वहस्तं मण्डलोपरि ॥
स्थपयित्वा जपेन्मन्त्रं यावदष्टोत्तरं शतम् ।
त्रिदिनं कारयेद्देवं हन्ति भूतादिकान् ज्वरान् ॥

Colophon :

इति वीरभद्रमन्त्रः ।

293

Sl. No. 50944 वीरभद्राघोरमन्त्रविधिः Ms. No. P. 8122–4

Beginning :

अस्य श्रीवीरभद्र अघोरमन्त्रस्य । अघोर ऋषिः । अनुष्टुप् छन्दः । वं

शक्तिः । रं कीलकम् । मम दुरितक्षयार्थे सर्वभूतश्रुतनिवारणार्थे सर्वनिवारणार्थे जपे विनियोगः ।

End :

परभयं विनाशाय परमयन्त्रं परतन्त्रं विनाशाय परमन्त्रं विनाशाय आत्ममन्त्रं यन्त्रपूजिताया—तलेगुण्डगुण्डभक्तसुरधेनु श्रीवीरभद्रनमस्तस्मै नमस्तस्मै नमः ।

Colophon :

॥ श्रीः श्रीः श्रीः ॥

294

Sl. No. 50947 वीरहनुमत्कवचम् Ms. No. P. 6915-4

Beginning :

अस्य श्री प्रलयकालरौद्रविजयवीरहनूमान् असाध्यसाधनमूलमन्त्रस्य । ईश्वर ऋषिः । अनुष्टुप् छन्दः । श्रीरामलक्ष्मणौ देवता । असौं बीजम् । अञ्जनी-सूनुरिति शक्तिः । वायुपुत्र इति कीलकम् । मम वीरहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

हनुमंता वीरहनुमंता बोबटि विडुवुदे योगिनिं दांचिनिं देशचरणिं पुद्गकेशिनि शक्तिवुळकाशाद्रि वीरभद्रा विरूपाक्षि चामुण्डि करोचि गुड्गरि गुरुओं अं अं ओं वटु स्वाहा । ९ बारि मंत्रिसुवुदु ।

Colophon :

॥ शुभमस्तु ॥

295

Sl. No. 50951 वीरहनूमान्महामन्त्रः Ms. No. P. 1024-2

Beginning :

ख्यातः श्रीरामदूतः पवनतुभवः पिङ्गलाक्षः शिखावान्

सीताशोकापहर्ता दशमुखविजयी लक्ष्मणप्राणदाता ।

आदाने भेषजाद्रेः लवणजलनिधेः लङ्घने वायुवेगो
वीरः श्रीमान् हनूमान् मम मनसि हितं कार्यसिद्धिं विदधात् ।

अस्य श्री वीरहनूमान् महामन्त्रस्य ।

End :

ध्यायेद्बालदिवाकरद्युतिनिभं देवारिदर्पापहं
देवेन्द्रप्रमुखप्रशस्तयशसं देदीप्यमानं रुचा ।
सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं
संरक्तारुणलोचनं पवनजं पीताम्बरालङ्कृतम् ॥

ओं नमो भगवते आञ्जनेयाय × × × ।

Colophon :

———

296

Sl. No. 50952 **वीरावलीपञ्चकमन्त्रजपविधिः** **Ms. No. P. 7538-4**

Beginning :

अस्य श्रीवीरावलीपञ्चकमन्त्रस्य । ब्रह्मविष्णुरुद्रईश्वरसदाशिवा ऋषयः । गायत्र्यादिः छन्दांसि । ब्रह्मादयो देवताः । लवरयहाः बीजानि । वाणीलक्ष्मी उन्मनीमनोन्मनी शक्त्याः । सोहं कीलकम् । मम पञ्चवीरवलीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

\+ + + + + +

End :

ध्यानम् —

ब्रह्माणं च महाविष्णुं रुद्रं च परमेश्वरम् ।
सदाशिवमहं वन्दे परात्परतरं परम् ॥

चतुर्भुजाश्च ते सर्वे तत्तदायुधसंयुताः ।
शक्तियुक्तामहावीरा पान्तु मां परमेश्वराः ॥

मनुः —

ओं ह्रां श्रीं ऐं क्लीं सौः ब्रह्मवीरश्री । विष्णुवीरश्री । रुद्रवीरश्री । ईश्वर-वीरश्री । सदाशिववीरश्री सिद्धमन्त्राः ।

Colophon :

———

297

Sl. No. 50956 वेङ्कटेश्वरमन्त्रजपविधिः Ms. No. B. 1113–19

(वायुपुराणान्तर्गतः)

Beginning :

अस्य श्रीवेङ्कटेश्वरमन्त्रस्य । ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीवेङ्कटेश्वरो देवता । ओं मीजम् । स्वाहा शक्तिः । श्रीं कीलकम् । श्रीवेङ्कटेश्वरप्रसाद-सिध्यर्थे जपे विनियोगः ।

\+ \+ \+ \+ \+ \+

End :

\+ \+ \+ \+ \+ \+

तस्मात्सर्वप्रयत्नेन मन्त्रराजं जपेत्सदा । फलश्लोकाः —

पुत्रकामो लभेत्पुत्रं धनकामो लभेद्धनम् ।
जयं च जयकामश्च कुमारी च शुभं पतिम् ॥
ऐश्वर्यं राजसन्मानं भुक्तिं मुक्तिं च विन्दति ।
इह लोके चिरं स्थित्वा अन्ते सायुज्यमप्नुयात् ॥

Colophon :

इति वायुपुराणे वेङ्कटगिरिमाहात्म्ये वेङ्कटेशाष्टाक्षरीमन्त्रः संपूर्णः ।

298

Sl. No. 50962 वेङ्कटेश्वरयन्त्रम् Ms. No. P. 7451–28

Beginning :

कर्णिकायां लिखेत्तारं तन्मध्ये तारकं लिखेत्। रामषडक्षरीं ओं रां रामाय नमः। तदुपरि त्रीणि पीठानी न्यसेत्। प्रथमपीठे कृष्णचतुरक्षरं लिखेत्। कं कृष्णाय।

End :

निर्मलं परमात्मानं जीवन्मुक्त्योऽस्म्यहं शिवे
चिन्तयन् पुण्डरीकाक्षं शङ्खचक्रगदाधरम्।
करुणामृतसंपूर्णतरं तकं पाक्षकं
स ब्रह्मवेकं × × शरत्पूर्णेन्दुवक्राभम्।
पीतकौशेयवासिनं महोदरमुदाराङ्गं
+ श्रीनिवास महानुम् .... ॥

Colophon :

इति श्रीनिवास आनन्दनिलय–यन्त्रोद्धारं समाप्तम्।

299

Sl. No. 50967 वेदवन्दनमन्त्रविधिः Ms. No. P. 6714-2

Beginning :

वेदवन्दनमन्त्रस्य सान्दीपिनिः भगवान् ऋषिः। अनुष्टुप् छन्दः। सन्ध्याभिमानिसरस्वती देवता। अं ऐं बीजम्। उं क्लीं शक्तिः। औं सौं कीलकम्। वन्दने विनियोगः।

End :

प्रणवं परमात्मानं जपित्वाभक्तिसंयुतम्।
स्वनाम्नातामभिध्यायेत् प्रकुर्यात् वन्दनं बुधः।

ऋग्वेदाद्ब्रह्मणे नमः ।
यजुर्वेदायविष्णवे नमः ।
सामवेदायब्रह्मणे नमः ॥

Colophon :

इति वन्दनप्रकारः ॥

300

Sl. No. 50969 वेदान्तदेशिकमन्त्रः Ms. No. P. 10264-5

Beginning :

अस्य श्रीवेदान्तदेशिकमन्त्रस्य — श्रीरङ्गराजो ऋषिः । श्रीमद्वेदान्तदेशिको देवता । हतेनैव पदत्रयेणावर्तते इति न्यासः । श्रीमान् वेङ्कटनाथार्य इति ध्यानम् ।

End :

ओं नमो देवी गायत्री छन्दः ।
श्रीम + + +
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥ इति मन्त्रः ।

Colophon :

———

301

Sl. No. 50971 वैनायकसंहिता Ms. No. P. 3489

Beginning :

\+ + + + + +
\+ + + लोकानां हितकारकम् ।
\+ + न्तु श्वेतार्कश्चोत्तमोत्तमम् ॥
विधानं तस्य वक्ष्यामि समासेन निबोधत ।

श्वेतार्कमूलसंगृ + + + + ॥
विधानं पुष्यनक्षत्रे मध्यन्दुग्रहणे तथा ।
+ + + + +

End :

इत्येतत्सर्वमाख्यातं रहस्यं भुविदुर्लभम् ।
क्षिप्रसिद्धिकरं गुह्यं सर्वकामार्थसाधकम् ॥
शान्ताय च विनीताय गुरुभक्तिपराय च ।
विघ्नेशपादभक्ताय विशुद्धाय प्रदापयेत् ॥
नास्ति काय च दुष्टाय पापाशन पराय च ।
नाशिष्याय प्रदातव्यं ना भक्ताय कदाचन ॥

Colophon :

इति वैनायकसंहितायामष्टमः पटलः ।

302

Sl. No. 50972 **वैखरीन्यासविधिः** **Ms. No. P. 5002-66**

Beginning :

अथ वैखरीन्यासः ।

आधारकुण्डलचतुर्दशेषु ऐं ह्रीं श्री ह्सैं शं ह्सैं सं ह्सैं इति न्यस्य, स्वाधिष्ठान कमलरसदलेषु ऐं ह्सैं लं ह्सैं इति न्यस्य आधारस्य ।

End :

ऐं ह्रीं श्रीं क्षं ह्सौः इति न्यस्य । विशुद्ध आज्ञाक्षरदेवता स्फटिकमणिमय-पाञ्चालिकासंनिभाः पुष्पमयबाणारोपित रसालचापपाणिपल्लवाध्यायाः ॥

Colophon :

इति वैखरीन्यासः । शिवम् ॥

303

Sl. No. 50979 वैष्णवीमातृकाविधिः Ms.No. P. 5002–33

Beginning :

अस्य श्री वैष्णवीमातृकामन्त्रस्य—प्रजापतिः ऋषिः । गायत्री छन्दः । अथ लक्ष्मीहरिर्देवता । क्लीं बीजम् । नमः शक्तिः । अच्युतत्वसिद्ध्यर्थे जपे विनियोगः। क्लां अंगुष्टाभ्यां नमः । क्लीं तर्जनिभ्यां स्वाहा । क्लूं मध्यमाभ्यां वौषट् ।

End :

ओं क्ली हं प्राणात्मने वराहाय निशायै नमः । ओं क्लीं ळं शक्त्यात्मने विमलाय अमोघायै नमः । ओं क्लीं सं क्रोधात्मने नृसिंहाय विद्युताय नमः इति मातृकास्थानेषु विन्यसेन् ॥

Colophon :

॥ श्रीः ॥

304

Sl. No. 50980 व्रणनिवारकमन्त्रः Ms. No. P. 5056-12

Beginning :

ಘಾಯದ ಮಂತ್ರ — ಸಮುದ್ರಮಹಾದೇವ ಸತ್ತು ಸ್ವರ್ಗಕೆ ಹೋಗಿ ಮದ್ದನೆ ತಂದು ಹರದದನೆ ಹಚ್ಚಿ ಮುರದದ್ದನೆ ಗಂಟಿಕ್ಕಿ ನ್ಯರುಬತ್ತಿನೋವು ಸತ್ತು.

End :

ಕೆಂದಾವರೆ ಕುರುವಿನಂದ ಬಂದಳು ಮಹಾಹವಿಕೀತರೆ ಬಾತರೆ ನನ್ನಾಣೆ ನಿನ್ನಾಣೆ ಶಿವಸಿದ್ದರ ಪಾದದಾಣೆ ಓ ಜಂಬಾಲು ಗುರುಂಬಾಲು.

Colophon :

———

305

Sl.No. 50985 व्याहृतिमन्त्रः Ms. No. C. 1076-3

Beginning :

हरये नमः इति । मन्त्रेण गुरुनमस्कारः । प्राणायामः । ओं अनिरुद्धाय हृदयाय नमः । ओं भुवः सङ्कर्षणाय शिखायै वौषट् । ओं स्वः वासुदेवाय कवचाय हुम् । ओं भूर्भुवस्सुवः नारायणायास्त्राय फट् ।

End :

व्याहृतिमन्त्रजपं करिष्ये । ओं भूः ओं भुवः ओं भूर्भुवस्स्वः ओम् ॥१०८॥ शेषं पूर्ववत् । ओं भूः ओं भुवः ओं स्वः ओं भूर्भुवस्स्वः हरिं तर्पयामि । शेषं पूर्ववत् ॥

Colophon :

306

Sl. No. 50986 शक्तिकमलामारबीजमातृकाः Ms. No. P. 5002-38

Beginning :

अस्य श्रीशक्तिकमलामारबीजमातृकामन्त्रस्य — संमोहन ऋषिः । गायत्री छन्दः । संमोहनी सर्वशङ्करी मातृका सरस्वती देवता । व्यञ्जनानि बीजानि स्वराः शक्तयः । बिन्दवः कीलकम् । शक्तिकमलामारबीजमातृका सरस्वतीप्रसाद-सिद्ध्यर्थे विनियोगः ।

End :

ध्यायेयमसवलयेषु शरासपाश
पद्मद्वयांकुशशराभवपुस्तकं च ।
आबिभ्रतीं निजकरैकरुणारुणान्तां
संम्मोहिनीं त्रिनयनां तरुणेन्दुचूडाम् ॥

ओं ह्रीं श्रीं क्लीं अं नमः । .... मातृकास्थानेषु क्षान्तं विन्यसेत् ।

Colophon :

॥ श्रीः ॥

307

Sl. No. 50988 शक्तिजयजयमालामहामन्त्रः Ms. No. B. 664-18

Beginning :

अथ शक्तिजयजयमालामहामन्त्रस्य । वागीन्द्रियाधिष्ठायी अंशादित्य ऋषिः । पङ्क्ति छन्दः । सात्विकह्रींङ्कारपीठस्थितहृच्छ्रयोनामकामेश्वराङ्कनिलया हृल्लेखा-नामललिता महाभट्टारिका देवता । वाक्सिध्यर्थे जपे विनियोगः ।

End :

महास्कन्दे जय जय । महामहाबृन्दे जय जय । महामहामाये जय जय । महामहाश्रीचक्रनगरनगसाम्राज्य नमस्ते स्वाहा जय जय ।

Colophon :

॥ श्रीदेवीरूपाय गुरवे नमः ॥

208

Sl. No. 50989 शक्तितर्पणमालामहामन्त्रः Ms. No. B. 664-17

Beginning :

अस्य श्री तर्पणमालामहामन्त्रस्य पाणीन्द्रियाधिष्ठायी अत्यमादित्य ऋषिः । बृहती छन्दः । स्वाम्त्विकलकारभट्टारकपीठस्थलक्षसारकामेश्वराङ्कनिलया । ललिता-नामललिता महाभट्टारका देवता । बलसिद्ध्यर्थे जपे विनियोगः ।

End :

महास्कन्दां तर्पयामि । महामहाबृन्दां तर्पयामि । महामहाश्रीचक्रनगर-साम्राज्य नमस्ते नमस्ते स्वाहां तर्पयामि ।

Colophon :

———

309

Sl. No. 50992 शक्तिन्यासविधिः Ms. No. P. 5002–45

Beginning :

अथ शक्तिन्यासः ।

रक्तचन्दनकाष्ठेन हस्तमात्रं त्रिकोणाकारं शक्तिन्यासासनं कृत्वा चन्दनेन तिलकेन वा अक्षतामिश्र लेपनं कुर्यात् । विजयायै नमः । जयायै नमः । जेत्र्यै नमः । अपराजितायै नमः । सङ्गमारम्भायै नमः । इत्यासने संपूज्य —

End :

शिखायां शाङ्खनीरक्षेन् वस्त्रैरस्त्रावलिः शुभा । कवचे कवचाङ्गी च नेत्रे नेत्रकृतोत्सवा ।

तिष्ठन्ति योगिनीरूपा त्रैलोक्येनचराचरम्
योगिन्यो या स्तुताः सर्वाः गेहं कुर्वन्तु मे वपुः ॥

Colophon :

॥ हरिः ओम् ॥

310

Sl. No. 51001 शक्तिपश्चाक्षरीमन्त्रः Ms. No. C. 3494–19

Beginning :

अस्य श्रीशक्तिपञ्चाक्षरीमहामन्त्रस्य । गालवऋषिः । अनुष्टुप् छन्दः । श्रीं अर्धाम्बिकेश्वरा देवता । ओं बीजम् । ह्रीं शक्तिः । नमश्शिवायेति कीलकम् । श्री अर्धाम्बिकेश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

बन्धूककाञ्चननिभं रुचिराक्षमालां
पाशांकुशौ चवरदं निजबाहुदण्डैः ।
बिभ्राणमिन्दुसकलाभरणं त्रिणेत्रं
अर्धाम्बिकेशमनिशं वपुराश्रयामः ॥

.... तत्पुरुषायविद्महे महादेवाय
धीमहि तन्नोरुद्राः प्रचोदयात् ॥

.... गुह्येति च समर्पणम् ॥

Colophon :

इति शक्तिपञ्चाक्षरीमन्त्रविधिः ॥

311

Sl. No. 51003 शक्तिपञ्चाक्षरीमहामन्त्रः Ms. No. C. 4290-6

Beginning :

अस्य श्रीशक्तिपञ्चाक्षरीमहामन्त्रस्य—वामदेव ऋषिः । श्रीसाम्बसदाशिवो देवता + + + श्रीसाम्बसदाशिवप्रीत्यर्थे जपे विनियोगः ।

End :

ध्यानम् —

मूले कल्पद्रुमस्य धृतकनकनिभं चारुपद्मासनस्थं
वामाङ्कारूढगौरीनिबिडकुटभराभोगवस्त्रोपगूढम् ।
सर्वालङ्कारकन्तं परपरशुमृगाभीतिहस्तं दधानं
वन्दे बालेन्दुमौळे गजवदनगुहाभीष्टपार्श्वं महेशम् ॥

पञ्चपूजा । लं पृथिव्यात्मने गन्धं समर्पयामि । सर्वोपचारपूजां समर्पयामि । श्री ह्रीं नमश्शिवाय उत्तरन्यासः ।

Colophon :

312

Sl. No. 51009 **शक्तिमन्त्रः** Ms. No. P. 5778-4

Beginning :

तदुक्तं मानसोल्लासे —

विष्णुः शिवस्सुरज्येष्ठो मनश्चन्द्रो धनाधिपः ।
लोपामुद्रा तथागस्त्यः स्कन्दः कुसुमनायकः ॥ १ ॥
सुराधीशो रौहिणेयो महामुनिः ।
दूर्वासा इति विख्याता एते मुख्या उपासकाः ॥

End :

यत्पादपद्ममकरन्दकणा धरित्री
भ्रूमध्यगो विधिहरी तव रक्तशुक्ला ।
पादौ रजो मलगुणौ खलु सेवमानौ
सृष्टिस्थिती वितनुतो हृदये तृतीय
मङ्घ्रि भजन् हरति विश्वमुदग्रमुग्रः ।
तुर्यं तवाम्ब चरणं निरुपाधिबोधं
सान्द्रामृतं शिवपदे सततं नमामि ॥

Colophon :

313

Sl. No. 51012 **शक्तिमातृकान्यासः** Ms. No. P. 5002-35

Beginning :

अस्य श्रीशक्तिमातृकामन्त्रस्य—शक्तिः ऋषिः । गायत्री छन्दः । सकल-

सौभाग्यदायिनी मातृका सरस्वती देवता। व्यञ्जनानि बीजानि स्वराः शक्तयः। बिन्दवः कीलकम्। शक्तिमातृकासिद्ध्यर्थे विनियोगः।

End :

.... दिश्यादौं जगदीश्वरी त्रिनयना पद्मे निषण्णा सुखम्। ओं ह्रीं अं नमः। ओं ह्रीं आं नमः। ओं ह्रीं इं नमः। ओं ह्रीं ईं नमः इत्यादि सकारान्तं मातृक स्थानेषु विन्यसेत्।

Colophon :

॥ इति शक्तिमातृका ॥

314

Sl. No. 51015 शक्तिशुद्धमालामन्त्रः Ms. No. C. 3749

Beginning :

श्रीदेव्युवाच —

भगवन् देवेदेवेश सर्वज्ञ करुणानिधे।
शुद्धशक्तिमहामन्त्रं ब्रूहि मेपरमेष्ठद ॥

ईश्वर उवाच —

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि।
तस्य स्मरणमात्रेण चक्रपूजाफलं लभेत् ॥

End :

अणिमादिगुणैश्वर्यं रञ्जनं पाप भञ्जनम्।
तत्तदावरणस्थायी देवतावृन्दमन्त्रजम् ॥
मालामन्त्रमिमं गुह्यं परंधामप्रकीर्तिदम्।
आसहस्रतपः प्रोक्तो मालामन्त्रसकृज्जपात् ॥

Colophon :

इति श्रीललितापरिशिष्टे शुद्धशक्तिमालामन्त्रविधिः संपूर्णः ॥

315

Sl. No. 51017 शक्तिसिद्धान्तः Ms. No. C. 4686-50

Beginning :

पार्वत्युवाच —

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।
यन्मन्त्रं देवता या च कथयस्व महेश्वर ॥
लोके प्रसिद्धं पापघ्नं पुरुषार्थप्रदं नृणाम् ।
ब्रह्मविद्याप्रदं वश्यं सर्वसिद्धिकरं शिवम् ॥

End :

नेतः परतरा पूजा नेतः परतरं महत् ।
नेतः परतरा विद्या नेतः परतरं फलम् ॥
नेतः परतरं मन्त्रं नेतः परतरो भुवि ॥

Colophon :

इति श्री विद्यायां त्रिपुरसिद्धान्ते उमामहेश्वरसंवादे शक्तिसिद्धान्तौ नाम प्रथमोऽध्यायः ।

316

Sl. No. 51018 शक्तिस्थलनिर्णयः Ms. No. C. 3032-39

Beginning :

अष्टोत्तरशतशक्तिस्थलानि —

सर्वदा सर्वभूतेषु द्रष्टव्या सर्वतो भुवि ।
सत्यलोकेषु यत्किञ्चिद्रहितं नमया विना ॥

तथाऽपि तेषु स्थानेषु द्रष्टव्या सिद्धिमीप्सुभिः ।
स्मर्तव्या भूतिकामैर्वा तानि वक्ष्यामि तत्त्वतः ॥

End :

यन्नामाष्टशतं यस्तु श्रावयेच्छिवसंनिधौ ।
तृतीयायामथाष्टम्यां बहुपुत्रोभवेन्नरः ॥
गोदाने श्राद्धदाने वा अहन्यहनि वा पुनः ।
देवर्चानविधौ यद्वो पठन् ब्रह्मादिगच्छति ॥

Colophon :

इति मत्स्यपुराणे त्रयोदशाध्याये अष्टोत्तरशक्तिस्थलं संपूर्णम् ।

317

Sl. No. 51022 शङ्खोद्धारक्रमः Ms. No. C. 2569-4

Beginning :

अथ शैवानां शङ्खोद्धारक्रमः विलिख्यते । गोमयेनोपलिप्ते शुभस्थाने मृण्मयं वा कनकमयं वा दर्भमयं शवं कृत्वा संस्थाप्य दक्षिणाभिमुखं दीपं संस्थाप्य ।

End :

शङ्खोद्धारविधिं कृत्वा कृतकृत्यो भवेद्गुरुः ।
तस्यवीतानुमानेन कुर्यादिन्त्येष्टिसंस्क्रियाम् ॥
क्रियालोपो नकर्तव्यः श्रेयोमुक्तिमभीप्सुभिः ॥
.... शैवान् विसर्जयित्वा यथासुखं विहरेत् ।

Colophon :

इति श्रीकुलुकातन्त्रे शङ्खोद्धारविधिः संपूर्णा ॥

318

Sl. No. 51024 | शतचण्डीविधानम् | Ms. No C. 2939

Beginning :

ऋषिरुवाच —

शृणु राजन् प्रवक्ष्यामि चण्डिकापूजनं महत् ।
आश्विनस्य सिते पक्षे प्रतिपत्सु यथा क्रमम् ॥
सुस्नातः तिलतैलेन पूर्वाह्ने च नृपोत्तम ।
पुण्याहवाचनं कृत्वा द्विजांश्चैव प्रपूजयेत् ॥

End :

महालक्ष्मीः ददात्यस्मै त्रैलोक्ये सुखमुत्तमम् ।
यद्यत्कार्यं समुद्दिश्य क्रियते शतचण्डिका ।
ततस्तस्य महालक्ष्मीः सम्यगायुः प्रयच्छति ॥

Colophon :

इति श्रीडामरकल्पे नवार्णतन्त्रसारे शतचण्डीविधानं नामत्रयोदषीऽध्यायः ।

319

Sl. No. 51025 | शतचण्डीविधानम् | Ms. No. B. 658-10

Beginning :

वाराहीतन्त्रे रुद्रयामले शतचण्डीविधानम् —

शतचण्डी विधानञ्च प्रोक्तवान् शृणुष्व तत् । ....
सङ्कटे समनुप्राप्ते दुश्चिकित्सामये तथा ॥

× × × ×

सर्वोपद्रवनाशाय शतचण्डीं समाचरेत् ॥

End :

कार्यसिद्धिर्भवेन्नूनं शत्रुनाशो भवेद्ध्रुवम् ।
राज्यवृद्धिर्भवेच्छान्तिः रोगाणां महतामपि ॥

Colophon :

इति श्रीवाराहीतन्त्रे रुद्रयामले शतचण्डीविधानं संपूर्णम् ॥

320

Sl. No. 51028 शतचण्डीविधानप्रयोगः Ms. No. C. 2532–10

Beginning :

लम्बीजैः दन्तानाशोध्य आचम्य मुखं प्रक्षाल्य ओं आत्मतत्त्वाय नमः । विद्यातत्त्वाय नमः । मायातत्त्वाय नमः । इत्याचम्य नित्यस्नानं विधाय मन्त्रस्नानं कुर्यात् ।

End :

वषट् पल्लवोपेतो मारणे ब्राह्मणं विना ।
यन्त्रक्षजतकार्येषु सुभट्टानां विनाशने ॥
वौषडन्तो महान् कल्पोग्रहलामाविनाशकः ।
खण्डनोच्चाटनो द्वेषे मन्त्रषट्पल्लवान्वितः ॥

Colophon :

इति श्री डामरादितन्त्रसारे ब्रह्मेश्वरसूरिविरचिते देवीमहोत्सवे कालनियमादिनानाविधिर्नाम नवमावसरः ।

तैलाद्रक्षेत् .... पुस्तकम् ।
यादृशीपुस्तकं .... न विद्यते ॥

321

Sl. No. 51031 शतपदचक्रम् Ms. No. P. 5972–10

Beginning :

अथातस्सम्प्रवक्ष्यामि चक्रं शतपदं न्यसेत् ।
एकादशोर्ध्वगो रेखा तिर्यग्रेखास्तथा भवेत् ॥
अवकहडान् मटपरतान् नयबजसान् गयसहचलान् ।
एकैकस्वरसम्भेद एकैकः पञ्चधा भवेद्वर्णः ॥
एकैकं नक्षत्रं चतुर्भिश्चतुर्भिश्चाक्षमेकैकेन वर्णैश्चतुर्भिस्सहितान् यथाधिकानि चत्वारि उक्तैः पञ्चभि × × रनो × × स्वराश्च गृह्यन्ते ।

End :

स्वस्य नामक्षरे पुंसां युश्माक्षरसमन्वितः ।
तदाद्यवर्णमुत्सृज्य द्वितीयं तु प्रशस्यते ॥
शङ्करश्च शिवश्शम्भुरहिर्बुध्याद्विपाहते ।
शङ्करश्च शिवश्शम्भुरहिर्बुध्न्येति नामतः ॥

Colophon :

———

322

Sl. No. 51032 शतस्थानन्यासः Ms. No. P. 4525–27

Beginning :

शृणु देवि शतस्थानं न्यासं सर्वत्र दुर्लभम् ।
स्नात्वा शुद्धाम्बरो मन्त्रोतत्तन्मन्त्रोक्तदेवताम् ॥
ध्यात्वा ऋष्यादिकं न्यासं कराङ्गन्यासपूर्वकम् ।
आयुः श्रीकीर्तिदं पुण्यं मन्त्रसिद्धिकरं सदा ॥

End :

अंगुल्यादौ तदग्रे च न्यसेत्पादतलेऽपि च ।
वामपाददशस्थानं न्यसेदेवं क्रमाद्बुधः ॥
एवं विन्यस्तदेहस्तु स सात्माद्देवतामयः ।
मन्त्रसिद्धिर्भवेत्तस्य त्रिंशद्द्वारेण मण्डलात् ॥

Colophon :

323

Sl. No. 51035 शताक्षरीबगलामन्त्रविधिः Ms. No. P. 8100-4

Beginning :

अस्य श्रीपरविद्याग्रसिनीं शताक्षरीबगलामहामन्त्रस्य––ब्रह्मा ऋषिः । गायत्री छन्दः । परविद्याग्रासिनीशताक्षरीबगला देवता । ह्रीं बीजम् । ह्लीं शक्तिः । ऐं कीलकम् । परविद्याग्रसिमीशताक्षरीबगलामूलमन्त्र जपे विनियोगः ।

End :

सर्वदुष्टानां वाचं मुखं पदं स्तम्भयस्तम्भय प्रस्फुर विकटाङ्गीघोररूपिणीजिह्वां-कीलय महाभ्रमरी बुद्धिं विनाशय विराणमयि .... ऐं ह्रीं स्वाहा इति मनुः ।

Colophon :

॥ श्रीः ॥

324

Sl. No. 51038 शत्रुघ्नमन्त्रः Ms. No. P. 5657–54

Beginning :

अस्य श्रीशत्रुघ्नमहामन्त्रस्य––अगस्त्यभगवानृषिः । अनुष्टुप् छन्दः । शत्रुघ्नो

देवता । शं बीजम् । स्वाहा शक्तिः । आयतीति कीलकम् । शत्रुघ्नप्रसाद-
सिद्ध्यर्थे जपे विनियोगः ।

End :

ध्यानम् —

द्विभुजं स्वर्णरुचिरतनुं पद्मनिभेक्षणम् ।
धनुर्बाणधरं रामसेवासंसक्तमानसम् ॥

पञ्चपूजा मन्त्रः । शं शत्रुघ्नाय नमः । पुनर्न्यासः । स्वर्भुर्भुरोमिति
दिग्विमोकः ।

Colophon :

———

325

Sl. No. 51041 शत्रुपराजयमन्त्रः Ms. No. P. 3591-33

Beginning :

यस्ते मन्योविधद्वज्र
सायकसं ओजः प्रतिविश्व मानुषक् ।
साह्या मदा समायं त्वया
युजा सहस्तुतेन सहसासहस्व ॥

End :

संसृष्टं धनमुभयं समाकृत-
मस्मभ्यं दत्तां वरुणश्चमन्युः ।
भियं दधाना हृदयेषु शत्रवः
पराजितासो अवनी लयन्ताम् ॥

Colophon : ॥ श्रीः ॥

326

Sl. No. 51044 शत्रुपलायनजपविधिः Ms. No. P. 5657–26

Beginning :

अथातः सम्प्रवक्ष्यामि शत्रुणां च पराजयम् ।
शत्रुभिः परिभूतस्तु ऋचमेकां जपेन्मनुम् ॥
संसृष्टं धनमित्यस्य न्यासं कुर्याद्यथाविधिः ।
लिखित्वाष्टदलं पद्मं इन्द्रशत्रुजयं भवेत् ॥

End :

शत्रुविध्वंसिनी रौद्री त्रिशरीरकलोचनी ।
रक्ताम्बरी मुक्तकेशी रक्तपानी महोदरी ॥
अग्निज्वाला रौद्रमुखी घोरदंष्ट्रा त्रिलोचनी ।
एतेरावुष्क्रुता घोरा शीघ्रमुच्चाटये द्विषः । संसृष्टं धनम् ॥

Colophon :

॥ श्रीः ॥

327

Sl. No. 51047 शत्रुपलायनजपविधिः Ms. No. P. 5657–45

Beginning

अथातः सप्रवक्ष्यामि शत्रूणां च पराजयम्।
शत्रुभिः परिभूतस्तु ऋचमेकां जपेन्मनुम् ॥
मन्त्रस्यास्म ऋषिमन्युर्जगतीच्छन्द एव च ।
शत्रुहेन्द्रो देवता च मम शत्रुपराजयः ॥

End :

उपचारैः षोडशभिः साङ्गावरदेवताः ।
सम्पूज्य च जपं कुर्यात्संसृष्टं धनमित्यमुम् ॥

शिवालये नदीतीरे विल्वमूले गृहेऽथ वा ।
जप्त्वा मन्त्रममुं विद्वान् शत्रुभिर्नाभिभूयते ॥

Colophon :

———

328

Sl. No. 51053 शत्रुमारणकवचम् Ms. No. P. 4580–13

Beginning :

कैलासशिखरासीनं शङ्करं वरदं शिवम् ।
देवी पप्रच्छ सर्वज्ञदेवदेवं महेश्वरम् ॥

श्रीदेव्युवाध —

भगवन् सर्वदेवेश देवानां मोक्षद प्रभो ।
प्रब्रूहि मे महाभाग गोप्यं यद्यदि मे प्रभो ॥

End :

प्रभातसमये चैव पूजाकाले प्रयत्नतः ।
सायङ्काले तथा पाठात्सिद्धिर्भवेद् ध्रुवम् ॥
शत्रुनाशकरे देवि सर्वसम्पत्करं शुभम् ।
सर्वदेव्यस्तुते देवि कालिके त्वां नमाम्यहम् ॥

Colophon :

इति रुद्रयामले पार्वतीपरमेश्वरसंवादे शत्रुनाशनकवयं संपूर्णम् ।

329

Sl. No. 51055 शत्रुमारणकारणकालीकवचम् Ms. No. P. 4868–24

Beginning :

शत्रुमारणकालीकदचम् —

कैलासशिखरासीनं शङ्करं वरदं शिवम् ।
देवं ब्रह्म + + + + महेश्वरम् ॥

श्रीदेव्युवाच —॥

भगवन् सर्वदेवेश देवानां मोक्षदप्रभो ।
प्रब्रूहि मे महाभाग योग्यं यद्यदि मे प्रभो ॥
शत्रूणां च विनाशः स्यात् आत्मनो रक्षणं भवेत् ।

End :

शत्रुनाशकरी देवी सर्वसम्पत्करं शुभम् ।
सर्वदेवस्तुते देवि कालिके त्वां नमाम्यहम् ॥
प्रभातसमये चैव पूजाकाले च यत्नतः ।
सायंकाले तथा पाठात् सर्वसिद्धिः भवेद्ध्रुवम् ॥

Colophon :

इति श्रीरुद्रयामळे पार्वतीपरमेश्वरसंवादे शत्रुनाशकवचं सम्पूर्णम् ॥

330

Sl. No. 51058 शत्रुविद्रावणचण्डीपाठविधिः **Ms. No. B. 658–9**

Beginning :

शत्रुपलायनार्थं चण्डीविधानम् —

पार्वतीं प्रति ईश्वरः —

राज्यबाधे च सम्प्राप्ते शत्रुभिः परिवेष्टिते ।
महाघोरतरे युद्धे विजयाकाङ्क्षिणा प्रिये ॥
पलायनाय शत्रूणां तेषां वै सङ्क्षयाय च ।
अनायासेन वैरीणां विजयाय महेश्वरि ॥
+ + चण्डीपाठः प्रकर्तव्यः क्षिप्रं विजयवान् भवेत् ।

End :

मनोदार्ढ्यं च संपाद्य कार्यं वै नियमात्मना ।
संशयेन कृतं कर्म व्यत्यस्तफलदं भवेत् ॥

Colophon :

इति वड्डामरेश्वरतन्त्रे शिवगौरीसंवादे चण्डीपाठविधिः ॥

331

Sl. No. 51059 शत्रुविध्वंसिनीमन्त्रः Ms. No. P. 10251-19

Beginning :

अस्य श्रीशत्रुविध्वंसिनीमहामन्त्रस्य—ज्वलत्पावक ऋषिः । विराट् छन्दः । शत्रुविध्वंसिनी देवता । शत्रुक्षयार्थे जपे विनियोगः ।

End :

शत्रुविध्वंसिनीं रौद्रीं त्रिजटां रक्तलोचनीम् ।
अग्निज्वालां रौद्रमुखीं घोरदंष्ट्रां त्रिलोचनीम् ॥
दिगान्तारक्तकेशीं च रक्तपानां महेश्वरीम् ।
एतैरविष्कृधा गौरैः शीघ्रमुच्चाटयेद्द्विजः ॥

Colophon :

———

332

Sl. No. 51062 शत्रूसंहारवाराहीमहामन्त्रः Ms. No. C. 4686-43

Beginning :

श्रीगणाधिपतये नमः ॥ शुभमस्तु ।

अस्य श्री शत्रुसंहारवाराहीमहामन्त्रस्य । नारदभगवान् ऋषिः । अनुष्टुप् छन्दः । मम शत्रुसंवाराही देवता । ओं बीजम् । ह्रीं शक्तिः । हूं कीलकम् । मम शत्रुसंहारवाराहीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

ओं नमो भगवते संहारभैरवीं महाकालान्तकीं प्रलयकालिनीं प्रचण्डिवीरविक्रमीं महाशक्ति मम सर्वशत्रुसंहारिणे स्वाहा ।

लक्षपुरश्चरणतद्दशांशहोमरक्ततर्पणम् ।

Colophon :

॥ श्रीः श्रीः श्रीः ॥

333

Sl. No. 51065 **शत्रूच्चाटनविधिः** **Ms. No. P. 4868-19**

Beginning :

अथ शत्रूच्चाटनविधिरुच्यते ।

अथविद्यां प्रवक्ष्यामि शत्रूणां दुष्टचेतसां ।
उच्चाटनादि विस्फोटान् उपादानादिकारणम् ॥
फलं तस्याधनारीः स्यात् प्रवक्ष्यामि समानतः ।
वेदशास्त्राङ्गमान्याश्च ब्रह्मविष्णुमहेश्वराः ॥

End :

ವಿದ್ವೇಷಣಾನಕು ಚ್ಛವಮುಚರ್ಮಂ । ವಿದ್ವೇಷಣಾನಕು ವೃಷ್ಟಚರ್ಮಂ । ಮಾರಣಕು ಮಹಿಷಚರ್ಮಂ । ಉಚ್ಚಾಟನಕು ಸರ್ಪಚರ್ಮಂ । ಮೋಕ್ಷದಂ ಕೃಷ್ಣಾಜಿನಂ । ಸರ್ಪಂ ಬಾನಕು ಶುದ್ಧವಸ್ತ್ರಂ ॥

Colophon :

॥ श्रीः ॥

334

Sl. No. 51066 शत्रूच्चाटनहनुमन्मन्त्रः Ms. No. P. 7552-3

Beginning :

ओं ह्रीं वं बें बें ओं न × × गवते वीरप्रचण्डप्रतापहनुमते × × × जवात् बन्ध मार्गं बन्ध चोरबन्ध × × × × ब्रह्मराक्षसान् उच्चाटयोच्चाटय × × × शत्रून् उच्चाटयोच्चाटय ।

End :

अक्षकुमारसंहारकारणाय ओं × × ह्र × × नमो भगवते श्रीरामदूतहनुमते हुं फट् स्वाहा ।

Colophon :

इति शौनकसंहितायां पञ्चधारदिग्बन्धनमालामन्त्रः ॥

335

Sl. No. 51067 शनिमालामन्त्रः Ms. No. C. 3487

Beginning :

अस्य श्रीशनिमालामन्त्रस्य—कश्यप ऋषिः । अनुष्टुप् छन्दः । शनैश्वरो देवता । शं बीजम् । शिं शक्तिः । मं कीलकम् । शनैश्वरप्रीत्यर्थे शनिमालामन्त्रजपे विनियोगः ।

End :

ओं नमोऽर्कपुत्राय शनैश्चराय
नीलाभ्रवर्णाजिनमेखलाय ।
स्तुत्वा रहस्यं प्रणतोऽस्मि नित्यं
फलप्रदो मे भव सूर्यपुत्र ॥

Colophon :

इति श्रीशनिमालामन्त्रः संपूर्णः ।

336

Sl. No. 51068 शनैश्चरमन्त्रः Ms. No. P. 5176–8

Beginning :

अस्य श्री शनिश्चरमन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। शनीश्वरो देवता। शां बीजम्। श्रीं यति शक्तिः। शूं कीलकम्। शनीश्वरप्रोत्यर्थे जपे विनियोगः।

End :

वन्दे शनीश्वरं देवं दौष्ट्रं वस्त्रवनीलाभरणं भूषणम्।
वामोरन्यस्ततद्धस्तं साभयान्मकराम्बुजम्॥
ओं शनीश्वराय नमः ।

Colophon :

॥ श्रीः ॥

337

Sl. No. 51075 शरणागतिमन्त्रः Ms. No. P. 10264–18

Beginning :

शरणागतिमन्त्रस्य—ब्रह्मा ऋषिः । देवी गायत्रीं छन्दः । श्रीमन्नारायणो देवता । + + + +

शङ्खचक्रगदापद्मधारिणं दिव्यभूषरिणम् ।
वामाङ्कस्थश्रिया जुष्टं भजे नारायणं प्रभुम्॥ इति ध्यानम् ।

End :

एवमेव श्रीरामचरमः वराहचरमश्च । सकृदेव प्रपन्नायेति रामचरमश्लोकः ।

स्थिते मनसीत्यादिश्लोकद्वयवराहचरमः प्रपत्तिरूपचरमोपायविधायकत्वत् एतेषाच्चरमश्लोकसंज्ञा प्रपत्त्यध्याये तस्यास्तुरीयोपायत्वेन विधानम् ।

Colophon :

———

338

Sl. No. 51076 शरभकल्पः Ms. No. C. 3410-8

Beginning :

गुरुं गणपतिं देवीं भैरवं शरभेश्वरम् ।
नमस्कृत्वा प्रवक्ष्यामि मन्त्रशास्त्रविभूतये ॥
साङ्गं सलक्षणं देवसारभूतममीष्टदम् ।
ज्ञानदं सर्वजन्तूनां साधकानां सुखावहम् ॥
+ + + + +
तादृशं कल्पमागोप्यं सर्ववेदागमोद्भवम् ।
शीघ्रसिद्धिप्रदं श्रेष्ठं शृणु सर्वमयेम्बिके ॥

End :

तेन युक्तं नरं दृष्ट्वा धावन्त्याखिलदुर्गणाः ।
भूतप्रेतपिशाचानां कस्तेह समवस्थितिः ॥

Colophon :

इति श्रीमदाकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शरभकल्पं नाम अष्टाविंशोऽध्यायः ।

339

Sl. No. 51078 शरभतन्त्रम् Ms. No. B. 651

Beginning :

ओं अथापि श्रृणु दवेशि सर्वलक्षणमद्भुतम् ।
शारभं कवचं नाम चतुर्वर्गफलप्रदन् ॥ १ ॥

शरभः शावपक्षीशंराजाख्यकवचस्य तु ।
सदाशिवर्षिश्छन्दो बृहती शरमेश्वरः ॥ २ ॥

देवता प्रणवो बीजं प्रकृतिः शक्तिरुच्यते ।
कीलकं पक्षिराजेति सर्त्रेरक्षाकरो विभुः ॥ ३ ॥

End :

ओं नं बटुकाय शं वाय ज्वल ज्वल प्रज्वल ममामीष्टं साधय साधय मां रक्ष रक्ष मम सर्वप्रस्थानेषु भयेषु च। प्राणरक्षाय स्वे स्र्वशत्रुसंहारणाय हौं हौं हौं हौं हौं सर्वदुष्टेभ्यो हुं फट् स्वाहा । १०६

Colophon :

इति श्रीशरभतन्त्रः समाप्तः ॥

340

Sl. No. 51081 शरभमन्त्रविधिः Ms. No. P. 8106/15

Beginning :

अस्य श्रीशरभकवचस्तोत्रमहामन्त्रस्य— सदाशिव ऋषिः । बृहती छन्दः । श्रीशरभेश्वरो देवता । ओं बीजम् । प्रकृति शक्तिः । पक्षिराजेति कीलकम् । मम सकलदुरित .... निवृत्यर्थे जपे विनियोगः ।

End :

मूलमन्त्रम्—ओं भूर्भुवस्सुवः । ओं नमो भगवते महाबले चण्डमाये महाभयविनाशिनि ज्वलज्वलप्रज्वल सकलदुष्टेभ्यो हुं फट् स्वाहा इति मूलमन्त्रम् ।

Colophon :

इति शरभमन्त्रविधिः ।

341

Sl. No. 51085 शरभयन्त्रविधिः Ms. No. P. 4252-13

Beginning :

अथ शरभभेदेन यन्त्रभेदः प्रदर्श्यते । तथाहि ध्यानम् —

अरुणमरुणमालालंकृतं शङ्कराग्रैः
विधृति परशुशक्ति पुष्पबाणेषु चापम् ।
विविधफणिफणेन्द्रं भूषणैर्भूषिताङ्गं
शरभमखिलनाथः नौम्यहं साळ्ववेशम् ॥

End :

तद्बाह्ये शक्तिबीजं विजयजययुतं दीपिकाभीतिमस्त्रं
शत्रूणां भीतिभाजं ग्रहणसममरोच्चाटनं सर्वमेतत् ।
बीजं स्वाहान्तकोणं ऋतुगृहविवरे वायुबीजं समाद्यां
तद्बीजं चाष्टकोणं शशिसहितमथो .... संहारचक्रम् ॥

Colophon :

———

342

Sl.No. 51091 शरभेशाष्टकस्तोत्रम् Ms. No. P. 4252-25

Beginning :

श्री शिव उवाच —

शृणु देवि प्रवक्ष्यामि परं पुण्यविवर्धनम् ।
शरभेशाष्टकं मन्त्रं वक्ष्वामितवऽस्वतः ॥

ऋषिन्यासादिकं यत्तत् सर्वं पूर्ववदाचरेत् ।
ध्यानभेदं विशेषेण वक्ष्याम्यहमतः शिवे ॥

End :

ततस्ते स्वस्वधामानि ययुराह्लादपूर्वकम् ।
एतच्छरभकं स्तोत्रं मन्त्रं भूमौ जपेन्नरः ॥
सर्वान् कामानवाप्नोति शिवलोकं च गच्छति ।
शिवलोकं च गच्छत्यों नमः ॥

Colophon :

इति आकाशरभैरवकल्पे शरभेशाष्टकस्तोत्रं संपूर्णम् ।

343

Sl. No. 51096 — शान्तिदुर्गाविधानम् — Ms. No. P. 4461-13

Beginning :

अथ शान्तिदुर्गा —

अस्य श्रीशान्तिदुर्गामन्त्रस्य—शेषपर्यङ्कशायिनी नारायणी ऋषिः । जगती छन्दः । शेषपर्यङ्कशायिनी नारायणी देवता । शान्तिदुर्गा वा ह्रीं शक्तिः । दुर्गामिति कीलकम् । मम इष्टार्थे विनियोगः । + +

End :

इन्द्राय इति षष्टी वज्रादिभिः सप्तमी । एवं पूजाविधिः —
जपापरातीतुलसी रक्ताब्जानीति मन्त्रवित् ।
आदायसुरभीण्येव पुष्पाण्यन्यानि कानिचित् ॥

Colophon :

————

344

Sl. No. 51097 | शान्तिस्तवः | Ms. No. P. 8106-2

Beginning :

शान्तिस्तवः —

जयन्तु देवो हरपादपङ्कजं
प्रसन्ननामामृतमोक्षदायकम्
अनन्तसिद्धान्तमतिप्रबोधकं
नमामि चाष्टाष्टयोगिनीकुलम् ॥

योगिनीचक्रमध्यस्थं मातृकामण्डलेष्टितम् ।

End :

इति पठित्वा चक्रस्थानसत्कौलिकान् अभिषिञ्चविशेषार्घ्यपात्रम् ।
समुद्धास्य प्रसादं ददात्यतः । पानभेदलालसप्रमाणस्थितिलक्षणँ यथा शास्त्रं गुरुमुखान् ज्ञात्वा पानचर्वशक्ति संयादिभिः यथासुखं विहरेत् ।

Colophon :

इति श्रीकुलार्णवे सपादलक्षग्रन्थे पञ्चमखण्डे शान्तिसूक्तं (स्तवं) संपूर्णम् ।

345

Sl. No. 51107 | शारदातिलकम् | Ms. No. P. 5789-2

Beginning :

नित्यानन्दवपुर्निरन्तरगळत्पञ्चाशदर्णैः क्रमात्
व्याप्तं येन चराचरात्मकमिदं चेष्टार्थरूपं जगत् ।
शब्दब्रह्म यदूचिरे सुकृतिनः चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कसदनं वाचामदीशं महः ॥ +

सारं वक्ष्यामि तन्त्राणां शारदातिलकं शुभम् ।
धर्मार्थकाममोक्षाणां प्राप्तिः प्रथमकारणम् ॥
शब्दार्थसृष्टिं मुनिभिश्चः दोभिः दैवतैस्सह ।
विधिश्च यन्त्रमन्त्राणां तन्त्रेऽस्मिन्नभिधीयते ॥

End :

सर्ववेदमयाचिन्त्यपदोन्ते सर्वमुच्चरेत् ।
बोधयद्विपयान्तोयं मन्त्रस्तारादिरीरितः ॥
ऋषिर्ब्रह्मस्य निदिष्टश्छन्दोनुष्टु + + +

Colophon :

७९ तमे पत्रे —
इति शारदातिलके चतुर्दशः पटलः ।

346

Sl. No. 51112 शारदामन्त्रः Ms. No. P. 5657–23

Beginning :

ओं अन्तर्बहिर्मातृका सरस्वतीमन्त्रस्य । ब्रह्मा ऋषिः । गायत्री छन्दः । श्री अन्तर्बहिर्मातृका सरस्वती देवता । हसौः बीजम् । ह्रीं शक्तिः ।

End :

आक्षामण्टपे द्विदलपद्मे हं क्षं । अथ ध्यानम् । ऐं कारे धनुरात्तपङ्कजमुखी चक्राङ्कपद्मस्थिते ईडापिङ्गलमध्यवर्तिपवने ब्रह्माण्डखण्डस्थिते इन्दुर्बाणधनुर्धर उत्तरत्रग्रन्थं नास्ति ।

Colophon :

———

347

Sl. No. 51122 शास्त्रमन्त्रजपयोगविधिः Ms. No. P. 4252–26

Beginning :

श्रीशिव उवाच — मालामन्त्रम्

पक्षिराजाय निशितकुलिशखरनखाय अनेककोटिब्रह्मकपालमालालंकृताय सकल-
कुलमहानागभूषणाय सर्वभूतनिवारणाय नरसिंहगर्वनिर्वापणकरणाय ।

End :

वैश्वानराख्य + रितक्षकेभ्यः
परेभ्यो भूतेभ्यो × कृतान्तात् ॥
आथर्वणमिदं मन्त्रं अमोघं दुरितापहम् ।
सर्वसंरक्षणं श्रेष्ठं सर्वसौभाग्यदायकम् ।
विधिना धारयेद्योयं सर्वत्र विजयी भवेत् ॥

Colophon :

इति आकाशभैरवकल्पे शास्त्रमन्त्रजपयोगो नाम अष्टादशोऽध्यायः ।

348

Sl. No. 51126 शिवकवचम् Ms. No. P. 8778–4

Beginning :

अथापरं सर्वपुराणगुह्यं
निःशेषपापौघहरं प्रसिद्धम् ।
जयप्रदं सर्वविषप्रमोचनं
क्ष्यामि शैवं कवचं हितायते ॥
ओं नमस्कृत्वामहादेवं विश्वव्यापिनमीश्वरम् ।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥

End :

महापातकसङ्घातैर्मुच्यते नात्रसंशयः ।
देहान्ते मुक्तिमाप्नोति शिववर्मानुभावतः ॥
त्वमपिश्रद्धया, वत्स ! शैवं कवचमुत्तमम् ।
धारयस्वमया दत्तं सद्यः श्रेयोऽप्यवाप्स्यसि ॥

Colophon :

शिवकवचं संपूर्णम् ॥

349

Sl. No. 51132 **शिवजयमालामहामन्त्रः** Ms. No. B. 664-23

Beginning :

अथ शिवजयमालामहामन्त्रस्य — श्रोत्रेन्द्रियाधिष्ठायी सवितादित्य ऋषिः । अतिशक्करी छन्दः । तामसलकारभट्टारकपीठस्थितलक्ष्मीनामविभूषिताङ्कललाज्जिह्व-कामेश्वरभट्टारको देवता । सर्वाकर्षणसिद्ध्यर्थे जपे विनियोगः ।

End :

महामहानन्द जय जय । महामहास्कन्द जय जय । महावृन्द जय जय । महामहामाय जय जय । महामहाश्रीचक्रनगरसाम्राज्य नमस्ते नमस्ते स्वाहा जय जय ।

Colophon :

350

Sl. No. 51134 **शिवनृत्ययन्त्रम्** Ms. No. C. 4343-3

Beginning :

महानृत्यवसाने तु परिपप्रच्छ पार्वती ।
गिरिशं शिरसा नत्वा चन्द्रार्धकृतशेखरं ॥

देव्युवाच —

देव देव महादेव सृष्टिस्थित्यन्तकारक ।
पूर्वमुक्तानि यन्त्राणि कथयस्व कृपानिधे ॥

End :

बहुनात्र किमुक्तेन प्रत्ययो ह्यस्य सूचकाः ।
लिखेत्सहस्रसंख्याकं जलेन तु विलेपयत् ।
बन्धमोक्षप्रदा देवि नात्र कार्या विचारणा ॥

Colophon :

इति दक्षिणामूर्तिपार्वतीसंवादे शिवनृत्ये नवकोष्टविधिः प्रथमः पटलः ॥

351

Sl. No. 51135 शिवपञ्चाक्षरीपद्धतिः Ms. No. C. 3902–2

Beginning :

प्रणम्य जगतामीशं विभुं साम्बसदाशिवम् ।
गणेशं विघ्नहन्तारं गिरिं विद्याकरान् गुरून् ॥ १ ॥
अतः पञ्चाक्षरीमुक्तो बलिरीत्यभिधानकम् ।
लभते पद्धतीरियं शिवसन्तोषकारिणी ॥ ४ ॥

End :

तिलाधिक्ये सर्वकामनसिद्धिः । अथ स्रक्स्रुवलक्षणम् । श्रीपर्णीशिंशिपाक्षीरवृक्षेष्वन्यतमं हस्तमानं काष्टं त्रिंशद्भागैर्विभज्य विंशत्यंशैर्दण्डमष्टैशैर्वोदीति निर्णयः । अत्रानुक्रमपेक्षितमन्यद्ग्रन्थान्तरतोऽवगन्तव्यमिति दिक् ।

Colophon :

———

352

Sl. No. 51139 शिवपञ्चाक्षरीमन्त्रः Ms. No. P. 5657–58

Beginning :

अस्य श्री शिवपञ्चाक्षरीमहामन्त्रस्य वामदेवऋषिः । अनुष्टुप् छन्दः । साम्बसदाशिवो देवता । नं बीजम् । मं शक्तिः । यं कीलकम् । श्री साम्बसदाशिवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

ध्यानम्—

वन्दे शम्भुमुमापतिं सुरगुरुं वन्दे जगत्कारणम्
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्
वन्दे सूर्यशशाङ्कवह्नियनं वन्दे मुकुन्दः प्रियम्
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

मनुः । नमः शिवाय । उत्तरन्यासः ।

Colophon :

———

353

Sl. No. 51152 शिवपञ्चाक्षरीमन्त्रः Ms. No. P. 2613–36

Beginning :

अथ शिवपञ्चाक्षरीमन्त्रविधिरूच्यते । अस्य श्री शिवपञ्चाक्षरी महामन्त्रस्य वामदेवऋषिः । पङ्क्ती छन्दः । श्री सदाशिवो देवता । ओमिति बीजम् । उमेति शक्तिः । ब्रह्मा बीजम् । माया शक्तिः ।

End :

धवलवपुषमिन्दोः ………………अङ्गमीशम् ॥
हरिणपरशुपाणिं चारु चन्द्रार्धमौलिं
हृदयकमलमध्येः सन्ततं चिन्तयामि ॥
कलत्रपुत्राद्यभिभूत भीताः
काशीं गतः कालवशा मनुष्याः ।
कलत्रिणस्तेऽपि कलेवरार्धे
हरन्त्यतो वारिनिधिः कलत्रम् ॥

Colophon :

इति पञ्चाक्षरमन्त्रविधानम् ।

354

Sl. No. 51165 शिशुरक्षारक्षम् **Ms. No. P. 3014-2**

Beginning :

अथ गर्भस्थितापत्यरक्षार्थानि गर्भिणीरक्षार्थानि च कर्माणि अभिधीयन्ते ।
कर्म विपाक संग्रहे ……..
गर्भिणीगर्भरक्षार्थं
मासे तु प्रथमे बलिः ।
प्रजापतिं समुद्दिश्य
देवो मन्त्रेण मन्त्रिणा ॥

End :

उत्तराष्टौ कला द्वेधा
तत्र मूर्वचतुष्टयम् ।

धरोदकानलाकाशैः
विना व्यानेन वायवः ।
प्राणापानावुदानश्च
समानप्राणवृत्तयः
व्योमाग्निजलभूयोगात्
मनस्त्वक्स्पर्श + + +

Colophon :

इति श्री पण्डितपारिजातकहारमल्लेत्यादि विरूदराजीविराजमानश्रीमदनपाल-पुत्रेण पृथ्वीमल्लेन कृते शिशुरक्षारक्षे गर्भिणीगर्भरक्षा निरूपणं नाम प्रथमः प्रकाशः ॥

355

Sl. No. 51172 शुकश्यामलामन्त्रः Ms. No. P. 7538-22

Beginning :

अस्य श्री शुकश्यामलामहामन्त्रस्य मतङ्गभैरवऋषिः । पंक्तिःछन्दः । शुकश्यामला देवता । ऐं बीजं । नमः शक्तिः । स्वाहा कीलकम् । मम शुकश्यामलाप्रीत्यर्थे जपे विनियोगः ऐ अ मः नम त स्वाहा ।

+ + + + + + +

End :

ध्यानम्—

वीणावादविनोदिनोतिरतां नीलांशुकोल्लासिनीं
नवयौवनार्द्रचरणामाकीर्णकेशालताम् ।

हृद्याङ्गी सितशङ्खकुण्डलधरां माणिक्यभूषोज्ज्वलां
मताङ्गीं प्रणतोऽस्मि नो स्मेरमुखी देवीं शुकश्यामलाम् ॥

मनुः—ऐं नमः स्वाहा शुकश्यामलाम्बाश्रींपा—मः । + (काम- गिरिपीठाय नमः । इति श्री पूर्वाम्नाय मन्त्रानुष्ठानक्रमः ।

Colophon :

———

356

Sl. No. 51173 **शुकीयदक्षिणामूर्तिमन्त्रः** Ms.No. P. 6379-8

Beginning :

अस्य श्री दक्षिणामूर्तिमन्त्रस्य शुक ऋषिः । अनुष्टुप् छन्दः । दक्षिणा-मूर्तिर्देवता + + दक्षिणामूर्तिप्रीत्यर्थे जपे विनियोगः ।

End :

मनुः—

॥ ओम् ॥ ह्रीं ह्रां ।

दक्षिणामूर्तये तुभ्यं वटमूल निवासिने ।

ध्यानैकनिरताङ्गाय नमो रुद्राय शम्भवे ॥ ओं ह्रीं ह्रा ॥

Colophon :

———

357

Sl. No. 51178 **शुद्धमातृका** Ms. No. P. 5133-8

Beginning :

शुभमस्तु ॥ अतभूतशुद्धिः । ओं आत्मऋषिः । प्रकृतिपुरुषं छन्दः । सत्यो देवता । सकल पुरुषार्थसिद्ध्यर्थे विनियोगः । मम देहस्य सर्वकर्मयोग्यतासिद्ध्यर्थं देहशुद्धिं करिष्ये ॥

End :

लं नमः अपगले वं नमः। वाम कक्षे शं नमः। दक्षिणहस्ते षं नमः। वामहस्ते सं नमः। दक्षिणपादे हं नमः। वामपादे लं नमः। नाभ्यादि शिरमारभ्य मुखपर्यन्तं क्षं नमः। इति हृदये॥

Colophon :

इति शुद्धमातृका।

358

Sl. No. 51179 शुद्धमातृका Ms. No. P. 5002–30

Beginning :

प्रपञ्चसारे उक्तम्—

बन्धूकाभां त्रिनेत्रां पृथुतरविलसद्भुक्तिमद्रक्तवस्त्रां
पीनोत्तुङ्गप्रवृद्धस्तनजघन भरांयौवनारम्भरूढाम्।
सर्वालङ्कार युक्तां सरसिजनयनामिन्दुसङ्क्रान्त मूर्तिं
अम्बां पाशङ्कुशाद्यां अभयवरकरां मातृकां तां नमामि॥
अकारादिक्षकारान्तं क्षकाराद्यकारान्तं—

End :

अग्रेऽपि तथा न्यसेत्। पवर्गं × युगले। पृष्ठनाभ्युदरेषु च।
हृद्दोर्मूलककुत्पक्षहृत्सेभकरपद्वये। जठरासनयोश्चैव व्यापकं विनियोजयेत्॥

Colophon :

॥ हरिः ओम॥

359

Sl. No. 51180 शुद्धमिथुनमालामहामन्त्रः Ms. No. B. 664–24

Beginning :

शुद्धमिथुनमालामहामन्त्रस्य अहङ्काधिष्टायीत्वष्टादित्यऋषिः। अष्टी छन्दः। तामसहींङ्कारभट्टारकपीठस्थितो हिरण्हतानामलालिताभूषिताङ्क हृदयनाथकामेश्वरभट्टारको देवता। सर्वसम्मोहनासिध्यर्थे जपे विनियोगः॥

End :

महामहामाये महामहामाय। महामहाशये महामहाशय। महामहाश्रींचक्रनगरसाम्रम्ज्य नमस्ते नमस्ते स्वाहा नमस्ते नमस्ते स्वाहा॥

Colophon :

———

360

Sl. No. 51183 शुद्धविद्यामन्त्रोद्धारविधिः Ms. No. C. 2111-5

Beginning :

अथ शुद्धविद्यादिपञ्चाम्नायोद्धारः॥ महालक्ष्मीरत्नकोशे—

तारं वाग्भवमुच्चार्य
अं औरिति मनुर्भवेत्॥

ओं ऐं भं औः।

ऐंक्लिं सौरितिमन्त्रः स्यात्
विलोमेनापि सुन्दरि॥

End :

अनुत्तरा शाङ्करी च
श्रीपूर्तिः तदनन्तरम् ।
महात्रिपुरविद्यां च
हंस्रविद्यां ततः परम् ।
एवं क्रमेण सम्पूज्य
पादुका च महेश्वरि ।
सहास्रपादुकां मूर्ध्नि
यजेत् साधकपुङ्गवः ॥

Colophon :

इति महालक्ष्मीरत्नकोशोक्त शुद्धविद्यादि मन्त्रोद्धारः समाप्तः ।

361

Sl. No. 51190 शुद्धशक्तिशिवमिथुनमालामन्त्रविधिः Ms. No. P. 5002–76

Beginning :

अस्य श्री शुद्धशक्तिमालामन्त्रस्य उपस्थेन्द्रियाधिष्ठानायैवरुणादित्यऋषिः । गायत्रीछन्दः । सात्विकककार पीठस्थितकामेश्वरी महाभट्टारक अन्तनियललिता-कामेश्वरी महाभट्टारकादेवतारवज्रसिद्धौ विनियोगः ॥

End :

एतन्मन्त्रं च तोयेन भस्मना वा समुक्षणात् ।
पठित्वाहस्तस्पर्शाद्वा नात्रकार्या विचारणा ॥
सप्ताष्टमाला सङ्काशाभिः
मन्त्रयित्वा घटोदरम् ॥

सप्ताहं सेचनं कुर्यात्
वन्ध्या पुत्रवती भवेत्॥

Colophon :

॥ हरिः ओम् ॥

362

Sl. No. 51193 शुद्धिसंस्कारः Ms. No. P. 8714-41

Beginning :

ओं ऐं ह्रीं श्रीम् । मूलम्—

वर्षाक्षरमासाक्षर उदयाक्षरदिनाक्षर इदक्के कूडिसुवदु । नाथगलकूडिसि कोण्डरे नाथपारायण ॥

प्रकाशश्च विमर्शश्च आनन्दो ज्ञान एव च ।
सत्यपूर्णस्वभावश्च प्रतिभः सुभगस्तथा ॥

End :

मूलेन पायितं शुद्धिं लवलहरिद्रामपि मरीचिसोमरत्नं दद्यात् । गन्धादिभिरलंकृत्य तां धेनुयोनिमुद्रां प्रदर्श्य पञ्चपूजां कृत्वा ।

ब्रह्मस्यात्पलले विष्णुर्गन्धे रुद्रश्च तद्रुचौ ।
परमात्मातदानन्दे तस्मात्सत्यमिदं प्रिये ॥

Colophon :

इति शुद्धिसंस्कारः ।

363

Sl. No. 51203 **शूलिनीदुर्गापूजाविधिः** Ms. No. P. 8756–8

Beginning :

आगमार्थं तु—श्रीशूलिनीपूजां करिष्ये। कलशपूजा। शङ्खपूजा। पाद्यार्घ्याचमन पात्राण्यासाद्य मूलेनाभिमन्त्र्य। अथ यन्त्रोद्धारः।

त्रिकोणं विलिखेत्पूर्वं तद्बहिर्वृत्तमालिखेत्।

\+ + + + + +

End :

छत्रचामराद्युपचाराः। स्तोत्रपाठादीनि कुर्यात्।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि।

यत्पूजनं मया देवि परिपूर्णं तदस्तु ते॥

श्रीशूलिनीदुर्गा परमेश्वरी प्रीयतां हृदम्बुजं प्रविश्य सर्वाभीष्ट प्रदा भवेति साङ्गां सायुधां सवाहनां सपरिवारां अधिदेवतां प्रत्यधिदेवतासहितां श्रीशरमेश्वरी-शूलिनी दुर्गा हृदम्बुजे प्रवेशयामि॥ ॥ ॥

Colophon :

इति श्री महाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमा-महेश्वरसंवादे शङ्करेण विरचिते दुर्गाविश्वचालनविधाने शूलिनीदुर्गायन्त्रार्चन विधिर्नाम द्वाविंशोपदेशः।

364

Sl. No. 51207 **शूलीनीदुर्गामन्त्रः** Ms. No. P. 5657–32

Beginning :

अस्य श्रीशूलीनीदुर्गामहामन्त्रस्य ब्रह्मा ऋषिः। गायत्री छन्दः। शूलिनीं-श्वरी देवता। उं बीजम्। स्वः शक्तिः। स्वेच्छाप्रयोगसिद्ध्यर्थे जपे विनियोगः।

End :

ध्यानम् ।

बिभ्राणां शूलबाणास्य भयवरगदाचापपाशाङ्कुशाब्जे
मेघश्यामा किरीटोल्लसितशशिकला भीषणाद्ये........ ।
सिंहास्कन्दादिरूढौ चतसृभिरसिखेटान्विताभिः परितो
कन्याभीभिन्नदैत्या भवतु भवभयध्वंसिनी शूलिनी नः ॥
ओं ज्वलज्ज्वल शूलिनीदुष्टग्रहपटु स्वाहा ॥

Colophon :

365

Sl. No. 51214 | **शूलिनीमन्त्रः** | **Ms. No. C. 548-29**

Beginning:

ओं नमो भगवते ज्वल ज्वल शूलिनि । सर्वभूतप्रेत संहारिणि । सर्व-
शत्रूच्चाटनि । सर्वग्रहबन्धिनि । शूलिनि । एहि । एहि । आवेश २ ॥
भूतग्रहप्रेतग्रह पिशाचिग्रह चामुण्डिग्रह ।

End :

ओं नमो भगवति दिग्बन्धनाय । कं कालिपुत्री । दुं दुर्गे शूलिनि ।
अं अर्धरात्रिविलासिनि । मं महानिशव्रतापकेलिनि । मं महाज्ञानसारिणि ।
सर्वं हर भैरवि हुं फट् स्वाहा ॥

Colophon :

366

Sl. No. 51216 **शूलिनीमन्त्रयन्त्रोद्धारणम्** Ms. No. C. 548-12

Beginning :

अतः परं प्रवक्ष्यामि क्रियाभेदं वरानने ।
अभक्ताकामगम्यानां भक्तानां सुलभोत्तमम् ॥
निवासवृन्तं मतुकोणलक्ष्मीं
माया च बाह्यावृततारसाध्यम् ।
आरभ्य मन्त्रं प्रजपेत्सहस्रं
आकर्षणात् पातु चराचराणाम् ॥

End :

स्वर्गभूतलपातालयन्त्रक्वालिखितां सदा ।
शूलिनीदर्शनादेव मरणं यान्ति निश्चयम् ॥
ये तदेवं महागुह्यं स्मरणात्पापनाशनम् ।
जपतः सर्वसिद्धिः स्यात् स नरः सुखमश्नुते ॥

Colophon :

इति श्री आकाशभैरवकल्पे प्रत्यङ्गासिद्धिप्रदे उमामहेश्वरसंवादे शूलिनीमन्त्रयन्त्रोद्धारणं नाम द्वाविंशतिपटलः ॥

367

Sl. No. 51222 **शूलिनीविधानम्** Ms. No. P. 4868-3

Beginning :

शूलिनींविधानम्—हरिः ओंम् । अस्य श्री प्रतिक्रियाशूलिनी महामन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीप्रतिक्रियाशूकिनीं दुर्गापरमेश्वरी देवता । दुं बीजम् । ह्रीं शक्तिः । श्रीं कीलकम् । श्री प्रतिक्रिया शूलिनी प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

स्वाहा ज्वल ज्वल, दुष्टग्रह शूलिनी हुं फट् अरिप्रेरित दुरितान्मोचय मोचेय रैं हल वरयींअरिदुरितान्मोचनरूरेण ज्वल ज्वल दुष्टग्रहशूलिनि हुं फट् स्वाहा ॥

Colophon :

॥ श्री ॥

368

Sl. No. 51229 — श्यामाप्रकरणम् — Ms. No. C. 1433

Beginning :

अथ श्यामाप्रकरणम्—

तदुक्तं भैरवतन्त्रे—

अथ वक्ष्ये महाविद्याः कालिकायास्सुदुर्लभाः ।

यासां विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः ॥

End :

तथा च सिद्धेश्वरतन्त्रे—

एवं ध्यात्वा जपेन्मन्त्री लक्षमेकं विधानतः ।

तद्दशांशं विधानेन होमयेत्साधकोत्तम ॥

\+ \+ \+ \+

अस्य पूजादिकं सर्वं दक्षिणवत्कार्यं पुरश्चरणंतु लक्षजपः । होमं तु तद्दशांशतः ॥

Colophon : —————

369

Sl. No. 51230 श्यामारहस्यम् Ms. No. C. 3866–1

Beginning :

देवीं दानवदैत्यदर्पनिवहान् उन्मूलयन्तीं शिवां
ब्रह्मानन्त महेशमौलिमणिभिर्विद्योतिताङ्घ्रिद्वयाम् ।
नत्वा श्री गुरुपादपद्मपरमामोदामृताह्लादितः
पूर्णानन्द इतस्तनोति विमलां श्यामारहस्याभिधाम् ॥ १ ॥
स्वतन्त्रं वीरतन्त्रं च फेत्कारीतन्त्रमेव च
कुलार्णवं तथा कालीभैरवाख्यं च तन्त्रकम् ॥

End :

बीजत्रया महाविद्या बीजाड्या परिकल्पयेत् ।
ध्यानपूजा पुरश्चर्यं सर्वं नीलासनं भवेत् ॥

Colophon :

इति श्री परमहंसमहोपाध्याय पूर्णानन्द विरचिते श्यामारहस्ये मन्त्रभेदनिरुपणं नाम द्वाविंशः परिच्छेदः ॥

370

Sl. No. 51231 श्रीकण्ठमातृकाविधिः Ms. No. P. 5002/34

Beginning :

अस्य श्रीकण्ठादिमातृकामन्त्रस्य दक्षिणामूर्तिऋषिः । पङ्क्तिछन्दः । अर्धनारीश्वरो देवता । व्यञ्जनानि बीजानि । स्वराः शक्तयः । बिन्दवः कीलकम् । श्रीकण्ठादि मातृका प्रसादसिद्ध्यर्थे विनियोगः ।

End :

षं श्वेताय रक्षाधारिण्यै ममः । सं भृगवे सहजायै नमः । हं लकुलेशाय लक्ष्म्यै नमः । ळं शिवायव्यापिन्यै नमः । क्षं संवर्तकाय महामायायै नमः । इति मातृका स्थानेषु क्षान्तं विन्यसेत् ॥

Colophon :

॥ श्रीः ॥

371

Sl. No. 51238 **श्रीगुरुपादुकास्तोत्रम्** **Ms. No. P. 5002-11**

Beginning :

श्रीरस्तु ॥ श्रीपार्वत्यै नमः ॥

ईश्वर उवाच—

हेरम्बं क्षेत्रपालं च वागीशं बटुकं तथा।
श्री गुरुर्नाथमानन्दं भैरवं भैरवीप्रियम् ॥

अनादिघोर संसार-
ध्वान्तं ध्वंसैकहेतवे ।
नमः श्रीनाथवैद्याय
भवौषधविधायिने ॥

End :

काशीक्षेत्रं निवासः तवचरणजलं जाह्नवी श्रीगुरोर्नः
साक्षाद्विश्वेश्वरस्मिन् तवचरणतया तारकब्रह्म बोधः ।
त्वच्छ्रीपादाङ्किताभूरिह भवति हिगयात्वत्प्रसङ्ग प्रयोगः
त्वत्तोऽन्यत्तीर्थदेवं क्वचिदपि च विधिं न प्रतीमः पृथिव्याम् ॥

Colophon :

इति श्रीं प्रायश्चित्तकाण्डे वामकेश्वरतन्त्रे श्रीगुरुपादुकास्तोत्रं सम्पूर्णम् ॥

372

Sl. No. 51244 श्रीचक्रम् (शिवचक्रम्) Ms. No. P. 4641–11

Beginning :

अगस्त्य उवाच—

हयाननप्रज्ञारहस्यमहिमेव—

शिववर्णानि यान्यत्र शक्तिवर्णानि यानि च ।

उभयोरपि वर्णानि तानि मे वद शङ्कर ।

इति पृष्टः कुम्भजेन हयग्रीवोवदप्रभुनः ।

End :

श्रीचक्रं शिवयोर्वपुः ।

त्रिकोणमष्टकोणं च दशकोणं द्वयं तथा ।

चतुर्दशारं चैतशक्ति चक्रापञ्च च ।

बिन्दुरष्टदळं पद्म × × वह्नं षोडषपत्रकम् ।

चतुरश्रं चतुर्द्वारं शिवचक्राण्यनुक्रमात् ॥

Colophon :

— – —

373

Sl. No. 51245 श्रीचक्रम् Ms. No. P. 5002–80

Beginning :

अथ श्री चक्रक्रमः—

—

रेखामण्डलमध्यगा नरतिरश्चास्स्युग्रहाख्यास्ततो
भानु भानुतनूभवेऽथ शशिनं कौतूकजं मण्डले।
सौम्यं चैव विधुन्तुदे सुरगुरुं भौमे भृगुं चौदुपे
सौरीमण्डलकेततस्तममिने केतुं बुधे स्पर्शयेत् ॥

End :

बिन्दुत्रिकोणवसुकोणदशारयुग्मं
मन्वश्रयागदलसंयुतषोडशारे ।
वृत्तत्रयं च सदनं भुवनत्रयं च
श्रीचक्रमतेदुरितं परदेवतायाः ॥

Colophon :

॥ हरिः ओंम् ॥

374

Sl. No. 51250 श्रीचक्रनित्यार्चनविधिः Ms. No. C. 2721

Beginning :

गृहप्राङ्गणैकदेशे प्रत्यङ्मुख आजानुपादावामपाणिबन्धौ प्रक्षाल्याचम्य द्वारे स्थित्वा गेहळ्यग्रे वृत्तचतुरश्रमण्डलं मत्स्यमुद्रया कृत्वा—
अखण्डमण्डलाकारं विश्वं व्याप्य व्यवस्थितम् ।
त्रैलोक्यं मण्डितं येन मण्डलं तत्सदाशिवम् ॥

End :

शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्बसंयुतम् ।
तावाज्ञादिशिवान्तं च जगद्यज्ञेन तृप्यतु ॥ १४ ॥
न गुरोरधिकं शिवशासनतः ॥

Colophon :

———

375

Sl. No. 51257 श्रीचक्रपूजा Ms. No. C. 2078

Beginning :

श्रीचक्रपूजाप्रारम्भः । ततो गृहप्राङ्गणैकदेशे प्रत्यङ्मुखः आजानुपादौ वाममणिबन्धौ प्रक्षाल्य । तत्त्वत्रयेणाचम्य । द्वारे स्थित्वा । देहच्छयग्रे (?) वृत्तचतुरस्रमण्डलं मच्छमुद्रया कृत्वा ॥

End :

रौद्रीकलायै नमः । दुर्गायै नमः । पातालभैरव्यै । नक्षत्रमालिन्यै नमः । आदित्याय नमः । केतवे । घण्टाब्रह्मणे नमः । रसे विष्णवे । बुद्बुदेरुद्राय नमः । नादे ईश्वराय । इत्यभ्यर्च्य । योगिनीहस्तात् पात्रं गृहीत्वा शिरसि स्थापयेत् ।

Colophon :

————

376

Sl. No. 51266 श्रीचक्रप्रतिष्ठापनविधिः । Ms. No. P. 8714-38

Beginning :

एतत्प्रतिष्ठापनमन्त्रः प्रागुक्ता एव । सुवर्णादिनिर्मितस्य तु यन्त्रस्य द्वौ प्रस्तारौ भौमो भैरव (?) श्रुति । तत्र पलद्वयपरिमाणे चतुरङ्गुलविस्तृते पट्टे ऊर्ध्वरेखात्मको बिन्द्वादिभूपुरान्तकल्पनक्रमो भूप्रस्तारः ।

End :

मूलं सर्वानन्दमयचक्रेश्वर्यै महात्रिपुरसुन्दर्यै नमः । इति च तत्रैव विन्यस्य पुनः कराङ्गन्यासौ कुर्यात् । इति चक्रन्यासः । इमौ षोढाचक्रा न्यासौ श्रीषोडशाक्षर्या अपि साधारणौ ।

Colophon :

इति यौवनोल्लासे न्यासप्रकरणम् ।

377

Sl. No. 51267 श्रीचक्रप्रतिष्ठापनविधिः Ms. No. C. 2522-3A

Beginning :

इति प्रतिष्ठिते चक्रे नित्यार्चना च कुर्यादिति । मूर्तिप्रतिष्ठायामप्येष एव विधिर्ज्ञेयः । तत्र स्थिराया विसर्जनं नास्तीति विशेषः । इति चक्रराजं समुद्धृत्य स्ववामाग्रे वक्ष्यमाणविधिना सर्वभूतबलिं दत्वा बलिस्थानादुत्तरतः पथिराजं ध्यायेत् ॥

End :

वामाध्वकरमारभ्य वामाधः करान्तमायुधध्यानम् । इति श्रीदुर्गां ध्यात्वा उत्तिष्ठ पुरुष किं स्वपिषि भयं मे समुपस्थितम् । + इति संपूज्य अभिषेक पदार्थाः । कपूरं, कस्तूरी, वट्टवेळलु, पञ्चामृतं, जटामांसि, कुङ्कुम, पन्नीरु, पञ्चत्वक्, भुजपत्री, मणिशिला, नारिकेलार्थचन्द्रिका, कूर्चम् ।

Colophon :

——

378

Sl. No. 51275 श्रीचक्रलक्षणम् Ms. No. C. 2569-5

Beginning :

षण्णवत्यङ्गुलायाम सूत्रं प्राक्प्रत्यागायतम् ।
चतुर्भिरङ्गुलैश्श्लिष्टैः सवृत्तानि च भूपुरम् ।
अन्तर्नवाङ्गुलैर्ज्ञेयं
मध्ये पत्राणि षोडश ।
एकादशाङ्गुलैर्ज्ञेयं
अष्टपत्रं समालिखेत् ॥

End :

शुक्लारुणपीतं चतुरंस्रम्
पूर्णचन्द्रनिभं षोडशदलम् ।
जपाकुसुमप्रभं अष्टदलम् ।
दाडिमीकुसुमप्रभ चतुर्दशारं पद्मराग
प्रभमष्टारं बन्दूककुसुमारुणं त्रिकोणम् ।
सिन्दूरप्रभं बाह्यदशारम् ।
जपाकुसुमप्रभमन्तर्दशारम् ।
तेजोरूपं बिन्दुचक्रम् ॥

Colophon :

इति श्रीचक्रलक्षणंम्

379

Sl. No. 51277 श्रीचक्रलेखनक्रमः Ms. No. P. 8714-37

Beginning :

अस्य च सूतकादावपि कर्तव्यताप्रतिपादुकानि वचनानि ? श्यामक्रमे द्रष्टव्यानि । नित्यक्रमामुखालाभे ? प्रतिनिदिनापि निर्वर्त्यः । तत्र प्रथमरथप्रतिनिधिः । तक्रं दधि वा गुडमिश्रं ससैन्धवं पयः क्षौद्रं गव्यं सर्पिः क्षीरं वा ताम्रपात्रगतम् ।

End :

अथ तदमितःपुनः कर्णिकावृत्तं निष्पाद्य निस्सन्धिनि पत्राणि षोडश निर्मिमीत। तदिदं च षोडशदलं संचक्षते ॥ अथ तद्बहिर्मर्यादावृत्तत्रयं परिकल्प्या तत्सरित् श्चतुरस्ररेखा त्रयेण चतुर्द्वारं भुपुरं समुद्भावयेत् ॥

Colophon :

इति श्रीचक्रलेखनक्रमः ।

380

Sl. No. 51281 श्रीचक्रलेखनक्रमः Ms. No. B. 633

Beginning :

श्री चक्रलेखनप्रकारविधिरुच्यते—

मन्त्रशास्त्रेषु पूर्णदीक्षितानां गुरुपारंपर्य क्रमेषु आदिगुरुः परमशिवः देवी परम शिव संवाद वामकेश्वरतन्त्र भैरवी भैरव संवादरुद्रयामळतन्त्र पार्वतीश्वरसंवाद मेरुतन्त्र—

End :

ऐं ह्रीं क्लीं सौः इति अष्टदले। ऐं क्लीं सौः इति षोडशदले। अं आं सौः इति चतुरश्रे इति नवचक्र नायकीबीजानि तत्तदावरणेषु परतो विलिखेत्।

Colophon :

इति चक्रबीजलेखन विधिः।

381

Sl. No. 51290 श्रीचक्रार्चनपद्धतिः Ms. No. C. 796

Beginning :

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं ....
× × × ×
मन्त्रराजसहितं वन्दे गुरो-र्मण्डलम् ॥
अथ पूजात्रयं वक्ष्ये श्रीविद्यार्जनतत्पराम् ।
महात्रिपुरसौन्दर्यां पूजयेत् कुलनोयके॥

End :

हृदयकमलमध्ये दीपवद्वेदसारं
प्रणवमयमतर्क्यं योगिहृद्ध्यानगम्यम्।
हरिगुरु शिवरूपं सर्वभूतस्थमेकं
सकृदपि मनसा वा ध्यायते यः स मुक्तः ॥

Colophon :

———

382

Sl. No. 51295 श्रीतत्त्वनिधिः Ms. No. C. 490-4

Beginning :

श्री तत्त्वनिध्याख्यग्रन्थप्रारम्भके शुभमस्तु ।

शुक्लाम्बरधरं × सर्व विघ्नोपशान्तये ।
लक्ष्मीप्रधानसममे × प्रपद्ये ।
× × निगमागमतन्त्राणां पुराणवचसामपि ।
धर्मशास्त्रेतिहासानांसारं संगृह्य तत्त्वतः ॥
चामुण्डाप्रमुखानां च देवतानां पृथक् पृथक्
स्वरूपायुधवर्णानां × प्रकाश्यन्तयथामति ।

End :

श्री चामुण्डाकृपापूर्णकृष्णराजेन कल्पितः ।
ग्रन्थः श्रीतत्त्वनिध्याख्यःजीयुदाचन्द्रतारकम् ॥

Colophon :

इति श्री कृष्णराजमहाराजकण्ठीरवविरचिते श्रीतत्त्वनिध्याख्ये ग्रन्थे लिपिप्रमुख कौतुक निरूपणं नाम नवमो निधिः सम्पूर्णः ।

383

Sl. No. 51300 श्रीनाथादिगुरुत्रयमूलमन्त्रविधिः Ms. No. P. 5002-17

Beginning :

श्रीनाथादिगुरुत्रय मूलमन्त्रः ।

अस्य गुरुमन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । श्रीगुरुर्देवता । ह्रीं बीजम् । सः शक्तिः । सोहं कीलकम् । श्रीगुरुप्रसाद सिद्ध्यर्थे जपे विनियोगः । सामित्यादिषडङ्गन्यासः ।

End :

शाम्भववानन्दनाथ ओं । श्री । वाग्भवानन्दनाथ श्री ओं नीलकण्ठानन्द-नाथ श्री ओं सम्भ्रमानन्दनाथ श्री ओं चिदानन्दनाथ श्री ओं प्रसन्नानन्द नाथश्री विश्वात्मानन्दनाथ श्रीं पादुकां पूजयामि ।

Colophon :

॥ हरिः ओम् ॥

384

Sl. No. 51310 श्रीमन्त्रः Ms. No. P. 9644–52

Beginning :

अस्य श्रीमन्त्रस्य भृगुऋषिः । निचृद्गायत्रीछन्दः । श्रीर्देवता । रेफा बीजम् । ह्रींकारः शक्तिः । श्रीं गृं श्रौं, श्रः इति पञ्चांगः । आगमोक्त महा श्रियेमहादिद्युत्प्रभे स्वाहा ।

End :

भूयाद्भूयोद्विपद्मा भयवरदकरातप्तकार्तस्वरा
भासुत्राभेतयुग्मद्वयकरधृतकुम्भाद्भिरासिच्यमाना ।
रत्नौघाभजमौलिमलतरदुकूलोत्तमालेपनाढ्या
पद्माक्षी पद्मनाभोरसिवृतवसतिः पद्मगात्रीं श्रियेनः ।

Colophon :

+ + + + श्रीः + . +

385

Sl. No. 51312 **श्रीमहालक्ष्मीहृदयस्तोत्रविधिः** Ms. No. P. 4461–139

Beginning :

अद्यादि श्री महालक्ष्मी हृदयस्तोत्रमन्त्रस्य भार्गवर्षिः । अनुष्टुबादि नाना-छन्दांसि । आद्यादि श्रीमहलक्ष्मीर्देवता । श्रीं बीजम् । श्रीं शक्तिः । ऐं कीलकम् । आद्यादि श्रीमहालक्ष्मी प्रसादसिद्ध्यर्थे जपे विनियोगः । + + +

End :

सुवर्णपुष्पं कुरु मे गृहे श्रीः
सुधानुवृद्धिं कुरुमे गृहे श्रीः ।
सुशास्त्रवृद्धिं कुरुमे गृहे श्रीः
विभूतिवृद्धिं कुरुमे गृहे श्रीः ॥ १०५ ॥
श्रीं ध्यायेत्संप्रहासितमुखीं कोटिबालार्क भासां
विद्युद्वर्णाम्बरधरां भूषणाढ्यां सुशोभाम् ।
बीजापूरं सरसिजयुगं बिभ्रतींस्वर्णपात्रं
भर्त्रा युक्तां मुहुरभयदां मह्यमप्युच्युत श्रीः ॥ १०६ ॥

Colophon :

इति श्रीमदथर्वणरहस्ये अद्यादि श्रीमहालक्ष्मी हृदयस्तोत्रं सम्पूर्णम् ॥

386

Sl. No. 51314 **श्रीरामकवचस्तोत्रम्** Ms. No. P. 4922–41

Beginning :

अस्य श्रीरामकवचस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीरामचन्द्रो देवता । रां बीजं । श्रीं शक्तिः । नम इति कीलकम् । रामित्यादिप-डङ्गन्यासः ।

\+ + + + + +

End :

इति ते कथितं देवि सर्वमन्त्रौघविग्रहम् ।
त्रौलोक्यमोहनं नाम कवचं ब्रह्मरूपकम् ॥

\+ + + +

अपि वर्षसहस्राणां पूजायां फलमाप्नुयात् ।
विलिख्य भूर्जपत्रे तु कवचं धारयेत्सुधीः ॥
कण्ठे वा दक्षिणे बाहौ स कुर्याद्दासवज्जगत् ।
त्रैलोक्यं मोहयत्येव त्रैलोक्य विजयी भवेत् ॥

\+ + + +

तस्मात्सर्व प्रयत्नेन कवचं शोधयेत्सुधीः ।

Colophon : इति ब्रह्मयामले ।

387

Sl. No. 51315 श्रीरामचन्द्रबाह्याभ्यन्तरपूजा विधिः Ms. No. P. 4461–133

Beginning :

ओं अस्य श्री केशवादिन्यासस्य प्रजातिः ऋषिः। देवीगायत्री छन्दः । अर्थ लक्ष्मीनारायणों देवता। हं बीजं। सः शक्तिः। क्लां कीलकम्। लक्ष्मीनारायण प्रीत्यर्थे विनियोगः । श्री रामोन्नमो नारायणाय परमहंसः सोऽहम् । + + +

End :

नमो नमस्ते भरताग्रजाय
नमोऽस्तु यज्ञप्रतिपालनाय ।
नमो नमस्तेऽस्तु जगन्मयाय
वेदान्तवेद्याय नमो नमस्ते ॥

अनन्त विश्वेश हरे मुकुन्द
गोविन्द विष्णो हरे मुरारे ।
श्रीवल्लभानन्त जगन्निवास
श्रीरामराजेन्द्र नमो नमस्ते ।

Colophon :

इति श्रीहेरम्बगर्भसिद्धान्तरहस्ये श्री रामचन्द्रस्य बाह्याभ्यन्तरङ्गपूजा विधानं सम्पूर्णम् ।

388

Sl. No. 51317 श्रीविद्याग्रहणपद्धतिः Ms. No. C. 2512–4A

Beginning :

तत्र यथोक्त लक्षणश्शिष्यः यथोक्तलक्षणं गुरुं पूर्वं चिरकालसेवितं + + कृतपूर्वाह्निक क्रियं च स्नातः + ब्राह्मणै स्वस्ति वाचयित्वा अद्यामुके मासि × श्रीविद्याग्रहणमहं करिण्ये इति कुशहस्तः प्राङ्मुखोदुङ्मुखो वा सङ्कल्पं कृत्वा × अमुकशर्माणं त्वां गुरुत्वेन वृणे × + ×

End :

होमानन्तरं समस्तप्रकटेत्यादिसमष्टिमन्त्रेनाहुतित्रयं दत्वा प्राग्वत्समावाहयेत् । इति नित्यहोमविधिः । अथ देव्याः पार्षदेभ्यः कुरुकुल्लादिभ्यो वि × × त्वा × × तत्सर्वं गुरुदेवतासमर्पितमस्त्वित्ति स्वाहान्तो मनुरित्युक्तस्त्रिंत्सप्त-त्यक्षरः प्रिये ॥

Colophon :

———

389

Sl. No. 51318 श्रीविद्याजपविधिः Ms. No. P. 2194

Beginning :

पादुकामन्त्रमुच्चार्य स्वशिरसि मुगीमुद्रया गुरुत्रयं सञ्चिन्त्य । ओं ह्रीं श्रीं हंस श्रीशिवस्सोऽहं स्वरूपनिरूपणहेतु श्रीगुरुपरमानन्दनाथपराशक्त्यम्बा श्रीपादुकां पूजयामि ।

End :

गुह्यति गुह्याणि स्त्रीत्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवित्वत्प्रसादान्मयास्थिरा ॥

Colophon :

———

390

Sl.No. 51321 श्रीविद्यात्रिभुवनान्लङ्कारसंजीविनीभाष्यम् Ms. No. B. 126-7

Beginning :

गुरोर्लक्षणमुक्तम्

शान्तत्वं किन्नाम अभिमानरहितत्वमहङ्काररहितत्वं वा । अध्यासशून्यत्वं वा अविद्यारहितत्वं वा, मायारहितत्वं वा, समाजभ्रान्तरहितत्वं वा कर्मजभ्रान्तिरहितत्वं वा, भ्रान्तिज भ्रान्तिरहितत्वं वा, ...

....

नाद्यः असिद्धेः ।

End :

तथाच श्रीविद्यारहस्यमेवं विज्ञेयम् । श्रीविद्योपासकानां सर्वाभिष्टार्थसिध्यर्थं अस्य स्तोत्रस्य शिवेनोक्तत्वात् नाप्रामाण्यशङ्कादोषः । तथाच श्रीचक्रपूजया श्रीविद्योपासकाः दीर्घायुष्मन्तः कीर्तिमन्तः प्रजावन्तः श्रीमन्तश्च भवति ॥ तस्मा-दिदं स्तोत्रं अवश्यं प्रतिदिनं पठनीयम् ।

Colophon :

इति श्री गोविन्दभगवत्पूज्यपाददशिष्य श्रीमच्छङ्करभगवत्पादाचार्यविरचितं श्रीविद्यात्रिभुवनालङ्कारसञ्जीविनीभाष्यं संम्पूर्णम् ।

391

Sl. No. 51322 श्रीविद्यानुष्ठानविधिः Ms. No. P. 8714-17

Beginning:

वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रस्वमीष्टसिद्धये ॥
शिवं गुरुं गणेशं च प्रणम्यदेवताम् ।
ललितार्चनमञ्जर्या वक्ष्ये विद्याविधिं मुदा ॥
तत्क्रमं यथा श्रीमान् साधकेन्द्रः श्रुत्वेस्तुरीययामे ब्राह्मीमुहूर्ते चोत्थाय—

End :

सा देबीमित्रदेवीकुलकमलवती सिद्धिदा मङ्गलां वा
तासां पादाब्जयुग्मं क्षितिपतितरलं मस्तकस्थं नमामि ॥
शिवाद्यवनिपर्यन्त ब्रह्मादिस्तम्भ संयुतम् ॥
कालाग्न्यादिशिवान्तं च जगद्यज्ञेन तृप्यत् ।
एतैः श्रीपात्रस्थामृतेन साममयिकैस्सह स्वशिरसि मार्जनं कुर्यादिति ।

Colophon :

इति श्रीगुरूक्तक्रमः ।

392

Sl. No. 51329 श्रीविद्यापुरश्चरणम् Ms. No. P. 792-3

Beginning :

अथ श्रीविद्यापुरश्चरणविधिः । षट्त्रिंशल्लक्षं जपेत् । ....
अथ कल्पसूत्रोक्तप्रकारेण श्रीविद्याचक्रपूजाविधिः लिख्यते । आदौ महागणपतिपूजां कृत्वा

End :

अंगुष्ठेन तु बध्नीयात् कनिष्ठामूलसंश्रिते ।
तर्जन्या कारयेदेषां मुद्रां श्रीवत्ससंज्ञिताम् ॥
अनामापृष्ठसंलग्ना × दक्षीणस्य कनिष्ठिकाम् ।
कनिष्ठिकां च बध्नीयात् अनाम × × ×॥

Colophon :

393

Sl No. 51330 श्रीविद्यापूजापद्धतिः Ms. No. C. 3905

Beginning

ब्राह्मी मुहूर्ते चोत्थाय स्वशिरसि श्रीगुरुं ध्यात्वायथा-
सहस्रदलपङ्कजसकलशीतरश्मिप्रभं ।

वराभयकराम्बुजं विमलगन्धपुष्पाम्बरम् ॥
प्रसन्नवदनेक्षणं सकलदेवतारुपिणां
स्मरेच्छिरसि हंसकं तदभिधानपूर्वं गुपूरुम् ।
श्रीनाथादिपादुकां ध्यात्वा तत्र अजपासङ्कल्पः ।

End :

देवनाथगुरो स्वा × देशक स्वात्मनायक त्राहि त्राहि कृपासिन्धो पूजां पू × × कुरु । इति गुरुप्रार्थनं कृत्वा यथासुखं विहरेत् । हतः मिश्रचनाय × × द्यया स्वात्मानं सच्चिदानन्दरूपं परामृश्य सुखी कुर्यादिति । × ×

Colophon :

इति श्री नित्यानन्दनाथक्रमसारे श्रीविद्यापूजापद्धतिः ।

394

Sl. No. 51332 श्रीविद्याभाष्यम् Ms. No. P. 6189

Beginning :

ज्ञानानन्दमयं .... उपास्महे ॥
गुरवे सर्वलोकानां .... नमः ॥
वागीशाद्याः .... गजाननम् ॥
द्वैताद्वैत .... परमेश्वरीम् ॥
तच्छंयो रावृणीमहे गातुं यज्ञाय, ओं शान्ति शान्तिः ॥ इह खलु भगवान् सकलविद्यानिधिः बहुविधमहाविष्णुः

End :

हयग्रीवाल्लब्ध्वा सकलमिदमाद्यं मनुवरं
कृता टीका तस्य प्रथितमहिमाऽगस्त्यमुनिना ।

कला तत्रोद्भासिन्यपरिमितभाग्योदयकरी
त्रयीं सारादुद्धृत्य च सदुपकारायसुधिया ॥

Colophon :

इति श्रीमत्परमशिवपरब्रह्मरूपिणा अगस्त्यमुनिना विरचिता श्रुति × × श्रींमत्पञ्चदशाक्षरी श्रींविद्यामनुटीका समाप्ता .... श्रीविद्या भाष्यं सम्पूर्णम् ।

395

Sl. No. 51333 श्रीविद्याभाष्यम् Ms. No. P. 2063-1

Beginning :

इह खलु भगवान् सकलविद्यानिधि बहुविधशाखामय ऋग्यजुस्सामवेद मूर्तिधरः चिच्छक्तिस × × तरङ्गितहयग्रीवरूपी महाविष्णुः सकलज्ञानतपोनिधये रुचिदानन्द चिच्छक्तिरूपं पृष्टवते अगस्त्याय महामुनये अनेकविधशाखामयानां ऋग्यजुस्सामशाखानां

End :

हयग्रीवाल्लब्ध्वासकलमिदमाद्यं मनुवरं
कृता टीका तस्य प्रथितमहिमागस्त्यमुनिना ।
कलातत्त्वोद्भासिन्यपरिमितभाग्योदयकरी
त्रयी सारादुद्धृत्य च सदुपकाराय सुधिया ॥

Colophon :

इति परमशिवापररूपागस्त्यमहर्षिणा विरचिता श्रुतिसारसमुद्धृता श्रीविद्याटीका समाप्ता ।

396

Sl. No. 51334 **श्रीविद्याभाष्यम्** Ms. No. B. 698

Beginning :

. . इह खलु भगवान् सकलविद्यानिधिः बहुविधशखामय ऋग्यजुस्साम + + सच्चिदानन्दपरब्रह्मसाक्षात्कारिणी ब्रह्मश्रीविद्यापञ्चदशसु वर्णेषु प्रतिवर्णं तत्तद्रहस्यार्थ तत्त्वप्रकाशिनीं श्रीविद्यामुपदिशति क इति । केन दीप्तावित्यस्मात् कन्यते-काश्यते अनेन शब्दार्थ जालानीतिकनतीति वा ।आर्षत्वत् प्रगृह्यत्वेन प्रकृतिभावः । + +

End :

एवं सर्व छन्दोमयीयं विद्यामन्त्रब्राह्मणोपनिषद्रूपखण्डत्रयात्मिका एतां विद्यामेवोत्तर नारायणसवाचक सकल प्रपञ्च सारात्मकब्रह्मतेजोऽभिवृद्धिमयेत्वाभिष्टौति सर्वकालसमष्ट्यात्मकत्वेव च इययेव विद्या सर्ववेदेषु सर्वात्मकचैतन्यात्मकत्वेन गूढतयोच्यते । + + + +

हयग्रींवाल्लब्ध्वा सकलमिदमाद्यं मनुवरं
कृता टीका तस्य प्रथितमहिमागस्त्यमुनिना
कलातन्त्राभ्यासिन्यपरिमित भाग्योदयकरी
त्रयीसारादुद्धृत्य च सदुपकाराय सु धिया ॥

Colophon :

इति श्रीपरमशिवरूपिणा अगस्त्यमुनिना विरचिता श्रुतिसारसमुद्धृत श्री विद्याव्यख्या समाप्तिमगमत् ।

397

Sl. No. 51339 **श्रीविद्यामन्त्ररत्नसूत्रम्** Ms. No. C. 1529-1

Beginning :

अथ शाक्तमन्त्रागमजिज्ञासा ॥ १ ॥
आत्मैवाखण्डाकारः ॥ २ ॥

चैतन्यस्य स्वरूपा चिच्छक्तिः ॥ ३ ॥
सैवेयमनामाख्या श्रीविद्या ॥ ४ ॥

End :

अस्य ह्रस्ववर्णपञ्चकसमुञ्चिता तथैव सङ्ख्या पराशाम्भवी ॥ १०३ ॥
अनुत्तर सङ्केतप्रधानविद्या सप्तदशवर्णविशिष्टा ॥ १०४ ॥
अथैतासां परिवाराणां अनुपरिवारा असङ्ख्याकाः ॥ १०५ ॥

Colophon :

इति श्रीं विद्यामन्त्ररत्नसूत्राणि ।

398

Sl. No. 51341 श्रीविद्यामन्त्ररत्नसूत्रदीपिका Ms. No. C. 1529-2

Beginning :

श्रीविद्यानन्दगुरवे ब्रह्मानन्दैकतत्पराः ।
राजान्ते ब्रह्मविप्रायां(?) दीक्षिताः शिष्यमूर्धसु ॥१॥
परमानन्द सम्पूर्ण शिववामाङ्कशोभिताम् ।
देवीं जिज्ञासमानानां ज्ञापयन्ती यथा तथा ॥२॥

\+ + + +

श्रीं विद्यारत्नसूत्राणां वाक्यार्थप्रतिपादने ।
भगवत्याः प्रसादेन क्रियते दीपिका मया ॥

End :

अथह्रस्ववर्णपञ्चकसमुच्चिता
तथैव संख्या पराशाम्भवी ॥१०३॥
अनुत्तरसङ्केत प्रधान विद्या सप्तदश
वर्ण विशिष्टा ॥१०४॥

अथैतासां परिवारणाणां अनुपरिवा-
रा असंख्याकाः ॥ १०५ ॥

एतानि सूत्राणि गौडपादैरुक्तानीति ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्करभगवत्पादाचार्यशिष्य श्रीमद्विद्यारण्यमुनिवर्यशिष्यशङ्करमुनिकृता श्री विद्यामन्त्ररत्नसूत्रदीपिका समाप्ता ।

399

Sl. No. 51343 श्रीविद्यारत्नदीपिका. Ms. No. P. 8715-2

Beginning :

बालार्कमण्डलाभासां चतुर्बाहां त्रिलोचनाम् ।
पाशांकुशधनुर्बाणां धारयन्तीं शिवां भजे ॥
श्रीविद्यारत्नसूत्राणां वाक्यार्थप्रतिपादने ।
भगवत्याः प्रसादेन क्रियते दीपिका मया ॥

End :

त्रयोदशवर्णा तुरीया । न वाशीति वर्णा महार्धा । द्वादशाक्षरस्वरूढा । एकाक्षरा मिश्रा । त्रयोंदशवर्णा वाग्वाहिनीं । एकवर्णापरा । वर्णद्वययुक्ता प्रासादपरा । तथैव परा प्रासादः । ह्रस्ववर्ण पञ्चकदीर्घवर्णयुताः परा शन्तुः । ह्रस्वषट्कपञ्चदीर्घवर्णयुता परा शाम्भवी । अमुत्तरसङ्केतप्रधानविद्यासप्तवर्णा विशिष्टा । अथ तासां परिवारा जनामाख्या अनेकाः ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य विद्यारण्यमुमिवर्यशिष्य श्रीशङ्करपादारण्यमुनिकृता श्री विद्यारत्नदीपिका समाप्ता ।

400

Sl. No. 51354 श्रीविद्याविलासः Ms. No. B. 724

Beginning :

अस्य श्री उच्छिष्टगणपतिमहामन्त्रस्य मतङ्गभगवान् ऋषिः । गायत्रीछन्दः । गणपतिर्देवता । ओं गं बीजम् । स्वाहा क्लीं शक्तिः । श्रीं क्लीं कीलकम् । इष्टार्थसिद्धर्थे जपे विनियोगः । हस्तिमुखाय ।

End :

एवं तुलामेषसंक्रान्त्योः कर्किमकरयोरमावास्यायां स्वजन्मदिवसे विद्याप्राप्ति-दिने गुरुजन्म मरणदिने अक्षरत्रयसम्पातदिने युगादिष्वष्टमी चतुर्दशी नवमी प्रभृति विशेषदिनेषु सविशेषं पूजयेत् ।

Colophon :

इति श्री स्मृतिशिरोभूषारत्न श्री शम्भुनन्दनाथपूज्यपादसेवापरायणेन श्रीगग-नानन्दनाथयोगिना विरचिते श्रीविद्याविलासे पञ्चमोल्लासः ।

401

Sl. No. 51364 श्रीसूक्तकल्पः Ms. No. P. 2349–4

Beginning :

आद्याः पञ्चदशोत्तमाङ्गनयनश्रोत्रद्वये नासिका वक्राम्भोरुह कर्णनाळभुज दन्नाभीषु गुह्यस्थले । कट्यूरुद्वयजानुयुग्मविलसज्जुष्टाभ्रिदेशेषु च श्रीसूक्तस्य सुधीः न्यसेदथ वपुष्यान्त्याः क्रमाद्व्यापिनी । श्रीसूक्तकल्पमुच्यते—

अथातः श्रीकल्पं व्याख्यास्यामः—

पञ्चम्यां शुक्लपक्षस्य पौर्णमास्यामपि वा ।

श्रीकन्दं समयं बिल्वसारमयं स्थण्डिले वा विधीयते ॥

End :

वैश्योऽपि सर्वसङ्गेषु निर्मुक्तो योगमास्थितः ।
रागादिदोषनिर्मुक्तः पुनर्योगमुपेयिवान् ॥

Colophon :

इति श्रीदेवीमाहात्म्ये त्रयोदशोऽध्यायः ।

402

Sl. No. 51367 श्रीसूक्तविधानम् Ms. No. P. 10053-62

Beginning :

श्रृणुष्व सुरथः प्राह देवीसूक्तविधिक्रमम् ।
न्यासं पूजां जपं होमं क्रमात्तद्वक्ष्यतेऽधुना ॥

देवी सूक्तपरो जपन्निति पूर्वमुक्तस्त्वत्तच्छ्रीसूक्तविधानं विविच्य कथ्यते । अस्य श्रीसूक्तस्याद्यर्चस्य श्रीः ऋषिः । अन्यासामृचामानन्दकर्दम चिक्लीत श्रीसुता ऋषयः । अद्यास्तिस्रोऽनुष्टुभः । चतुर्थी बृहती । पञ्चमीषष्ठयौ त्रिष्टुभौ ततोऽष्टावनुष्टुभः अन्त्या प्रस्तारपङ्क्तिः इति छन्दांसि । श्रीमहालक्ष्मी-र्देवता । × ×

End :

श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत् । एवं कृत्वा धीमान् गृहस्थो महदैश्वर्यमाप्नोति । कदाचिदपि दुःखं न विन्दति । सार्धलक्षजपः पुरश्चरणम् । बिल्वपत्रतिलत्रिमधुहोमेन पुरश्चरणं सिद्धिर्भवति । इति श्रीसूक्तन्यास-पूजाजपहोमविधिः सुरथवैश्यायोक्तवान् मार्कण्डेयः ।

Colophon :

इति श्रीसूक्तविधिः ।

403

Sl. No. 51372 क्ष्येकाक्षरीनन्त्रः Ms. No. P. 6128–19

Beginning :

अस्य श्रीश्यकाक्षरीमन्त्रस्य भृगुः ऋषिः । अनृचयगायत्रीच्छन्दः । श्रीर्देवता । श्रीप्रसादसिद्ध्यर्थे जपे विनियोगः .... भूयात् भूयो द्विपद्माऽभयवरदकरा ।

End :

रत्नौघासद्धमौलिर्विमलतरदुकूलात्तवालेपनाढ्या पद्मांक्षी पद्मनाभोरसि कृत वसतिः पद्मगा श्रीश्रियै नः ॥

Colophon :

॥ श्रीः ॥

404

Sl. No. 51375 श्वेतार्कगणपतिकल्पः Ms. No. P. 3902–2

Beginning :

आदौ प्रणवमुच्चार्य ततो हस्तिमुखाय च ।
लम्बोदराय उच्छिष्टशब्दाय च ततः परम् ॥
मायाश्रिया भुवं काम
शक्तिं लक्ष्मीं च अक्षरम् ।
घेघेरं ततोच्चार्य
उच्छिष्टाग्निप्रियायुतम् ॥

End :

अष्टपत्रं प्रतिदले धेधेति लिखितं तदा ।
षोडशेषु स्वरान् लिख्य ब्राह्मादीचाष्टपत्रके ॥
इन्द्रादि चतुरश्रं तु
द्वारेषु च लिखेत्ततः ॥

Colophon :

इति सिद्धेश्वरतन्त्रे उच्छिष्टगणपतिकल्पे पूजाचक्रं नाम नवमः पटलः ।

405

Sl. No. 51377 श्वेतार्कगणपतिकल्पः Ms. No. P. 4526-47

Beginning :

उच्छिष्टगणनाथस्य सर्वकामफलप्रदः ।
सर्ववश्यकरो लोके स्त्रियं च पुरुषं तथा ॥
वशं करोति राजानं स्त्रियश्च पुरुषं तथा ।
धनधान्यादिवस्त्रं च लक्ष्मी सर्वजनं तथा ॥

End :

राजा किङ्करो भवति । × मासव्यानङ्घ्रिरजसि देवं निधाय अष्टशतं जपेत् । जातिकस्तूर्यादिसुरभिद्रव्यैः सम्पूज्य या स्मरन् जपेत् । क्षणं आकर्षणो भवति ।

Colophon :

उच्छिष्टगणपतये नमः । उच्छिष्टगणेशाय नमः ।

406

Sl. No. 51379 **श्वेतार्कगणपतिकल्पः** Ms. No. P. 6583-3

Beginning :

अस्य श्री उच्छिष्टगणपतिमहामन्त्रस्य मतङ्गभगवान् ऋषिः। गायत्री छन्दः । गणपतिर्देवता । ओं गं बीजम् । स्वाहा ग्लौं शक्तिः । श्रीं क्लीं कीलकम् । इष्टार्थसिध्यर्थे जपे विनियोगः ।

End :

न विद्यते भयं किञ्चित्
स्वप्नोऽपि न कदाचन ।
राजानं च स्त्रीजनाश्च
सर्वे वश्यत्वमाप्नुयात् ॥
दर्शनादेव हसना (?)
नात्र कार्या विचारणा ॥

Colophon :

इति सिद्धशानरतन्त्रे प्रत्यक्षसिद्धिप्रदे कलौयुगे शङ्करचिते उमामहेश्वरसंवादे श्वेतार्कगणपतिकल्पं सम्पूर्णम् ।

407

Sl. No. 51394 **षडध्वविवेकः** Ms. No. P. 8032-21

Beginning :

सत्यं भूतानि शुद्धानि द्विप्रकाराणि तानि तु ।
आभ्यन्तराणि बाह्यानि देहे त्वाभ्यन्तराणि हि ॥ १ ॥
षडध्वस्थानबाह्यानि तानि शुद्धानि दीक्षया ।
देहस्थितानि भूतानि शोध्यानि स्युर्दिने दिने ॥ २ ॥

अथ दीक्षोपयुक्तानां क्रमेणैव षडध्वनाम् ।
इयत्तया समुद्देशः कथ्यतेऽत्र विभागतः ॥ ३ ॥

\+ + + + + +

End :

भुवनथसवर्णं मन्त्रमेवं पदाध्वा + क्रमवशगतितत्त्वं स्यात्कीर्तिता सा कलाध्वा ॥ ९९ ॥

पाठान्तरम्—
भुवनपदसवर्णं तत्कलातत्त्वमन्त्रं
जगतिकमलवृत्तं साब्ज पद्माब्जधारीम् ।
तदपि चरणलिङ्गे नाभिहृत्तालुरन्ध्रे
क्रमवशगतिरध्वा धार्यमेवं क्रमेण ॥ १०० ॥

Colophon :

———

408

Sl. No. 51396 षडाम्नायविधिः Ms. No. C. 2566–2

Beginning :

षडाम्नायालु ॥

आदौ शिवगुरु प्रोक्तः पश्चाच्चैव सदाशिवः ।
नमाम्यहं गुरुं भक्त्या पश्चादीशः प्रकीर्तितः ॥
रुद्रोविष्णुः समाख्यातःपश्चाल्लोकपितामहः ।
सनकश्च सनन्दश्चसनातनस्ततःपरम् ॥

End :

मूले कल्पद्रुमस्य द्रुतकनकनिभं चारुसिंहासनस्थं
वामाङ्कारूढ गौरीनिबिडकुचभराभोगगाढोपगूढम् ।
नानालङ्कारकान्तं वरवरममृगामीति हस्तं त्रिनेत्रं
वन्दे बालेन्दमौलिं गजवदनगुहापृष्टपार्श्वं महेशम् ॥
.... शिवाय नमः ॥

× × × ×

Colophon :

———

409

Sl. No. 51397 षडाम्नायमन्त्रकल्पः Ms. No. C. 2548-1

Beginning :

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमान्मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीमण्डलं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

End :

अथ वक्ष्ये महेशानि श्रीविद्यान्यासमुत्तमम् ।
संपूर्णे चिन्तयेद्विद्यां ब्रह्मरन्ध्रे ×णप्रभाम् ॥
सायुधं षोडशार्णां महासौभाग्यदां स्मरेत् । मूलमन्त्रः । ओं ह्रीं क्लीं ऐं सौः
ओं ह्रीं श्रीं कएे ईल .... ऐं क्लीं ह्रीं श्रीम् ॥ इत्युत्तराम्नायः समाप्तः ॥

Colophon :

इति षडाम्नायकल्पः समाप्तः ।

410

Sl. No. 51398 **षडाम्नायविधिः** Ms. No. C. 2567-1

Beginning:

+ लकम् । योगः । मूलेन न्यासः ।

ध्यानम्—सिन्धोः सिन्दूरवर्णं मणिमकुटलसच्चारुचन्द्रावतंसं
भालोद्यन्नेत्रमीशं स्मितमुखकमलं दिव्यभूषाङ्गरागम् ।
वामोरुन्यस्तपाणेस्तरुणकुवलयासन्दधात्मा
प्रियायाः वृत्ते तुङ्गस्तनाग्रे विहितकरतले वेदटङ्केषहस्तम् ॥

End:

प्रकाशविमर्शात्मकस्वच्छप्रकाशपरिपूर्णपरांपरमहाप्रकाशपरिपूर्णानन्दनाथ श्रीमहाभैरवीचरणनिमग्नचेतसे श्री अमुकानन्दनाथ स्वगुरवे नमः । श्रीगुरुपादुकां पूजयामि नमः ।

Colophon:

इति श्रीषडाम्नायः समाप्तः ।

411

Sl. No. 51405 **षोडशलिङ्गतोभद्रम्** Ms. No. C. 4254-8

Beginning:

प्रागुदीच्या गता रेखाः कार्याः षट्त्रिंशसंज्ञकाः ।
कोणेष्वेकपदं शुभ्रं रुद्रसंख्या च शृङ्खला ॥ १ ॥

End:

एवं रीत्या प्रकर्तव्यं लिङ्गतोभद्रषोडश ।
बाह्ये परिधिसत्वश्च रजस्तम इति क्रमात् ॥ ८ ॥
वापी समीपे द्वे पदे रक्तं पूरयते क्रमात् ॥

Colophon :

इति श्री षोडशलिङ्गतो भद्रान्तकारिका संपूर्णम् ।

शके १७५५ विजय परिवत्सर पुष्यवद्य ४ भौमवासरे । जीर्णपुष्पलता-ग्रामस्थ अग्निहोत्र्युपनामकसुब्रह्मण्यशर्मणा लिखितम् ।

412

Sl. No. 51410 षोडशीनित्याविधिः Ms. No. P. 5002-47

Beginning :

ओं ऐं ह्रीं श्रीं आं ऐं क्लीं सौं .... कामेश्वरी इच्छाकामफलप्रदे सर्वसत्त्व-वशङ्करि जगत्क्षोभकरि हुं हां .... कामेश्वरी नित्याश्रीपादुकां पूजयामि । ऐं ह्रीं श्रीं आंऐं भगभुगे भगिनि भगोदरे भगमाले भगावहे ....

End :

श्रीपादुकां पूजयामि इति मुद्रां प्रदर्श्य पुनः काकचञ्चुपुटी क्रमेण मारुतं पीत्वा हा हा इत्युच्चार्य सुषुम्ना पर्वभेदं कृत्वा ह्रां ह्रूं इति प्रबुद्धां कुण्डलिनीं द्वादशान्तं नीत्वा तत्रस्थपरमशिवेन ऐकरस्यं .... विन्यसेत् ।

Colophon :

———

413

Sl. No. 51413 संवित्सेवनमन्त्रविधिः Ms. No. P. 5002-23

Beginning :

++ ++ बाह्येऽप्यावाह्यपूर्ववत् ।
भैरवीं श्वेतवर्णानां वृद्धां मुकुटधारिणीम् ॥
पाशाङ्कुशधरां ध्यात्वा पुनः स्वस्थानमानयेत् ।

End :

इति महाघोरेश्वरविद्यया सप्तवारमभिमन्त्र्य श्रीगुरुपारम्पर्यक्रमेण श्रीगुरुपारम्पर्यक्रमेण सन्तर्पयेत् । मूलदेवता त्रिवारं हृदि सन्तर्प्य स्वनाम च आदरे पुनः स्वगुरुपादुकां त्रिवारं सन्तर्प्य तत्त्वत्रयेण स्वीकुर्यात् ।

Colophon :

॥ हिरिः ओम् ॥

414

Sl. No. 51418 संहारादिन्यासविधिः Ms. No. P. 5002–41

Beginning :

अथ प्रथमं संहारक्रमः । सबिन्दुकन्यासः । ओं उं नमः गळे । ओं ऋं नमः हृदये । ओं आं नमः नाभौ । ओं इं नमः लिङ्गे । ओं अं नमः मूलाधारे । ओं औं नमः द्वादशान्ते । ओं ओं नमः शक्त्यन्ते । ओं ऐं नमः नादान्ते ।

End :

एवंभूतलिपिं सम्यक् जानद्भर्तुर्न्यसेत् सुधीः ।
वागैश्वर्यसमृद्धः सन् वन्दितश्च सुतैरपि ।
शान्तिमेधायशस्सौख्यं शुभश्रीकृत् प्रचक्षते ॥

Colophon :

॥ हरिः ओम् ॥

415

Sl. No. 51427 सङ्कल्पसिद्धान्तः Ms. No. C. 2968–3

Beginning :

विश्वतैजसप्रज्ञासूर्यात्मक आत्म अन्तरात्मक परमात्मज्ञानात्मक + मत्स्यकूर्मवराहनारसिंहवामनभार्गवराघवकृष्णबौद्धकल्क्यात्मकसकरमध्वशास्त्रप्रतिपाद्य +

End :

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारीहिरण्मयवपुर्धृतशङ्खचक्रः ॥
उद्यदस्त्रसमायुक्तं सूर्यमण्डलमध्यगम् ।
चक्रशङ्खधरं कौस्तु – दीमियो वचः ॥

Colophon :

———

416

Sl. No. 51429 सङ्कष्टहरगणपतिमहामन्त्रः Ms. No. C. 4290–9

Beginning :

अस्य श्रीसङ्कष्टहरगणपतिमहामन्त्रस्य गृत्स ऋषिः। गणपतिर्देवता । + + सङ्कष्टहरगणपतिप्रसादसिध्यर्थे जपे विनियोगः ।

End :

ध्यानम् —
रक्ताङ्गं रक्तवस्त्रं सितसुमगणैः पूजितं रक्तगन्धैः
क्षीराब्धौ रत्नपीठे सुरतरुविमले रत्नसिंहासनस्थम् ।
दोर्भिः पाशाभयवरकरं .... चन्द्रचूडं त्रिणेत्रं
ध्यायेच्चात्यर्थमीशं हरसुतममलं श्रीसमेतं प्रसन्नम् ॥

पञ्चपूजाः । मूलमन्त्रं यथाशक्ति जप्त्वा पुनः पञ्चपूजां कृत्वा उत्तरन्यासं कुर्यात् ।

Colophon :

———

417

Sl. No. 51435 | सनत्कुमारसंहिता (गोपालमन्त्रकल्पः) | Ms. No. P. 3136–5

Beginning :

वन्दे वेदशिरोऽर्थं वसुदेवाभिजनाब्धिचन्द्रभूतम् ।
शंपासदृक्षवसनं चम्पकविपिनाधिपं सदा कृष्णम् ॥
ओं सनत्कुमारं योगीन्द्रं सिद्धाश्रमनिवासिनम् ।
ब्रह्मनिष्ठं मुनिं शान्तं प्रसन्नादित्यतेजसम् ॥

End :

नारदायोपदिश्यैवं गोपालकमहामनून् ।
सनत्कुमारो योगीन्द्रः ययौ सिद्धाश्रमाद्दिवम् ॥ १७८ ॥

Colophon :

इति श्रीमत्सनत्कुमारसंहितायां श्रीगोपालमन्त्रकल्पे पञ्चमः पटलः
सनत्कुमारसंहिता समाप्ता ।

418

Sl. No. 51438 | सन्तानगोपालकमन्त्रकल्पः | Ms. No. C. 575–8

Beginning :

सनत्कुमारसंहितायां —
अथ वक्ष्यामि गोपालसन्तानकमनुत्तमम् ।
यं भजन् लभते पुत्रं न चिरादेव मानवः ॥
देवकीसुतशब्दान्ते गोविन्दपदमुच्चरेत् ।

End :

प्राणप्रतिष्ठां कृत्वाथ अभिषेकपुरस्सरम्
धारयेद्यन्त्रमेतत्तु + + + +
आज्ञासिद्धिश्च देवेशि निग्रहानुग्रहावपि
किं पुनः साधकेन्द्रोऽसौ भोगमैच्छिकसाधनम्॥
आवयोः प्रेमपात्रं च भवत्येव न संशयः ॥

Colophon :

सनत्कुमारसंहितायां सप्तमः पटलः — इति श्रीस्मृतिशिरोभूषारत्नश्रीशम्भुनन्दनाथपादसेवापरायणेन श्रीगगनानन्दनाथयोगिना विरचिते श्रीविद्याविलासे स्नानसन्ध्यादि सूर्याद्यङ्गमन्त्रनिरूपणं नाम प्रथमोल्लासः ।

419

Sl. No. 51440 सन्तानगोपालकृष्णमन्त्रः Ms. No. P. 5657–57

Biginning :

अस्य श्री सन्तानगोपालकृष्णमहामन्त्रस्य—नारद भगवानृषिः । अनुष्टुप् छन्दः । सन्तानगोपालकृष्णः परमात्मा देवता । क्लां बीजम् । क्लीं शक्तिः । क्लुं कीलकम् । श्रीसन्तानगोपालकृष्णप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

पञ्चपूजा —

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥

देवकीसुताय विद्महे वसुदेवपुत्राय धीमहि । तन्नो कृष्णः प्रचोदयात । पुनर्न्यासः ।

Colophon :

———

420

Sl. No. 51446 सन्तानगोपालमन्त्रः Ms. No. P. 6128-38

Beginning :

अस्य श्री सन्तानगोपालमन्त्रस्य नारद ऋषिः । अनुष्टुप् छन्दः । श्रींसन्तान-गोपालो देवता । क्लीं बीजम् । ह्रीं शक्तिः । श्रीं कीलकम् । सन्तानसिद्ध्यर्थे जपे विनियोगः ।

End :

ध्यात्वापार्थयुतं लक्षं जपेत्पुत्रसमृद्धये ।
यशोदाङ्कगतं कृष्णं लम्बालकविभूषितम् ॥
पिबन्तं स्तन्यममृतं वन्दे गोपालकं हरिम् ।

Colophon :

सन्तानगोपालमन्त्रः समाप्तः ।

421

Sl. No. 51465 सन्तानगोपालमन्त्रः Ms. No. B. 1117-2

Beginning :

अस्य श्रीसन्तानगोपालमहामन्त्रस्य नारायण ऋषिः । अनुष्टुप् छन्दः । देवकीपुत्रः कृष्णो देवता । क्लीं बीजम् । श्रीं शक्तिः । ह्रीं कीलकम् । मम आयुष्मत्सुरूपसुगुणानेकसुपुत्रावास्यर्थे जपे विनियोगः ।

End :

ध्यानम् —

कृष्णं भास्वद्रथस्थं हरमरिमभयं काचिदेष्टं दधानं
श्रीक्षोणीश्लिष्टपार्श्वं कनक वलयहाराङ्गदैर्भूषिताङ्गम् ।

बालैः सङ्क्रीडयन्तं पुरविसदृशसुतानानतेभ्योऽर्पयन्तं
वन्दे वन्द्यैस्सुवन्द्यं करुणसदृदशमन्नध्वंसयन्तं मुकुन्दम् ॥

मूल—देवकीति ....

Colophon :

———

422

Sl. No. 51467 सन्तनगोपालमन्त्रः Ms. No. P. 10053-37

(सनत्कुमारोक्तः)

Beginning :

अथ सन्तानगोपालमन्त्रप्रसङ्गात् सनत्कुमारोक्त सन्तानगोपालमन्त्रो विलिख्येत ।
श्री नारद ऋषिः । अनुष्टुप् छन्दः । श्रीकृष्णो देवता । क्लां हृत् । क्लीं
शिरः इत्याद्यङ्गानि । अथवा देवकीसुतगोविन्द हृत् । वासुदेवजगत्पतेशिरः ।
देहि मे तनयं कृष्ण शिखा । त्वामहं शरणं गतः कवचम् । समस्तैरस्त्रम् ।
ध्यानम् — ———

End :

शङ्खचक्रगदापद्मं धारयन्तं जगत्पतिम् ।
अङ्के शयानं देवक्याः सूतिकामन्दिरे शुभे ॥

एवं रूपं सदा कृष्णं सुतार्थो भावयेत्सुधीः ।
देवकीसुतगोविन्द वासुदेवजगत्पते ॥
देहि मे तनयं कृष्ण त्वामहं शरणं गतः
इति मन्त्रत्रयस्य त्रिलक्षजपः ॥

Colophon :

———

423

Sl. No. 51477 सन्तानप्रजापतिमन्त्रः Ms. No. P. 4461-66

Beginning :

अस्य श्रीसन्तानप्रजापतिमन्त्रस्य प्रजापतिः ऋषिः । अनुष्टुप् छन्दः । अर्घ्यो पुत्रो देवता । ह्वामिति षडङ्गम् । ध्यानम्—अरुणकमलसंस्थो रक्तवर्णो विरिञ्चि ....

End :

विविधरुचिरभूषालङ्कृतो विश्वयोनिः ।
अभयवरकमण्डल्वक्षसूत्रान्तर्बाहु
विंदधतु भगवान् विश्वभोगान् सुपुत्रान् ॥

ओं ह्रीं नमो भगवते ब्रह्मणे प्रजापतये अष्टौ मे पुत्रा जायन्तां अक्षयंतसे स्वाहा ॥ इदं यन्त्रं ताम्रे लिखित्वा लक्षं जप्त्वा धारयेत् । सुपुत्रा भवन्ति ।

Colophon :

———

424

Sl. No. 51478 सन्तानभुवनेश्वरीमन्त्रविधिः Ms. No. C. 461-69

Beginning

स्नात्वा आचम्य —

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुरेव महेश्वरः ।
गुरुस्साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः ॥

अस्य श्रीसन्तानभुवनेश्वरीमहामन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । पितामह (हो) देवता । ह्रां बीजम् । ह्रीं शक्तिः । ह्रूं कीलकम् । मम मनसामीष्टसिद्ध्यर्थे जपे विनियोगः ।

End :

देव देव जगन्नाथ गोत्रवृद्धिकर प्रभो ।
देहि मे तनयं शीघ्रमायुष्मन्तं यशस्विनाम् ॥

उत्तरन्यासः । लोकत्रयेण दिग्विमोकः । आचम्य

Colophon :

एवं सन्तनप्रदभुवनेश्वरीमन्त्रः संपूर्णः ।

425

Sl. No. 51485 — सपर्याविधिः — Ms. No. C. 2567–2

Beginning :

सपर्याप्रारम्भः — ततोगृहप्राङ्गणैकदेशे प्रत्यङ्मुखः द्वारिस्थित्वा दहेळ्यग्रे वृत्तचतुरस्रमण्डलं मत्स्यमुद्रया कृत्वा —

अखण्डमण्डलाकारं विश्वव्यापि व्यवस्थितम् ।
त्रैलोक्यं मण्डितं येन मण्डलं तत्सदाशिवः ॥

End :

यज्ञाच्छिद्रं तपश्चिद्रं यच्छिद्रं पूजने मम ।
सर्वं सदाच्छिद्रमस्तु भास्करत्वत्प्रसादनः ॥

मूलेन षडङ्गन्यासं विधाय श्रीगुरुं ध्यात्वा प्रणमेत् । क्लीमिते निर्माल्यं शिरसि निधाय तीर्थं प्राश्य इष्टैस्सह भुक्त्वा यथा सुखं विहरेत् ॥

Colophon :

इति श्रीपूर्णानन्दनाथपादपद्मभ्रमरायमाणसुभगानन्दनाथकृता
लघुसपर्या समाप्ता ।

426

Sl. No. 51493 सप्तशतीपुरश्चरणविधिः Ms. No. B. 658-12

Beginning :

अथातः सम्प्रवक्ष्यामि पुरश्चरणमुत्तमम् ।
समाहितमनादेवि श्रृणुष्व परमप्रिये ॥
एहिकामुष्मिकार्थाय आयुषो नाशजाग्रते ।
+ + ब्रह्महत्यादिपापेभ्यो पूर्वजन्मनि वा प्रिये ॥

End :

दुर्गा मां विपदं दूरात् भक्तानां कुरुते सदा ।
दुर्गादेवीति सा प्रोक्ता सर्वोपद्रवनाशिनी ॥

Colophon :

इति श्रीदेवीरहस्ये अष्टादशोऽध्यायः ।

427

Sl. No. 51498 सप्तशतीरहस्यम् Ms. No. P. 8429-7

Beginning :

पार्वती उवाच —
देवदेव महादेव लोकानुग्रहकारक ।
मम सप्तशतीमन्त्रसंख्यां मत्प्रीतये वद ॥
ईश्वरः —
श्रृणु देवि प्रवक्ष्यामि लोकानुग्रहतत्परे ।
सद्भक्ताय सुशीलाय × × × मेश्वरि ॥

End :

द्वितीमे ऋषिवावयं स्या × देवासुरं ततः ।
अष्टषष्टिभवेछ्लोकाः मन्त्रमेकोनसप्तति: ॥
ऋषिवाक्यं तृतीय × × × × परम् ।
निहन्यमाननित्यादि मुक्षरागकुलाक्षरम् ॥

Colophon :

———

428

Sl. No. 51500 • सप्तशतीव्याख्या Ms. No. C. 4074

Beginning :

गुप्तवतीनामसप्तशतीव्याख्या प्रारम्भः ।
श्रीरामं प्रतिपुष्कराभिदमहायक्षेण वेदत्रय-
व्याख्यानवसरे विशिष्य कथितं श्रीविष्णुधर्मोत्तरे ।
एतां .... गुरूणां गुरुम् ॥ १ ॥
.... मम तु मती रचितवती
गुप्तवती नाम बिभ्रतीं विवृतिम् ॥ ५ ॥

End :

अर्थावधानसहित इति सर्वं शिवम् इति मूर्तिरहस्य व्याख्या ।
....
गुरूरेव शिरो गुरूरेव भजे
गुरूणैव सहास्मि नमो गुरवे ।
न गुरोरधिकं शिशुरस्मि गुरोः
मतिरस्तु गुरौ जय नाथ गुरो ॥ ४ ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीण ... . श्रीमद्गम्भीरराजभारती-दीक्षितात्मज भास्कररायभारतीदीक्षितमहाग्निषिता रचिता गुप्तवती समाख्या सप्तशतीव्याख्या समाप्ता ।

उवाच .... र्पणमस्तु ।

429

Sl. No. 51501 सप्तशतीव्याख्या Ms. No. C. 4138-2

Beginning :

मार्कण्डेयेन क्रोष्टकिं भागुरिं प्रति उक्तं स्तोत्रं जैमिनिप्रतिपक्षरूपैः मुनिपुत्रैः उक्तं मार्कण्डेयपुराणे तत् यथामति व्याचक्ष्महे ।

End :

भीमा शक्तिः । भ्रामरीबीजम् । सूर्यस्तवम् । उच्चाटनादौ विशेषतो विनियोग इति । तत्तु कात्यायनीतन्त्रोक्तमन्त्रविभागेन विरोधात् निर्मूल इति ध्येयम् ।

Colophon :

इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते मार्कण्डेय-पुराणान्तर्गतसप्तशत्याख्यचण्डीस्तोत्रस्य व्याख्याने चण्डीस्तोत्रप्रयोगविधिः समाप्ता ।

430

Sl. No. 51504 समयविद्या Ms. No. C. 2111-12

Beginning :

अथ समयविद्या —

वाङ्मायां कमलां चोक्तां कुमारीं च ततो वदेत् ।
ओं नमः पदमाभाष्य कामेश्वरिपदं वदेत् ।
इच्छाकामफलस्यान्ते प्रदेसर्वपदं लिखेत् ॥

End :

आमोघे भगविच्चेक्षुभः क्षोभयसर्वसत्वान् भगेश्वरि ऐं ब्लूं ज ब्लूं मों ब्लूं हें क्लिन्ने सर्वाणि भगामेवशमानय स्त्रीं हर ब्लें ह्रीं । अत्र महात्रिपुरसुन्दरी संमय-देवता ।

Colophon :

॥ ओं ॥

431

Sl. No. 51506 समयाष्टकम् Ms. No. C. 2522–113

Beginning :

ईश्वर उवाच —
कालिकानां च यत्सारं रहस्यं सर्वमागमे ।
येन विज्ञानमात्रेण प्रसन्ना परमेश्वर ॥
येन जा × × देवेश सङ्केतसमयाष्टकम् ।
तं संभाषण।देव न. कार्यं कालिको उमैः ॥

End :

विण्मूत्रं श्रोणितं क्लीबं हीनाङ्गं पिशितं सुधाम् ।
परागश्चनिके देव अष्टकं न जुगुप्सयेत् ॥
समयाष्टकलं वन्दे वीदेवी मायासुमनुवर्णितम् ।
यज्ज्ञात्वामुच्यते जन्तुजन्मसंसारबन्धनात् ॥

Colophon :

इति श्रीरुद्रयामले समयाष्टकनिरूपणम् ।

432

Sl. No. 51509 सम्प्रदायरहस्यम् Ms. No. P. 4808-2

Beginning :

विविधभजनं षट्चक्रसेवात्मकम् । धारणात्मकं चेति तत्राद्यं निरूप्यते । आधारस्वाधिष्ठाने तामसलोकत्वान्नपापास्ये । मणिपूरप्रमृतिसहस्रकमलपर्यन्तं पञ्च-चक्राणि पूज्यानि ।

End :

स्वाहाव्याकृतयोः स्वाप सुषुप्त्यवस्थासम्पन्नन साक्षी । अव्याकृतः अविद्याश-बलितं ब्रह्म । तयोरैक्यं ज्ञातव्यम् । क्षेत्रज्ञपरमात्मनोः क्षेत्रज्ञो जीवः, परमात्मा ब्रह्मस्वरूपं तयोरैक्य ज्ञातव्यम् ।

Colophon :

इति श्रीगौडपादविरचितं सम्प्रदायरहस्यम् ।

433

Sl. No. 51513 सम्मोहनतन्त्रम् Ms. No. P. 2363-7

Biginning :

अकारं सर्वदेवत्यं रक्तं सर्ववशीकरम् ।
आकारं तु पराशक्तिः श्वेतमाकरणं भवेत् ॥
इकारं विष्णुदैवत्यं श्यामं रक्षाकरं भवेत् ।
ईकारं मायाबीजं स्यात् पीतं स्त्रीणां वशीकरम् ॥

End :

हकारं ईश्वरं विद्यात् स्फटिकं सर्वसिद्धदम् ।
अणिमाद्यष्टसिद्धिश्च भुक्तिमुक्तिफलप्रदम् ॥

ळकारं मुक्तिबीजं स्यात् रक्ताभं च श्रियं × × ।
श्रीनृसिंहक्षकारं च श्वेतं सर्वंजयं भवेत् ॥

Colophon :

इति संमोहने त्रयोदशः पटलः ।

434

Sl. No. 51514 सम्मोहनरामतारकमहामन्त्रः Ms. No. C. 384-5

Beginning :

अस्य श्री सम्मोहनरामतारकमहामन्त्रस्य शक्तिसम्मोहन ऋषिः । गायत्री छन्दः । श्रीरामचन्द्रो वदेता । क्लां बीचम् । क्लीं शक्तिः । क्लं कीलकम् । मम श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

ध्यानम् —

कालाम्बोधरकान्तिकान्तमनिशं वीरासनाध्यासितं
मुद्रां ज्ञानमयीं दधानपरं हस्ताम्बुजं जानुनी ।
सीतां पार्श्वगतां सरीरुहकरां विद्युन्निभां राघवं
पश्यन्तं मकुटाङ्गदादिविविधाकल्पोज्वलाङ्गां भजे ॥

इत्यादिमन्त्रपूजा । क्लीं रामाय नमः । एवं प्रत्यहं चतुष्षष्टिवारं जपित्वा जपानन्तरं पुनः हृदयन्यासमन्त्रं कृत्वा दिग्विमोकः इति वदेत् । ततः आचमनाय ।

Colophon :

श्रीरामार्पणमस्तु ।

435

Sl. No. 51516 **सम्मोहनसुदर्शनमन्त्रः** Ms. No. P. 4862-13

Beginning :

अस्य श्रीसम्मोहनसुदर्शनमन्त्रस्य — अहिर्बुध्न्य ऋषिः । पंक्तिः — । सम्मोहनसुदर्शनो देवता । क्लीं बीजम् । स्वाहा शक्तिः । क्रों कीलकम् । मम सम्मोहनसुदर्शनप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

मनुः ओं अं क्रीं सां सीम् । सूं सें सैं सौं सः क्रीं क्रोम् । सम्मोहनसुदर्शनाय स्वाहा । पुनः हृदयादिन्यासः । पुनः पञ्चपूजा । इति दिग्विमोकः ।

Colophon :

436

Sl. No. 51529 **सर्वज्ञानोत्तरम्** Ms. No. B. 1083

Beginning :

सर्वज्ञानोत्तरे योगपादः —

एकाकिनस्तु शान्तस्य यतचित्तविरागिणः ।
युक्ताहारविहारस्य तत्त्वतः शृणुषण्मुख ॥
योध्याता यच्च तद्ध्यानं यद्वै ध्यानप्रयोजनम् ।
सर्वाण्येतानि यो वेत्ति सयोगं योक्तुमर्हति ॥

End :

सत्यं सत्यं पुनस्सत्यं त्रिसत्यं समयः कृतः ।
अतः परतरं नास्ति विज्ञेयं कुत्राचिद्गुहः ॥

विमलयति सर्वभावान् विमलात्मा विमलबुद्धिरमूढधीः ।
सर्वं गिमलं पश्यति विमलोविमलेन भावेन ॥

Colophon :

॥ हरिः ओम् ॥

437

Sl. No. 51530 **सर्वजनवश्यम्** Ms. No. P. 1759-4

Beginning :

अथ सर्वजनवश्यमाह —

एकचित्तस्थितो मन्त्री मन्त्रं जप्त्वाऽयुतद्वयम् ।
ततः क्षोभयते लोकान् दर्शनादेव साधकः ॥

End :

उत्तराभिमुखेन कूटयेत्तदुलूखले ।
तत्कालं त्रिकुटं तुल्यं अजामूत्रेण पेषयेत् ॥
छायाशुष्कं पटीकुर्यात् सा पटी रक्तचन्दनम् ॥

Colophon :

—+—

438

Sl. No. 51532 **सर्वतोभद्रकारिकामन्त्राः** Ms. No. C. 4254-3

Beginning :

कारिका —

प्रागुदीच्यागता रेखाः कुर्यादेकोनविंशतिः ।
खण्डेन्दुस्त्रिपदा कोणे श्रृङ्खला पञ्चभिः पदैः ॥ १ ॥

एकादश पदावल्ली भद्रं तु नवभिः पदैः ।
चतुर्विंशत्पदा वापि विंशतिः परिधिः कृतम् ॥

End :

प्रियङ्ग्वोदनं सोमाय ८ गविदुग्धमीशानाय ९ अन्यादेनं यथालाभं सर्वेभ्यो वा नैवेद्य शेषान्नेत दिग्बलिः ।

Colophon :

इति सर्वतोभद्रकारिकामन्त्रः समाप्तः ।

439

Sl. No. 51534 | सर्वतोभद्रचक्रम् | Ms. No. P. 8181–18

Beginning :

प्रणम्य भास्करं भक्त्या गुरुं भक्त्या समन्वितः ।
एकान्ते शुद्धदेशे च कृष्णमन्त्रं जपेद्बुधः ॥
विनायकं नमस्कृत्य सौरस्तोत्रं जपेत्पुनः ।
अथातः संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपकम् ।
विख्यातं सर्वतोभद्रं सद्यः प्रत्ययकारणम् ॥

End :

पञ्चदोषं गुरुं हन्ति षड्दोषं तु दिवाकरः ।
सप्तदोषं शशी हन्ति इति गार्ग्येण निश्चयः ॥
पञ्चमेव नव नायगे रवौ पञ्चषष्ठदशदोषमण्डलम् ।
खण्डयन्ति शतधा सहस्रजं चण्डभानुरिव मेघमण्डलम् ॥

Colophon :

॥ श्रीः ॥

440

Sl. No. 51543 **सर्वविषापहारकगरुडमन्त्रः** Ms. No. P. 4732–12

Beginning :

अस्य श्रीगरुडब्रह्मविद्यायाः प्रजापतिर्ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । भगवान् श्रीमहाविष्णुर्देवता + + +

ध्यानम्— यो विश्वत्राणभूरीतस्तनुरपि हे के ह्यः + + तः स्वरूपोऽयं
सञ्छिन्त्यैव सद्यः स्वयमृगविधूवर्गैर + + पतन्ति ।
चञ्चच्चण्डोरुतुण्डतृषितफणिवसारक्तपङ्काङ्कितस्य
वन्दे छन्दोमयं त खगपतिममलं स्वर्णवर्णं सुवर्णम् ॥

End :

अष्टौ ब्राह्मणान् ग्राहयित्वा तृणेन मोक्षयिष्यति । शते ब्राह्मणान् ग्राहयित्वा च + + मोक्षयिष्यति । स्वस्वब्राह्मणान् मनसावेक्षयिष्यति । इत्याह भगवान् ब्रह्मा ।

Colophon :

441

Sl. No. 51544 **सर्वशापोद्धारमन्त्रः** Ms. No. B. 1117–5

Beginning :

एवं शिरःप्रभृतिपादपर्यन्तं मन्त्रवर्णनेकैकशोऽङ्गेषु विन्यस्य + + सर्वशापपरिहारार्थं प्रणवसम्पुटितं मूलं त्रिवारं जपेत् ।

अस्य श्रीसर्वशापोद्धारमन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । सर्वपापविमोचनी सरस्वती देवता ।

End :

सर्वपापविमोचिन्यै नमः । मूलमुच्चार्य सर्वशापविमुक्ता भवा । ओं भूर्भुवस्सुवः । + + भूर्भुवस्सुवर्महर्जनस्तपस्सत्यं तद्ब्रह्मान्तशापो + + तीरस्योमृतं ब्रह्म भूर्भुवस्सुवरोम् ।

Colophon :

———

442

Sl. No. 51550 सहस्रचण्डीशतचण्ड्यादिनवरात्रिपूजाहोमविधिः Ms. No. B. 658-18

Beginning :

नत्वा गणेश्वरं देवीं पितरं राघवं शिवम् ।
रामकृष्णतनुजेन कमलाकरशर्मणा ॥
डामरं यामलं चैव + + + आलोक्य यत्नतः ।
सहस्रचण्डिकायाश्च शतचण्ड्यास्तथैव च ॥
नवार्णन्यासविधिना प्रयोगः प्रोच्यतेऽधुना ॥

End :

इदमेव पूजाहोमबल्यादिविधानं नवरात्रेऽपि ज्ञेयम् । विशेषस्तु मत्कृते निर्णयसिन्धौ नवरात्रिनिर्णये ज्ञेयम् ।

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारीणरामेश्वरभट्टसूरिसूनुनारायणभट्टसुतमीमांसकरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृतः सहस्रचण्डीशतचण्डीनवचण्डीनवरात्रिपूजाहोमादिविधिस्समाप्तः ।

443

Sl. No. 51551 सहस्रचण्डीशतचण्ड्यादिनवरात्रिपूजाहोमविधिः Ms. No. C. 2110–1

Beginning :

नत्वा गणेश्वरं देवीं पितरौ राघवं शिवम् ।
रामकृष्ण तनूजेन कमलाकर शर्मणा ॥

डामरं यामलं चैव योगिनीतन्त्रमेव च ।
वाराही तन्त्रमन्यांश्च ग्रन्थानालोक्य यत्नतः ॥
सहस्रचण्डिकायाश्च शतशण्ड्यास्तथैव च ।
नवार्णास्यास्यविधिना प्रयोगः प्रोच्यतेऽधुना ॥

End :

भक्तिहीनं श्रद्धाहीनं च भवतां ब्राह्मणानां च वचनात् सर्वं सम्पूर्ण मच्छिद्र-मस्त्विति प्रार्थयेत् । ततः सम्पूर्णमच्छिद्रमस्त्विति सर्वे विप्रा ब्रूयुः । ततस्तेषां मन्त्राशिषो गृहीत्वा सुहृद्युक्तो भुञ्जीत । .... नवरात्रेऽपि ज्ञेयम् ॥

Colophon:

इति श्रीमत्पदंवाक्यप्रमाणपारीण रामभट्टात्मज दिनकरभट्टानुज कमलाकरकृत सहस्रचण्डीशतचण्डीपद्धतिः समाप्तिमगमत् ।

444

Sl. No. 51554 सांख्यायनतन्त्रम् Ms. No. P. 10059-4

Beginning :

मध्ये सुधाब्धिमणिमण्टपरत्नवेद्यां
सिंहासनोपरि गतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥

End :

न वीतीरेतरोर्मूले प्रजपन्पूर्ववत्सुत ।
पुत्रवान् जायते लोके धनधान्यसमन्वितः ॥
एतन्मन्त्रजपान्मुत्री तत्तत्फलमवाप्नुयात् ।
एतदष्टाक्षरीमन्त्रं सर्वसिद्धिकरं नृणाम् ॥

Colophon :

इति षड्विद्यागमे सांख्यायनतन्त्रे त्रिंशः पटलः ।

445

Sl. No. 51556 साङ्ख्यायनतन्त्रम् Ms. No. P. 1896

Beginning :

मध्ये सुधाब्धिमणिमण्टपरत्नवेद्यां
सिंहासना ×× ×× ××
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं धृतमुद्गलवैरिजिह्वाम् ॥

(अस्त्रकल्पम्) ....
विद्या च बगळानाम्नी मुनिगुह्यं सुपावनम् ॥

End :

अन्धो भवति तच्छत्रुमण्डलात् क्रौञ्चभेदनः ।
विघ्नराजं समभ्यर्च्य रवौ रात्रौ समाचरेत् ।
त्रिसहस्रं जपेन्मन्त्रं कुक्षिरोगीभवेद्रिपुः ।
मण्डलान्म्रियते शत्रुः नात्रकार्या विचारणा ।
पयोगान्ते च संस्कारं पूजाकाले समाचरेत् ॥

Colophon :

इति साङ्ख्यायनतन्त्रं समाप्तम् ।

446

Sl. No. 51561 सांख्यायनतन्त्रम् Ms. No. B. 43

Beginning :

शुक्लाम्बरधरां शुभ्रां शुक्लाभरणसंस्थिताम् ।
वासितं फलमाप्नोतु सालोके नात्र संशयः ॥

मध्ये सुराब्धिमणिमण्डपरत्नवेद्यां
सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गी
देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥
कैलासशिखरासीनां गौर्यावामत्वसंस्थिताम् ।
भारतीपतिवाल्मीकिशेषसंवर्तमीश्वरम् ॥

End :

ऊहेन धूतपाथोथयानशय्यासनोऽपि वा ।
प्रसव्यं न जपेत्पादौ कुक्कुटासन एव च ॥
पतितानामन्त्यजानां दर्शने भाषणे कृते ।
क्षन्त्रेषोवायुगमने जृम्भणे जपतच्छृते ॥

Colophon :

इति षड्विद्यागमे साङ्ख्यायनतन्त्रे चतुस्त्रिंशः पटलः ।
सांख्यायनतन्त्रं समाप्तम् ।

447

Sl. No. 51568 साम्राज्यलक्ष्मीमन्त्रजपविधिः Ms. No. P. 4245-6

Beginning :

अस्य श्रीसाम्राज्यलक्ष्मीमन्त्रस्य निचृगायत्री छन्दः । साम्राज्यलक्ष्मीर्देवता । श्रीवीजम् । ह्रीं शक्तिः । क्लीं कीलकम् । साम्राज्यलक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः । + +

End :

+ + + + +

ध्यानम् —

पद्मस्था पद्मनेत्रा कमलयुगल + + +

भुवनमखिलं भासयन्तीं धनाढ्याम् ।

मुक्ताहाराभिरामोन्नतकुजकलशरत्नमञ्जीरकाञ्ची

ग्रैवेयाचारुहासाधृतमणिमकुटा सा श्रियै श्रीर्भवेन्नः ॥

मन्त्रः—ओं ऐं श्रीं ह्रीं क्लीं सौः जगत्प्रसूत्यै नमः ।

Colophon :

———

448

Sl. No. 51575 **सावित्रीन्यासविधिः** **Ms. No. P. 8032-18**

Beginning :

सावित्रीन्यासः —

ओं भूः तत्सवितुर्वरेण्यं, अं ओं भुवः भर्गो देवस्य धीमहि । ओं सुवः धियो यो नः प्रचोदयात् । म ओं महः परो रजसे सावदोम् । अ ओं जनः ओमापो ज्योतीरसोऽमृतम् + + +

End :

प्रत्यक्षरं प्रणवपूर्वकं नमोन्तं यथाशक्ति जप्त्वा चक्रयन्त्रोक्ताङ्गमन्त्रानन्यांश्च विशिष्टवैदिकान् पठेत् । प्राणायामत्रयं कृत्वा उपस्थायोपसंहारमुद्रां दर्शयित्वा दिग्बन्धपूर्वकं सावित्रीं सवितारं नमस्कृत्वा सम्यगुद्वास्याभिवादयेत् ।

Colophon :

———

449

Sl. No. 51580 **सिद्धदेवतामन्त्रः** **Ms. No. P. 7538-24**

Beginning :

अस्य श्री सिद्धदेवतामहामन्त्रस्य आनन्दभैरव ऋषिः । अनुष्टुप् छन्दः ।

सिद्धा देवता । अ बीजं ईं शक्तिः । कीलकम् । मम सिदेवता (?) प्रसाद सिद्ध्यर्थ्यं जपे विनियोगः । अं अं मः । ईं त स्वाहा + + +

End :

एवं हृदयादिन्यासः । ध्यानम् —

बिन्दु मुद्रां कपाल च वरदाभयहस्तकाः ।
सुत्रसन्नामहसिद्धा मे भवन्तु सुखप्रदाः ॥

मनुः—ह्रां श्रीं सौः अं महा .... सिद्ध श्रीः पाः मः । + रविविशाल-नयनाम्बा सिद्धश्री पा मः ।

Colophon :

———

450

Sl. No. 51582 सिद्धनागार्जुनतन्त्रम् Ms. No. C. 1073-1

Beginning :

विमलतिमकिरणनिकरप्रभिन्नसच्छिष्यकमलसङ्घाताः ।
सकलभुवनैकदीपाः जयति गुरुभास्कराः भुवने ॥
स्पष्टाक्षरपदसूत्रैः गुरुमतरत्नाकरात् समुध्दृत्य ।
ग्रथिता परिस्फुरन्ती निगद्यते योगरत्नमालेयम् ॥

End :

गुरुमुखतोऽधिगतं यत् शास्त्रान्तरतश्च यन्मया ज्ञातम् ।
अनुभव मार्गनित्वात् तन्मध्यात् किञ्चिदिह दृष्टम् ॥
आश्चर्यरत्नमाला नागार्जुनविरचिताऽनुभवसिद्धा ।
सकलजनहृदयहिता समर्थिता सूत्रतो जयति ॥

Colophon :

इति नागार्जुनविरचिता योगरत्नावली समाप्ता ।

451

Sl. No. 51583 **सिद्धनागार्जुनतन्त्रव्याख्या** **Ms. No. C. 1073-2**

Beginning :

गुरुचरणममलं प्रणम्य नागार्जुनप्रणीतायाः ।
विवृतिं सुखावबुद्ध्यै वक्ष्येऽहं योगरत्नमालायाः ॥

इह शास्त्रारम्भे नागार्जुनपादाः शिष्टसमयपालनार्थं शास्त्रस्योपादेयतां दर्शयितुं गुरुपादनुतिं कुर्वन्तः । प्रथमार्यामाहुः विमलेति विमलाम् —

End :

आत्मस्मरणाय मया विवृतानागार्जुनप्रणीतेयम्
आश्चर्यरत्नमाला अग्रेतनतन वृद्धटीकानः ।
श्रीमन्नृपविक्रमसये द्वादशीनवषड्भिरङ्कितेवर्षे
रचिता गुणाकारेण श्वेताम्बरभिक्षुणा विवृतिः ॥

Colophon :

इति सिद्धघटीयश्वेताम्बरविरचिता योगरत्नमालालघुविवृतिः समाप्ता ।

452

Sl. No. 51587 **सिद्धमूलिकामन्त्रविधानम्** **Ms. No. P. 8714-21**

Beginning :

अस्य श्रीसिद्धमूलिकामन्त्रस्य सिद्धानन्दभैरव ऋषिः । अमृतविराट् छन्दः । सिद्धमूलिका देवता । ऐं बीजम् । सौः शक्तिः । क्लीं कीलकम् । सिद्ध-मूलिकाप्रसादायोगः । बीजशक्तिकीलकैः हृदयादिन्यासं कृत्वा ।

ध्यानम् –

End :

ऐं क ४ ह ५ सौः सं ९ सर्वतत्वेन उपीनवकार्मिकमायिकमलशोधनार्थं स्थूलसूक्ष्मकारणात्मकमहाकारणशरीरं शोधयामि जुहोमि स्वाहा ।

Colophon :

इति प्रथमद्रव्यशोधनविधिः ।

453

Sl. No. 51589 सिद्धरसायनविधिः Ms. No. P. 4925–133

Beginning :

ईश्वर उवाच —

गोमूत्रं हरितालं च गन्धकं च मनश्शिलाम् ।
समं समं गृहीत्व तु यावच्छुलष्यति पेषयेत् ॥
एकादशदिनं यावद्यत्वे न परिरक्षयेत् ।
मन्त्रेण धूपदीपादिनैवेद्यैर्दुग्धशर्करैः ॥

End :

यस्मै कस्मै न दातव्यं श्रीहरिशिवभक्तिमान् ।
अग्निगोजद्विजातीनां याचकानां विशेषतः ॥
गोप्यं गोप्यं महागोप्यं देवानामपि दुर्लभम् ।
वर्षं प्रति त्रयं कृत्वा गोप्यं नैव प्रकाशयेत् ॥
वनितापुत्रमित्रादिगोप्यं सिद्धिप्रदायकम् ।

Colophon :

इति दत्तात्रेयतन्त्रे त्रयोदशः पटलः ।

454

Sl. No. 51590 **सिद्धलक्ष्मीमन्त्रः** Ms. No. P. 9644-51

Beginning:

अस्य श्री सिद्धलक्ष्मीमहामन्त्रस्य त्रिलोचन ऋषिः । अतिजगती छन्दः । श्री सिद्धमहालक्ष्मीर्देवता । श्रीं बीजम् । हृल्लेखा शक्तिः । ओं परमहंसिनी ओं निर्वाणमार्गदेवी । ओं विषोपप्लवनाशिनी ।

End :

सरसुरीहेन हेमेन साम्राज्यं लभते नरः ।
ब्रह्मवक्षसमिद्धोम ब्रह्मश्रियामप्नुयात् ॥
आयुषेदूर्वहोमेस्याद्वटहोमेन वज्रिणा ।
उदुम्बरसमिद्धोमात्पुत्रस्यादुत्तमोत्तमः ॥

Colophon :

455

Sl. No. 51601 **सिद्धारिचक्रम्** Ms. No. P. 5002-13

Beginning :

अद्याग्निरुद्रग्रहनेत्रवेद
रविर्दिशत्पूर्वसुषोडशेषु ।
मन्वन्तरे भानुतुरङ्गवासराः
त्रयोदशाःस्युः पदवर्णमालिखेत् ॥
नामाद्यक्षरमारभ्य यावमन्त्रादिवर्णतः ।
सिद्धसाध्यसुसिद्धारीन् प्रादाक्षिण्येनयोजयेत् ॥

End :

मन्त्रादिषु च सर्वेषु हृल्लेखा कामबीजकम् ।
श्रीबीजं वापिनिक्षिप्य जपेन्मन्त्रं विशुद्धये ॥
तारं संपुटितोवाथ दुष्टमन्त्रोऽपि सिद्ध्यति ।

Colophon :

॥ हरिः ओम् ॥

456

Sl. No. 51609 सिद्धारिपरीक्षानिषेधः Ms. No. P. 4925-23

Beginning :

तत्रापवाद उच्यते —
प्रणवस्त्र्यक्षरी माया व्योमव्यापीषडक्षरः ।
प्रसादो बहुरूपी च सप्तसाधारणाः स्मृताः ॥
सौरमन्त्राश्च येऽपि स्युर्वैष्णवा नारसिंहकाः ।
सिद्धसाध्यसु सिद्धारि विचारपरिवर्जिताः ॥

End :

वैदिकस्य च मन्त्रस्य सिद्धारिर्नैव शोधयेत् ।
+ + + + पञ्चाक्षरस्य च ।
स्वप्नदत्तस्य मन्त्रस्य सिद्धारिर्नैव शोधयेत् ॥
एकद्वित्र्यादिबीजस्य सिद्धारिर्नैव शोधयेत् ।
+ + + +
तारसम्पुटितो वाथ दुष्टमन्त्रोऽपि सिध्यति ॥

Colophon :

———

457

Sl. No. 51610 **सिद्धारिपरीक्षाविधिः** Ms. No. P. 4925–21

Beginning :

अथ सिद्धसाध्यसुसिद्धारिपरीक्षार्थं कोष्ठोद्धारक्रमः कथ्यते । तत्र चतुष्पद-युक्तकोष्ठचतुष्टयं कृत्वा तत्र कोष्टचतुष्टयाद्यपदेपु चतृषु प्रादक्षिण्यक्रमेण अकारादि स्वरचतुष्टयं विलिखेत् । + +

End :

सिध्यत्यतीवकष्टेन साधकस्य च नान्यथा ।
रिपुणान्तरितं सिद्धं सुसिद्धं च तथा त्यजेत् ।।
रिपुणान्तरितो मन्त्रो नैव ग्राह्यः कदाचन ।।

Colophon :

———

458

Sl. No. 51614 **सिद्धिप्रदीपः** Ms. No. P. 1664–7

Beginning :

नमस्कृत्वा जगन्नाथं उमां लोकैकधारिणीम् ।
सिद्धिप्रदीपिकाशास्त्रे टीकां व्याकुर्महे वयम् ॥

ओं ह्रीं ऐं + आनन्दना + + + श्रीपादुकां पूजयामि इति गुरुचतुष्टयं सन्तर्प्य । + + + +

End :

तेजांसि च तमस्ये तद्वंद्वे ज्योतिरनुत्तरम् ।
इत्यनुत्तराम्नाय गुरून् भ्रूमध्येन श + + + पूजयेच्च ॥

ये नाथादिगुरुत्रयं गणपतिं × × त्रयं भैरवं
सिद्धौघं बटुकत्रयं पदयुगं दूतिक्रमं मन्द + +
× चिराद्वि(?)यष्टचतुष्कपष्टिनवकं वीरावळी पञ्चकं
श्रीमन्ममालिनिमन्त्रराजस(?)वितं वन्दे गुरोर्मण्डलम् ॥

Colophon :

———

459

Sl. No. 51617 सीतामन्त्रः Ms. No. P. 5657–51

Beginning :

अस्य श्रीसीतामन्त्रस्य जनक ऋषिः । दैवी गायत्री छन्दः । सीता देवता । श्री बीजम् । ओं स्वाहा शक्तिः । आयती कीलकम् । श्रीसीताप्रसादसिद्धयर्थे जपे विनियोगः ।

End :

सीतां चम्पकगौराङ्गीं श्वेतवस्त्रविभूषिताम् ।
सर्वाभरणसंयुक्तां रामालोकनतत्पराम् ॥

पञ्च पूजा मनुः । श्रीसीतायै स्वाहा । पुनर्न्यासः । दिग्विमोकः ।

Colophon :

———

460

Sl. No. 51620 सीतारामसमन्त्रः Ms. No. P. 10053–22

Beginning :

अथ सीतारामसमन्त्रो लिख्यते । सुयज्ञ ऋषिः । जगती छन्दः । सीतारामो

देवता । श्रीं बीजम् । स्वाहाशक्तिः । ओं क्लीं हृत् । श्रीं श्री शिरः । रां रामाय नमः । शिखा श्रीं सीतायै स्वाहा × कवचम् ।

× × × × × ×

End :

मन्त्रः—ओं क्लीं श्रो रां रामाय नमः । श्रीं सीतायै स्वाहा । रां श्री श्री क्लीं ओं इति मन्त्रः ।

एकविंशतिवर्णोऽयं भुक्तिमुक्तिप्रदो नृणाम् । षडक्षरोक्तवत् जपपूजादिकम् ।

Colophon :

———

461

Sl. No. 51622 सुखप्रसवयक्षिणीमन्त्रः Ms. No. P. 4922–35

Beginning :

सुखप्रसवयक्षिणीमन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । यक्षिणी देवता ।
हिमवत्युत्तरे पार्श्वे सुरता नाम यक्षिणी ।
तस्यानुपुरशब्देन विशल्या भवतु गर्विणी ॥

End :

अष्टोत्तरशतं वा भिमन्त्र्य तत्तैलं प्रसववेदनासमये स्त्रियः पाययेत् शीघ्रं प्रसोष्यते ।

Colophon :

———

462

Sl. No. 51624 सुखप्रसूतिमन्त्रः Ms. No. P. 4868–31

Beginning :

सुखप्रसूतिकि ।

नीळ्लाडवेनिवारि उदकं मन्त्रं चेमन्त्रम् । ओं नमो भगवते अंबिका ।

हूँ झँ र्पर्तेमृतं भवेत् । अमृतवेषिणि शीघ्रप्रसूतिं कुरु कुरु स्वाहा । फट् स्वाहा । यीमन्त्रान —

End :

चित्रमूलं कषायं तो २ वोक दिनं मर्धिचेदि । निम्मपुल्लु सुनपकदिनं अल्ल-पुरसान पकदिनं मर्दिचेदि । मिनुपर्गि जलंतददुकालुचेशि अनुपान .... योगाल्लु मानुनु ।

Colophon :

———

463

Sl. No. 51626 दर्शनकल्पः Ms. No. P. 3232

Beginning :

अम्बरीष उवाच —

नमो मुनिवरश्रेष्ठ सर्वशास्त्रविशारद ।
कुम्भोदरसमुद्भूत श्रोतुमिच्छामि तत्त्वतः ॥

के देवाः केच ऋषयो मन्त्रसिद्धिर्भवेत्पुरा ।
किं पुराश्चर्यं किं साध्यं का पूजा किं फलं भवेत् ॥

× × × × ×

सुदर्शनस्य माहात्म्यं प्रसादं कुरु सर्वतः ।

× × × × ×

End :

चक्रजन्मरहस्यार्थं × × × रमाने ।
शृणोति यः + + + पातकानां विशेषतः ॥

ज्ञानवान् बलवान् वाग्मी अरोगीश्रियमाप्नुयात् ।
यान् यान् क्रमान् पठेन्नित्यं तांस्तानाप्नोति शाश्वतम् ॥

Colophon :

इति श्रीपाञ्चरात्रे विहगेन्द्रसंहितायां तन्त्ररहस्ये अगस्त्यप्रोक्ते श्रीसुदर्शनकल्पे मोक्षोपायविधानो नाम चतुर्विंशतिः पटलः ।

464

Sl. No. 51630 सुदर्शनकल्पसारसमुच्चयः Ms. No. P. 326-5

Beginning :

दृप्तास्याप्रान्तरिक्षक्षरदरिणनिभाभासितान्तराला-
दंष्ट्रानिस्यूतवह्निप्रसरलब्हुलादभ्रशुभाट्टहासम् ।
शङ्खारीश्रीगदांभोरुहमुसलटानष्पांशदीप्तां कृशाङ्कैः
दोर्भिः पिंगांक्षकेशं प्रणमतशिरसा विष्णुचक्राभिधानम् ।
सुदर्शनस्य मन्त्रस्य कल्पसारसमुच्चयम् ।
करिष्यामि समासेन यथादृष्टं यथा श्रुतम् ॥

End :

चक्रशङ्खौचचापं परशुमयिमीशं शूलपाशं कृशाब्जं
बिभ्राणं वज्र + + हलमुससगदाकुन्तमत्युग्रदश्री ।
ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं भारकेयूरभृशं
ध्यायेत् षट्कोणसंस्थं सकलरिपुजनप्राणसंहारचक्रम् ॥

Colophon :

इति सुदर्शनकल्पसारसमुच्चये चतुर्विंशोऽध्यायः ।

465

Sl. No. 51631 सुदर्शनकवचम् Ms. No. P. 6712-1

Beginning :

ओं सिंहासने समासीनं देवेन्द्रं त्रिदशेश्वरम् ।
श्रोतुं चक्रस्य कवचं सुधर्माभगमन् सुराः ॥

देव देव सहस्राक्ष दैत्यान्तकशचीपते ।
त्वत्तः सौदर्शनीं विद्यां श्रोतुकामास्महे वयम् ॥

End :

षट्कोणान्तरतामध्यनिलयं सद्वेददंष्ट्राननम् ।
चक्राद्यायुधधारिषोडशभुजैः सज्वालकेशोज्ज्वलम् ।
वस्त्रालेपनमाल्यविग्रहगुणैस्तं बन्धमित्राणां
प्रत्यालीढपदाम्बुजं त्रिणयनं चक्राधिराजं भजे ॥

Colophon :

———

466

Sl. No. 51633 सुदर्शनचक्रमन्त्रयन्त्रविधिः Ms. No. P. 4461–92

(ओंसहस्रारहुं फट् । इति मूलमन्त्रः)

Beginning :

अहिर्बुध्न्यः अनुष्टुप् सुदर्शनं हरिः ।
अचक्राय विचक्राय सुचक्राय तथैव च ।
विचक्राय सुचक्राय ज्वालाचक्राय वै क्रमात् ॥
षडङ्गेषु तु विन्यस्य पश्चाद्ध्यानं समाचरेत् ।

End :

कल्पान्तार्कप्रकाशं त्रिभुवनमखिलं तेजसापूरयन्तं
रक्ताक्षं पिङ्गकेशं रिपुकुलभयदं भीमदंष्ट्राट्टहासम् ।
चक्रं शंखं गदब्जं पृथुतरमुसलं चापपाशांकुशाद्यान्
बिभ्राणं दोर्भिराद्यं मनसिमुररिपुं भावयेचक्रसंज्ञम् ॥

इति ध्यानम् । ओं नमो भगवते महासुदर्शनाय हुं फट् इति षोडशाक्षर मनुः ।

षट्कोणबिन्दुमध्यस्थं कोणमध्ये सुदर्शनम् ।
त्रयोदशेन संवेष्ट्य तद्बाह्ये दशपञ्चकम् ।

दशाष्टाक्षरविन्यासं त्रिधा पाशेनवेष्टितम् ।
कर्णिके साध्यनामानि आज्ञाचक्रं प्रकीर्तितम् ॥

Colophon :

————

467

Sl. No. 51636 सुदर्शनज्वालामन्त्रविधिः Ms. No. P. 4868–34

Beginning :

अस्य श्रीसुदर्शनज्वालाचक्रविंशतिमन्त्रस्य अहिर्बुध्न्यो भगवान् ऋषिः । प्रस्तारपंक्तिः छन्दः । सुदर्शनो देवता । क्ष्रौं बीजम् । स्वाहाशक्तिः । ओं कीलकम् । सुदर्शनप्रयोगः ।

End :

शङ्खचक्रधरं देवं ज्वालाचक्रमयं हरिम् ।
रोगघ्नं परमानन्दं चिन्तितार्थप्रदायकम् ॥
हृत्पङ्कजे समासीनं ज्वालाभयसुदर्शनम् ।
शङ्खचक्राब्जगदया भूषितं रोमनाशनम् ॥

Colophon :

॥ ओम् ॥

468

Sl. No. 51637 सुदर्शनदिग्बन्धनविधिः Ms. No. P. 4925–104

Beginning :

अथ वक्ष्यामि सौवीर दिग्बन्धविधिमुत्तमम् ।
इन्द्रादिदशदिग्भागान् बन्धयेत्तत्पृथक् पृथक् ॥
यो मे पुरस्तात्पाप्मा पावकेनेह कर्मणा ।

इन्द्रस्त्वं देवो राजा जम्भयतु स्तम्भयतु मोहयतु + + + +

End :

कान्तारे प्राणसन्देहे विषवह्नि ज्वरेषु वा ।
राजा + भ्यस्समुत्रासे ग्रहरोगादिपीडिते ॥
सूर्योदये यथाकाशात्तमोऽभ्येति महत्तरम् ।
तथा संस्मरणे तस्य विनाशं यान्त्युपद्रवाः ॥

Colophon :

इति विहगेन्द्रसंहितायां दिग्बन्धनं नाम षोडशोऽध्यायः ।

469

Sl. No. 51647 सुदर्शनमन्त्रः Ms. No. P. 6128-47

Beginning :

अस्य सुदर्शनषडक्षरीस्तोत्रमहामन्त्रस्य अहिर्बुध्न्यो भगवान् ऋषिः । अनुष्टुप् छन्दः । श्रीसुदर्शनो देवता .... कल्पन्तकार्कप्रकाशः ।

End :

ओं सुदर्शनायविद्महे यन्त्रराजाय धीमहि
तन्नश्चक्रः प्रचोदयात् यन्त्रराजाय विद्महे ।
मन्त्रराजायधीमहि तन्नो यन्त्रः प्रचोदयात् ॥

Colophon :

॥ श्रीः ॥

470

Sl. No. 51652 सुदर्शनमन्त्रसमुच्चयः Ms. No. P. 4977-66

Beginning :

अस्य सुदर्शननारसिंहमन्त्रस्य ब्रह्मा ऋषिः । देवी गायत्री छन्दः । + इष्टार्थसिध्यर्थे विनियोगः । + +

शंखं चक्रं सचापं परशुमसिमीषून् शूलपाशांकुशाग्निं
विभ्राणं वज्रखेटं हलमुसलगदाकुन्तमत्युग्रदंष्ट्रम् ।
ज्वालाकेशं त्रिणेत्रं ज्वलदनलनिभं हारकेयूरभूषं
ध्यायेत् षट्कोणसंस्थं सकलरिपुजनप्राणसंहारचक्रम् ॥

End :

वेदमन्त्रः — ध्रुवोऽसि मानस्तोके । त्रीणि पदा ज्वालामाला विश्वतश्चक्षुः वृक्षो न भीमः । भीषास्मात् । भद्रं कर्णेभिः त्र्यम्बकम् । ओं नमो ब्रह्मा आद्य ज्वलति ॥

Colophon :

———

471

Sl. No. 51656 सुदर्शनमुद्रावैभवम् Ms. No. P. 3121-16

Beginning :

हिरण्यगर्भः समवर्तताग्र इति ।
ओं अहं रुद्रेभिरिति । शं + गाया स्वाहेति । उदुत्तममितिवरुणायस्वाहेति ।
गौरीमिमायेति + कद्रुद्रायेति प्रजापतिशब्दरुद्राय ....

End :

स्तन्यपानयुतानां तु शिशूनां तु विशेषतः ।
तप्तचक्रं धारयित्वा दीर्घायुष्यं च विन्दति ॥
पाकशुद्धिनिमित्तं वै व्यध(?)वानां विधीयते ।
कृत्वा पापं न चाप्नोति पूजां भवति सर्वदा ।
उमामाह हरस्सर्वं चक्रमुद्रादिवैभवम् ॥

Colophon :

इति सुदर्शनसंहितायां एकविंशोऽध्यायः ।

472

Sl. No. 51658 सुदर्शनयन्त्रविधानम् Ms. No. P. 4925–112

Beginning :

सुदर्शनाख्ययन्त्रस्य षट्कोणं विलिखेत्ततः ।
वृत्तं चैवाष्टकं पत्रं वृत्तद्वादशपत्रकम् ॥
वृत्तं च षोडशारं च वृत्तं विंशषत्रकम् ।
चतुर्विंशतिसंख्यातदलवृत्तं लिखेत्क्रमात् ॥
+ + + + +

End :

त्रीणि नामाति नमोन्तानि विलिख्य अस्य प्रकारः—आं ह्रीं क्रों ऐं क्लीं सौः केशवाय नमः । नारायणाय नमः । माधवाय नमः । ऐं क्लीं सौः आं ह्रूं क्रों फट् इति क्रमः । तृतृयभूणुरे ह्रों क्लीं सौः श्रीं ऐं स्वाहा । आं ह्रीं क्रीं क्रों वषट् इत्यष्टदिक्षु विलिख्य यन्त्रदशाङ्गानि विलिखेत् ॥

Colophon :

————

473

Sl. No. 51663 सुदर्शनशडक्षरीमन्त्रः Ms. No. P. 6128-49

Beginning :

अस्य श्रीसुदर्शनषडक्षरीमहामन्त्रस्य अहिर्बुध्न्यो भगवानृषिः । विराट् गायत्री च्छन्दः । श्रीसुदर्शनमहाविष्णुर्देवता । रं बीजम् ....

End :

रक्षां करोतु सर्वात्मा सर्वत्र विजयी भवेत् ।
भूतशुद्धिः मानसाराधनम् । जपः । कवचस्तोत्रादिपारायणम् ।

Colophon :

————

474

Sl. No. 51666 सुदर्शनषडक्षरीमन्त्रः Ms. No. P. 3400-10

Beginning :

अस्य श्रीसुदर्शनषडक्षरीमहामन्त्रस्य अहिर्बुध्न्यो भगवान् ऋषिः । अनुष्टुप् छन्दः । श्रीसुदर्शनो देवता । + + ध्यानम् —

शङ्खं चक्रं च चापं परशुमसिमिषुं शूलपाशौ कुठारं
बिभ्राणं वज्रखेटौ हलमुसलगदाकुन्दमत्युग्रदंष्ट्रम् ।
ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषं
ध्यायेत् षट्कोणचक्रं सकलरिपुजनप्राणसंहारिचक्रम् ॥

End :

षट्कोणान्तरमध्यदेशनिलयं सश्वेतदंष्ट्राननं
चक्राद्यायुधचारुषोडशभुजं सज्वालकेशोज्वलम् ।
वस्त्रालेपनमाल्यनिग्रहगणैः सत्फालमित्रानलं
प्रत्यालीढपदाम्बुजं त्रिनयनं चक्राधिराजं भजे ॥

पञ्चपूजां कृत्वा—ओं सहस्रारहुं फट् इति मूलम् । पुनर्न्यासं ध्यानम् ।

Colophon :

— — — —

475

Sl. No. 51670 सुदशनसंहिता Ms. No. P. 4900-1

Beginning :

पार्वत्युवाच —

जय शङ्कर सर्वात्मन् नीलकण्ठ नमोऽस्तु ते ।
कुमेवत्संशयं(?)चास्ति वक्तुमर्हसि तत्प्रभो ॥

पुरा नारायणस्साक्षादवतीर्य युगे युगे ।
संहृत्यासुररक्षांसि महाबलपराक्रमः ॥
ईश्वर उवाच —
नरनारायणं नत्वा स्थित्वा तस्याज्ञया मया ।
पञ्चायुधानां मध्ये तु चक्रराजोऽब्रवीद्वचः ॥
नारायण उवाच —
संहिता तव नाम्ना च शृणु सुदर्शनेश्वर ।
सर्वेषां संहितानां च मध्ये श्रेष्ठतरं भुवि ॥

End :

यथा माहिष्मतीनाथस्तथायं मारुतात्मजः ।
उभयोरन्तरं नास्ति सत्यं शङ्करभाषितम् ॥

Colophon:

इति श्रीसुदर्शनसंहितायां हनुमद्दीपविधिर्नाम विंशतिः पटलः ।

476

Sl. No. 51676 सुन्दरकाण्डपारायणमहामन्त्रविधिः Ms. No. P. 10053-63

Beginning :

अस्य श्रीसुन्दरकाण्डमहामन्त्रस्य वाल्मीकिर्भगवान् ऋषिः । अनुष्टुप् छन्दः । श्री आञ्जनेयो देवता । ततो हि ववृधे गन्तुं दक्षिणो दक्षिणां दिशि रामिति बीजम् । ववृधे रामकार्यार्थे समुद्र इव पर्वसु इति शक्तिः । सर्वथा-कृतकार्योऽहमेष्यामि सह सीतया इति कीलकम् । इष्टार्थसिद्ध्यर्थे जपे विनि-योगः । ततो रावणनीतायाः अं । सीतायाः शत्रुकर्षणः । इयेष पदमन्वेष्टुं चारणाचरिते पथि । करतल एवं हृदयादिन्यासः

End :

सिद्धिं मे संविधास्यन्ति देवाः सर्षिगणास्त्विह ।

एतदादिश्लोकत्रयपर्यन्तं त्रिवारं पठित्वा अष्टादशाक्षरमन्त्रं मनसा स्मृत्वा श्रीरामसान्निध्यं भावयन् र् रि रौ द खं डं-रन्यतरं संख्याकक्रमेण नक्ताशी वा हविष्याशी ब्रह्मचारी पारायणं कुर्यात्, ... श्लोकसंख्या चोक्ता भारद्वाजसंहितायाम् ।

मैनाकानुरूपाख्यशिह + + + सिद्धिं मे संविधास्यन्ति देवाः +

सिद्धिं सर्वाणि भूतानि भूतानां चैव यः प्रभुः ।

दास्यन्ति मम ये चान्ये ह्यदृष्टिपथगोचराः ॥

Colophon :

———

477

Sl. No. 51686 सुब्रह्मण्यमन्त्रसमुच्चयः Ms. No. P. 3400–11

Beginning :

अस्य श्रीसुब्रह्मण्यषडक्षरीमहामन्त्रस्य अमृताकर्षणदक्षिणामूर्तिः ऋषिः । देवी गायत्री छन्दः । श्रीवल्लीदेवसेनासमेतसुब्रह्मण्यपरमगुरुर्देवता । + + मनुः— ओं ह्रीं शरवणभव ।

End :

व्याख्यानमुद्रासहितं विद्यापुस्तकधारिणम् ।

पद्मासनस्थं षड्वक्त्रं भुजद्वादशसंयुतम् ॥

+ + + +

श्वेताम्बरधरं देवं श्वेतमाल्याद्यलंकृतम् ।

शान्तः × × × न्देवं किञ्चित्प्रहसिताननम् ॥

ओं श्रीं क्लीं ह्रीं ऐं गं ळं ई शरवणभव ।

Colophon :

———

478

Sl. No. 51689 सुभगोदयपद्धतिः Ms. No. B. 232

Beginning :

इत्थं न्यस्ततनुर्भूत्वा सिन्धूररञ्जितं चक्रराजं समालिखेत् ।
अथ वा हेमरौप्यारिपट्टे चक्रं विलिख्य तु ।
स्थापयेत्पुरतः पीठे रक्तचन्दननिर्मितम् ॥
चञ्चशक्तिश्चतुर्वह्नि तद्विलासात्मकं परम् ।
ऋज्वाकृति यथा चक्रं तथा कुर्यात्समाहितः ॥

End :

इदन्तारूपं हव्यं परिपूर्णाहन्तामये संविदग्नौ मुहुर्मुहुर्जुह्वन् परिच्छिन्नदेहप्राण-बुद्धिशून्यविमुक्तमात्मानं देवताभावमनुसन्दधानः सुखी भूयात् । इति शम् ।

Colophon :

सुभगोदयपद्धतिस्समाप्ता ।

479

Sl. No. 51690 सुरेन्द्रसंहिता Ms. No. B. 258

Beginning :

सर्वशृङ्गारशोभाढ्यां तुङ्गपीनपयोधराम् ।
गङ्गाधरप्रियां देवीं मातङ्गीं नौमि सन्ततम् ॥ १ ॥

पार्वत्युवाच —

नमस्ते देवदेवेश जय पन्नगकङ्कण ।

एतन्मतङ्गविद्याश्च वायुत्वादक्षणस्तु(?)वा ।

स्पष्टतो वद सर्वेश कुर्या(?)तद्गोपनं मुदा ॥ २ ॥

End :

करञ्जबीजं जुहुयात् अयुताद्व्याधितो रिपुः ।

न वक्तव्यं न वक्तव्यं न वक्तव्यं कदाचन ॥ २६ ॥

तन्मध्ये चार्चनामार्गं प्राणैः कण्ठगतैरपि ।

Colophon :

इति सुरेन्द्रसंहितायां पञ्चशास्त्रागमे श्यामलाकल्पे त्रिशत्पटलः ।
सुरेन्द्रसंहिता समाप्ता ।

480

Sl. No. 51694 सुवर्णाकर्षणमन्त्रविधिः Ms. No. P. 5852–18

Beginning :

शुभमस्तु ।

अस्य श्रीसुवर्णाकर्षणमन्त्रस्य दूर्वासऋषिः । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । मम सुवर्णाभे × प्रसादसिद्ध्यर्थे जपे विनियोगः । आदोप × शुद्धिं कृत्वा —

End :

व्याप कृत्वाकं न्यासम् —

ओं महाभैरवाय अंगुष्ठाभ्यां उपरिस्तरणीय तर्जनीभ्याम् । अजामलगराय मध्यमाभ्यां लोकेश्वराय .... अजामलगराय लोकेश्वराय सुवर्णाकर्षणाय मम दारिद्र्यापहाराय क्रों ह्रीं आं ओम् ।

Colophon :

हरिः ओं शुभमस्तु ।

481

Sl. No. 51696 सूर्यचन्द्रव्रतकल्पः Ms. No. P. 5046

Beginning :

पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरङ्गवाहः ।
दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ॥
'यदद्यसूर्यंबुवोनागा' इति ध्यानम् ।
जटिलं हेममालाढ्यं शक्तिस्वस्तिकधारणम् ।

End :

सूतः —

इति प्रोक्तं शङ्करेण पार्वत्याहितकाम्यया ।
कृत्वेदं सुव्रतं विप्र सर्वान् कामान् अवाप्स्यसि ॥
ये श्रृण्वतीदमाख्यानं पठन्ति श्रद्धयान्विताः ।
ते सर्वे पापनिर्मुक्ताः यास्यन्ति परमां गतिम् ॥

Colophon :

इति श्रीउमामहेश्वरसंवादे सूर्यचन्द्रव्रतकल्पं संपूर्णम् ।

482

Sl. No. 51709 सूर्यमन्त्रोद्धरणम् Ms. No. P. 7916–1

Beginning :

सौवर्णं रजतं ताम्रं सूर्यमण्डल × × × कृतिम् ।
जले वापि स्थले वापि पद्ममष्टदलं लिखेत् ॥

वृत्तं त्रिकोणवृत्तं च × × णं वृत्तयुग्मकम् ।
वृत्तं चाष्टदलं पद्मं केसरं कर्णिकावृतम् ॥

End :

त्रैकोणोदरतारशक्तिविलसत्कोणेषु मायोल्लसत्
कोणाग्रस्थितमष्टपत्रविलसत्संयुक्तमष्टाक्षरम् ।
मध्ये मातृकवृत्तकं कुवलयं वेदादिमायाकृतं
यन्त्रं शुद्धविषग्रहग्रहहरं सौरं समस्ताक्षरम् ॥

Colophon :

———

483

Sl. No, 51710 सूर्यषोडशाक्षरीमन्त्रविधिः Ms. No. P. 8106-13

Beginning :

अस्य श्री सूर्यषोडशाक्षरीमहामन्त्रस्य ब्रह्मा ऋषिः । ऋग्यजुस्साम छन्दः । श्रीसूर्यनारायणो देवता । घृणिरिति बीजम् । सूर्य इति शक्तिः । आदित्य इति कीलकम् ।

End :

तत्र चाग्निं प्रतिष्ठाप्य हुत्वा चाष्टोत्तरं शतम् ।
देवीमावाह्य संपूज्य धारयेत्तान्त्रिकां मतः ॥
शुभाशुभं विलिख्याथ तत्सर्वं वाचयेत्ततः ।

Colophon :

इति सूर्यमन्त्रः । हरिः ओम् ।

484

Sl. No. 51716 सौपर्णम् Ms. No. P. 7758-3

Beginning :

यो विश्वप्राणभूतस्तनुरपि च हरेर्या नृकेतुस्वरूपो
यं सञ्चिन्त्यैव सन् यः स्वयमुरगवधूवर्गगर्भाः पतन्ति ।
चञ्चच्चण्डोरुतुण्डस्फुटितफणिफणारक्तपङ्काङ्कितास्यं
वन्दे छन्दोमयं तं खगपतिममलं स्वर्णवर्णं सुपर्णम् ॥

अथास्य सौपर्णाख्यानस्य नानाछन्दांसि । शम ऋषिः । गुरुत्मान् देवता । अमृताहरणे विनियोगः ....

End :

तदिदमाख्यानं भक्त्यामयानुकीर्तनं पारम्पर्यक्रमागतम् । अग्नेरग्निरिन्द्रादिन्द्रो वायोर्वायुर्मृत्योर्मृत्युः + + स्वयम्भूस्तस्मै नमः । + + + प्राजापत्यं वै वामदेव्यं प्रजापतावेव प्रतिष्ठायोत्तिष्ठन्ति + + शान्तिर्वै वामदेव्यः शान्तावेव प्रतिष्ठायोत्तिष्ठन्ति शांतिश्शांतिः सर्वारिष्टशांतिरस्तु ।

Colophon :

———

485

Sl. No. 51718 सौभाग्यकल्पलतिका Ms. No. C. 2407

Beginning :

नमामि चिन्मयां स्वात्मामर्शानन्दशरीरिणीम् ।
त्रिपुरां त्रिपुरेशानीं हराहम्भावरूपिणीम् ॥
नत्वाञ्चितापादपद्मद्वन्द्वं द्वन्द्वनिवर्तकम् ।
विघ्नोघघ्नं च गणपं देवीं वाचः सरस्वतीम् ॥

+ + + आलोक्य परमानन्दतन्त्रं तत्तन्त्रटिप्पणम् ।
सौभाग्यानन्दसन्दोहाभिधं च त्रिपुरार्णवम् ॥

End :

सौभाग्यानन्दसंदोहे तन्त्रव्याख्यानसागरे ।
प्रवेष्टुमगमर्थानां समस्तार्थसमासये ॥
सौभाग्यकल्पलतिका कल्पद्रुमविलासिनी ।
+ + + +
सा परा श्रीचक्रराज्ञी मम स्वांतविहारिणी ।
सदा जमति(?)भक्तौघभवदुःखप्रतारिणी ॥

Colophon :

इति सौभाग्यलतिका समप्ता ।

486

Sl. No. 51720 **सौभाग्यकल्पद्रुमः** **Ms. No. C. 4682–5**

Beginning :

मूलेन सप्तधाभ्युक्ष्यशेषतो यं तेजोरूपं विमृश्य अकुलामृतेन संयोज्य दक्षनासयान्तः प्रविष्टमन्तः सकलकलुषक्षालनपूर्वकं इतरनासया हस्ते निर्गतं विभाव्य दक्षकरे गृहीत्वा स्वकामे लल्पितवज्रशिलायाम् ।

End:

पूर्णाभिषिक्तसमर्थस्तु पञ्चांबादिन्यासाष्टकमपि न्यसेत् ।
तच्चन्यासस्कन्धे लिख्यत इति शिवम् ।
श्रीमदानन्दकृते सौभाग्यपूर्वके ।
कल्पद्रुमे ह्यभूत्स्य आद्यः सन्ध्यादिसत्फलः ।

Colophon :

इति सौभाग्यकल्पद्रुमे प्रथमस्कन्धः ।

487

Sl. No. 51721 **सौभाग्यकवचम्** Ms. No. B. 640

Beginning :

कैलासशिखरे रम्ये सुखासीनं सुरार्चितम् ।
गिरीशं गिरिजा स्तुत्वा स्तोत्रैः वेदार्थगर्भितैः ॥
प्रणम्य परया भक्त्या तमपृच्छत् कृताञ्जलिः ।
रहस्यरक्षणकरं सर्वसम्पत्करं परम् ॥
ईश्वर उवाच —
शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
एतत्सौभाग्यकवचं रहस्यातिरहस्यकम् ॥

End :

आधारस्थित शुद्धबिन्दुनिलया नीवारशूकोपमा
सान्द्रानन्दमयी गळत्परसुधावर्षैः प्रबोधप्रदैः ।
भित्त्वाषट्सरसीरुहाणि विधिवत् कोदण्डमध्योदिता
सिञ्चन्ती नवकिङ्किणिकनिवहापायान् सुधाचिन्मयी ॥

Colophon :

इति वामकेश्वरतन्त्रे नित्याषोडशिकार्णवे सौभाग्यकवचं नाम त्रयस्त्रिंशः पटलः ।

488

Sl. No. 51727 **सौभाग्यतन्त्रम्** Ms. No. B. 317

Beginning :

अथ रश्मिमालामन्त्राः प्रारभ्यन्ते —

तत्र वैदिकेषु स्वरपूर्वं पाठः ओं भूर्भुवस्सुवः ।
तत्सवितुः–यात् इति त्रिंशद्वर्णा गायत्री ॥ १ ॥

यत इन्द्रभयामहे + जहि स्वस्तिदा करः ॥ २ ॥
इत्यैन्द्रीविद्या ससषष्ट्यर्णा सङ्कटे भयनाशिनी ।

End :

क्रमेण भूशुद्ध्याद्यजपादिपर्यन्तं नित्यकल्याणकरं उपासनं कुर्वन् सुखी विहरे-दिति अर्धरात्रसंध्याक्रमः ।

इयं अर्धरात्रसंध्या यदा कदाचित् देशिकालाभे स्थलजलादिलाभासम्भवे मानसि कत्वेनापि भावनया अवश्यं कर्तव्येति परमेश्वरोपदेश इति ।

Colophon :

समाप्तोऽयं ग्रन्थः ।
(इति सौभाग्यतन्त्रे पारायणिविधौ षोडशाङ्गबीजसंतत्यादि निरूपणं नाम तृतीयः)

489

Sl. No. 51729 सौभाग्यन्यासविधिः Ms. No. P. 5002-74

Beginning :

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौ वावदुकत्रयं परयुगं दूतिक्रमं मण्डलम् ।
वीरेचाष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

End :

श्रीं ह्रूीं क्लीं ऐं सौः ओं ह्रीं श्रीं क ऽ ई ळ ह्रीं हसकहळह्रीं सकल ह्रीं श्रीं सौः ऐं क्लीं ह्रां श्रीं ।

श्रीर्मायामदनोयोनिपरैतानि मुखे कुरु ।
वेदादि भुवनेशानि श्रीवीजं चित्रकूटयम् ।
त्रिकूटं संपुटीकृत्य श्रीविद्या षोडशाक्षरी ॥

Colophon :

हरिः ओम् ।

490

Sl. No. 51734 सौभाग्यरत्नाकरः Ms. No. P. 5259-1

Beginning :

प्रारम्भे सरणे भङ्गे यन्मदस्पन्दबिन्दवः ।
कारणानि प्रपञ्चस्य तं वन्दे वारणाननम् ॥ १ ॥

* * * *

सच्चिदानन्दनाथाङ्घ्रि सरोजद्वयषट्पदः ।
श्रीविद्यानन्दनाथोऽहं वीतरागो विविक्तधीः ॥ ४ ॥

End :

चम्पकपाटलबिल्वदलनागशेस(?)रकह्लारसिन्धुवारपुष्पैः मासमात्रं प्राग्वत् संपूज्य सहस्रजन्मार्जितानि महापातकानि नाशयित्वा, महासौभाग्यं च प्राप्नुयात् ।

श्रीविद्यानन्दनाथेन शिवयोः प्रियसूनुना ।
कृते सौभाग्यरत्नाब्धौ त्रयोविंशस्तरङ्गकः ॥

Colophon :

इति श्री सच्चिदानन्दनाथचरणद्वन्द्वान्तेवासिना। श्रीविद्यानन्दनाथेन विरचिते सौभाग्यपरत्नाकरे त्रयोविंशस्तरङ्गः ।

491

Sl. No. 51740 सौभाग्यरत्नाकरः Ms. No. P. 3553-1

Beginning :

प्रारभेभरमणभागे(?)यमदस्यन्दि बिन्दवः ।
कारणानि प्रपञ्चस्य तं वन्दे वारणाननम् ॥

सच्चिदानन्दनाथाङ्घ्रि सरोरुहयुगं भजे ।
यत्कटाक्षक्षणोत्क्षेपात् शिवोऽहं पञ्चकृत्यकृत् ॥ ×

ज्ञात्वा गुरुमुखात्तेषां रहस्यार्थांश्च तत्त्वतः ।
श्रीविद्यानन्दनाथोऽहं वीतरागो विविक्तधीः ।
विचरं मेदनीमेतां विद्वद्भिर्विमलात्मभिः ॥ ×

प्रकाशयामि सौभाग्यरत्नाकरमतिस्फुटम् ।
श्रीविद्यायास्सभेदाया नित्यनैमित्तिकार्चनम् ॥

End :

मूलविद्यया त्रतैः पञ्चविंशत्या + हुतीर्हुत्वावक्रैकीकरण विधाय पुनर्वह्नि देवतयोः स्वात्मना सहैक्यं + + नार्थं एकादशाहुतिर्मूलविद्यया हुत्वा —

Colophon :

श्रीविद्यानन्दनाथेन शिवयोः प्रियसूनुना
कृते सौभाग्यरत्नाब्धौ षड्विंशोऽगात् तरङ्गकः ।
सौभाग्यरत्नाकरे षड्विंशस्तरङ्गः ।

492

Sl. No. 51744 **सौभाग्यविद्यापञ्चदशीमन्त्रः** **Ms. No. P. 5746-6**

Beginning :

ओं अस्य श्रीसौभाग्यविद्यापञ्चदशीबालात्रिपुरसुन्दरीमहामन्त्रस्य आनन्दभैरव ऋषिः । विराट् छन्दः । सौभाग्य × × देवता । + + + भूर्भुवस्सुरोमिति दिग्बन्धः । ध्यानम् —

End :

चतुर्भुजे चन्द्रकलावतंसे कुचोन्नते कुंकुमरागशोणे ।
पुण्ड्रेक्षुपाशांकुशपुष्पबाणहस्ते नमस्ते जगदेकमात ॥

लमिति पञ्चपूजा । मनुः । उत्तरन्यासः दिग्विमोकः ।

Colophon :

———

493

Sl. No. 51748 **सौभाग्यविद्येश्वरीमहामन्त्रः** Ms. No. B. 679–19

Beginning :

अस्य श्री सौभाग्यविद्यापञ्चदशाक्षरीमहामन्त्रस्य दक्षिणामूर्ति ऋषिः । पंक्तिः छन्दः । सौभाग्यविद्या देवता । क ए ईं ल ह्री बीजम् । .... मम सौभाग्यविद्याम्बाप्रसादसिध्यर्थे न्यासे जपे विनियोगः ।

End :

उत्तरन्यासं कृत्वा, योनिमुद्रया प्रणमेदिति विं शिं(?) ।

देवनाथ गुरो स्वामिन् देशिकः स्वात्मनाशिकः ।
त्राहि त्राहि कृपासिन्धो जपं पूर्णतरं कुरु ॥

Colophon :

————

494

Sl. No. 51753 **सौभाग्यसुधोधयः** Ms. No. B. 367

Beginning :

यत्र तेजांसि तेजांसि तमांसि च तमांसि च ।
तेजांस्येव तमांस्येव तद्वन्दे ज्योति + + ॥
× + + +
सा भासयति यन्न भानुं न शीतभानुः ।
कृशो बृहद्भानुः स्वाभाविकी —

End :

सुभगत्वसुधारसोदयाय स्वगुरुरूपाय विशेषशेषभाजः ।
निजमानसमन्तरादमथ्नादमृतानन्दसुधीरयुग्मसिद्धाम् ॥

Colophon :

इत्यमृतानन्दकृते सौभाग्यसुधोदये षष्ठः प्रपञ्चः ।

495

Sl. No. 51755 सौभाग्यहृदयम् Ms. No. P. 5002-83

Beginning :

स्मरामि तां परां वाचं पश्यन्त्याविक्रमाश्रयाम् ।
नानाविधरसाकारां महानुभवकारणम् ॥
देशकालपदार्थोऽस्मि यद्यद्वस्तु यथायथा ।
तत्तद्रूपेण याभाति तां श्रये तां विधिं कलाम् ॥

End :

इति विरचितमेतत्त्रैपुरस्तोत्रमार्यं
प्रकटितपरमार्थं योगिवर्योपदिष्टम् ।
सकलदुरितरोगध्वंसनानन्यकार्यं
प्रतियजनविधानं सेव्यतां भक्तियुक्तैः ॥

Colophon :

इति सौभाग्यहृदयस्तोत्रं संपूर्णम् ।

496

Sl. No. 51756 सौभाग्यार्चनविधिः Ms. No. P. 8714-20

Beginning:

अतिसुन्दरां अर्कदायनगां प्रथमपुष्पिणीं अस्पष्टपुरुषां कुलदीक्षासमायुक्तां अथवा गर्भकौलिनीं रसभरितामुपोषितामानीय अभ्यञ्जनं कारयित्वा आभरणैरनुलेपनैरलंकृत्य पुष्पैलिकेशानाबध्य वस्त्रोन्नतपीठे पश्चिमाभिमुखीमुपवेश्य पादौ प्रसार्य —

End :

अत ऊर्ध्वं कुलेशानि पुष्पिणीं पूजयेद्बुधः ।
भृगुवारे नवरात्रौ पौर्णमास्यां कृष्णाङ्गारचतुर्दश्यां कर्तव्यम् ।

Colophon :

इति गर्भकाले सौभाग्यपूजाविधिः ।

497

Sl. No. 51761 सौरमन्त्रः Ms. No. P. 8776-5

Beginning :

अथ सौर्याणां मन्त्राणां ऋक्संख्यामृषिदेवताच्छन्दांसि पुनर्वक्ष्यामः । पूर्वाचार्यक्रमेणैतत्सर्वं पुराद्दष्टं शौनकादिभिराचार्यैर्जपतां तु प्रत्यक्षार्थमिदानीं तन्मयोच्यते । उदुत्यं जातवेदसमिति त्रयोदशर्चस्य सूक्तस्य कण्वपुत्रः प्रस्कण्वऋषिः ।

End :

पापक्षयार्थी व्याधिमोचनार्थी काम्यार्थी मोक्षार्थी जीवितार्थी च कुर्वीत श्रीसूर्यनारायणस्येव सायुज्यं सरूपतां सलोकतामश्नुते नमः शौनकाय नमः शौनकाय नमः परमऋषिभ्यः ।

Colophon :

॥ शुभमस्तु ॥

498

Sl. No. 51764 | सौरार्घ्यविधानम् | Ms. No. P. 4525-38

Beginning :

अस्य मन्त्रस्य सवितृभार्गव ऋषिः । गायत्री छन्दः । श्रीसूर्यो देवता । ध्रीं बीजम् । णिं शक्तिः । नः प्राणयात् कीलकम् । इष्टार्थे जपे विनियोगः ।

End :

पूर्वाभिर्मण्डले वाऽथ प्रत्यक्षे सूर्य एव वा ।
जानुभ्यामवनिं गत्वा दद्यादर्घ्यं दिशेशितुः ॥
एवं कृते महच्छ्रीमान् आयुष्यारोग्यभाजनः ।
बन्धुमित्रगणैर्जुष्टो मुक्तिमन्ते स गच्छति ॥

Colophon :

इति सौरार्घ्यविधिः ।

499

Sl. No. 51767 | सौराष्टाक्षरीमन्त्रजपविधिः | Ms. No. C. 3494-13

Beginning :

अस्य श्रीसौराष्टाक्षरीमहामन्त्रस्य देवभार्गव ऋषिः । गायत्री छन्दः । श्री छायासंज्ञासमेतश्रीसूर्यनारायणो देवता । ह्रां बीजम् । ह्रीं शक्तिः । ह्रू कीलकम् । श्रीछायासंज्ञासमेतश्रीसूर्यनारायणप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

भास्कराय विद्महे महाद्युतिकाराय धीमहि । तन्नो आदित्यः प्रचोदयात् । न्यासध्यानं पूर्ववत् । गुह्येति च समर्पणम् । श्रीसूर्यनारायणचरणारविन्दार्पणमस्तु ।

Colophon :

॥ श्रीः ॥

500

Sl. No. 51774 स्तम्भनमन्त्रः Ms. No. P. 3970-3

Beginning :

स्तम्भनमन्त्रः —

ह्रूँ क्लीं सौं क्ष्म्यूंहसरं श्रीं ह्रूँ गळ गळ कोण कोण ऐं ॥ अं आं ॥ ओं ह्रीं श्रीं कालि नीळकालि वज्रकालि पार्वति सत्पाणिमोहिनि ....

End :

ध्यायेयं कनकाम्बुजासनगतां कार्तस्वरालंकृतां
हस्तेवैक्षवचापबाणवरदा × × ङ्वाख्यमुद्रान्विताम् ।
नानारत्नघृणीछटाशबरिते नागेशसंशोभितां
पीनोत्तुङ्गकुचां विचित्रवसनां वीरासनामम्बिकाम् ॥

एवं ध्यात्वा ।

Colophon :

———

501

Sl. No. 51776 स्तम्भनसुदर्शनमन्त्रः Ms. No. P. 4868-39

Beginning :

अस्य श्रीस्तम्भनमहामन्त्रस्य अहिर्बुध्न्य ऋषिः । प्रस्तारपंक्तिश्छन्दः । सुदर्शनो देवता । ओं बीजम् । ह्रीं शक्तिः । फट् कीलकम् सुदर्शनप्र .... योगः ह्रीं सं आ चक्राय स्वाहा ।

End :

शङ्खचक्रधरं देवं स्तब्धमायाद्भयामृतम् ।
वन्देऽहं चक्रराजाय सद्यःस्तम्भनकारणम् ॥
सर्वकार्यविरोधाय नमः स्तम्भनदेवते । ....
स्तम्भय स्तम्भय । ....
पुनः ऋष्यादि ।

Colophon :

———

502

Sl. No. 51778 स्तम्भविद्वेषविधिः Ms. No. P. 4252-21

Beginning :

श्रीशिवः —
पीताम्बरं प्रसन्नास्यं कुंकुमारुणवक्षसम् ।
मुक्ताहारलसद्ग्रीवं रत्नशिञ्जितनूपुरम् ॥
उत्तुङ्गरत्नमुकुटं उद्यद्भानुसमप्रभम् ।
अमितानन्दसंभोगलीलमद्भुतविग्रहम् ॥

End :

वैरिणां मन्युमन्योन्यं एधयन्तमहेतुकम् ।
तयोरैश्वर्यजालानां क्षयं कुर्वन्तमत्वरम् ।
त्रयोदशदिनात् पश्चात् महद्युद्धं भवेद्ध्रुवम् ॥

Colophon :

इति स्तम्भविद्वेषो नाम नवमोऽध्यायः ।

503

Sl. No. 51781 स्त्रीवश्यमन्त्रः Ms. No. P. 1759-5

Beginning :

स्त्रीवश्यमाह --
पारावतस्य यच्चक्षुः स्मरत्नं रोचकं तथा ।
जिह्वामूलसमायुक्तं अञ्जने स्त्रीवशं भवेत् ॥

End :

कपिलीवांशशीसूतं कुंकुमं कनकं मधु ।
मेषवित्तेन लेपोऽयं लिङ्गे स्त्री(?)रावतं(?) भवेत् ॥

Colophon :

504

Sl. No. 51784 स्मरमातृकामन्त्रः Ms. No. P. 5091-13

Beginning :

अस्य श्री स्मरमातृकामन्त्रस्य सम्मोहन ऋषिः । गायत्री छन्दः । समस्त-
जननी देवता । बीजादिपूर्ववत् । क्लामादिकरहृदयन्यासः ।

End :

बालार्ककोटिरुचिरान् ....
.... स्मरपञ्चबाणान् ।
विद्यां च हस्तकमलैः दधतीं त्रिनेत्रां
ध्यायेत् समस्तजननीं नवचन्द्रचूडाम् ॥
क्लीं अं नमः । क्लीं आं नमः । इत्यादिन्यसेत् ।

Colophon :

505

Sl. No. 51786 स्वच्छन्दपद्धतिः Ms. No. C. 783

Beginning :

.... गा देवराः प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्त-धनञ्जया इति दश वायवः । सर्वसेद्धिप्रदादिबाह्यदशारगा देवता । + +

End :

प्राणानायम्य ऋष्यादिकं विधाय देवीरूपमात्मानं ध्यात्वा श्रीगुरुं प्रणम्य विद्याद्वितीयकूटेन निर्माल्यपुष्पं शिरसि निधाय भक्तेभ्यः प्रसादं दत्वा स्वयमपि सुहृद्भिरन्यैः सह भुक्त्वा स्वात्मानं विश्वातीतं विभावयेत् । यथा स्तुल्यं विहरेत् ।

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्यचिदानन्दविरचितायां स्वच्छन्दपद्धत्यां नवमः स्पन्दः।

506

Sl. No. 51787 स्वप्नगणपतिमन्त्रः Ms. No. C. 548-25

Beginning :

पुनरेकं प्रवक्ष्यामि अत्याश्चर्यकरं विधौ ।
गणनाथं च स्वप्नाख्यं वक्ष्येहं तव पार्वति ॥
सुप्ताशेष + जानेन जाने सिद्धिसमन्त्रकम् ।
जप + + धको नित्यं सहस्रत्रितयं जपेत् ॥

End :

तन्मन्त्रं चैव तद्यन्त्रं पृशो(?)दक्षिणपाणिना ।
अष्टोत्तरशतं जप्त्वा स्वप्ने तत्रैव साधकः ॥
अतीतानागतं चैव चिन्तितं च गणाधिप ।
स्वप्ने जनपदन्त्याशु नात्र कार्या विचारणा ॥

Colophon :

इति श्री आगमरहस्ये सकलमन्त्रसारे उमामहेश्वरसंवादे स्वप्नगणपतिः समाप्तः ।

507

Sl. No. 51789 स्वप्नत्रिपुरसुन्दरीमन्त्रः Ms. No. C. 548-21

Beginning :

जं अं ऐं क्लीं साः ह्रीं त्रिपुरजगत्पूजिते । जगन्मये । अमुकराजानां हृदये प्रविश्य । ततः शाठ्यदेवता । मातापितृरूपेण मोहय मोहय । सर्वस्वं दापय दापय।

End :

आं झीं क्रों सकलजगन्मये । हुं फट् स्वाहा ।

कृष्णाष्टम्याः समारभ्य यावत्कृष्णचतुर्दशी ।
नित्यं चैव जपेन्मन्त्रं सहस्रं जपमेव च ॥
सर्वसिद्धिमवाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति स्वप्नत्रिपुरसुन्दरीमन्त्रसिद्धिर्नाम एकादशः पटलः ।

508

Sl. No. 51793 स्वप्नहनुमन्मन्त्रः Ms. No. C. 548-24

Beginning :

जं अं यं विं दिं क्लीं ईं ह्रां ग्लौं यं गं ईं यं बं साः क्षं ह्रां ह्रां । एह्येहि । स्वप्नबोधाय । आञ्जनेयाय । स्वप्ने मोहय । मोहय । मम चिन्तितार्थं वद वद ।

End :

ईश्वर उवाच —

मनुष्यता(?) कथा(?) देवि अज्ञानेनावृतस्तथा ।
तत्रैव निद्रया युक्तो केवलं मरणैः स्मम् ॥

तन्मध्ये चैव देवेशि स्वप्नशब्दा च(?)जीविना ।
ज्ञानकालं च तन्मध्ये तन्मध्ये मन्त्रयन्त्रयोः ॥

Colophon :

इति स्वप्नहनुमन्मन्त्रः समाप्तः ।

509

Sl. No. 51794 स्वयंवरन्यासः Ms. No. P. 4996-20

Beginning :

अस्य श्रीस्वयंवरमन्त्रस्य ब्रह्मा ऋषिः । देवीगायत्रीच्छन्दः । श्रीपार्वती देवता । श्रीपार्वती प्रसादसिद्ध्यर्थे विनियोगः ।

End :

अशिताङ्गौरुरुश्चण्डक्रोधमु(?)न्मत्तसंज्ञकः ।
कपालभीषणश्चैव संहारश्चाष्टभैरवाः ॥
इन्द्राद्या लोकपालाश्च तद्यस्तानि प्रपूजयेत् ॥

Colophon :

इति स्वयंवरन्यासः समाप्तः ।

510

Sl. No. 51795 स्वयंवरन्यासः Ms. No. P. 4999-21

Beginning :

अस्य श्रीस्वयंवरमन्त्रस्य अञ्जलिऋषिः पाङ्क्तच्छन्दः । स्वयंवरपार्वती देवता । त्रैलोक्यवश्यसंमोहिनी जनप्रियवश्यसंमोहिनी उरगवश्यसंमोहिनी–राजवश्य-संमोहिनी सर्वस्त्रीपुरुषवश्यसंमोहिनी ।

End :

प्रतिवादिजनजिह्वास्तम्भिनी सर्वकल्मषभञ्जिनी ब्रह्मक्षत्रियवैश्यशूद्रस्त्रीपुरुषमम

वशंकरि स्वाहा । ओं कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गि-
प्रचोदयात् ।

Colophon :

———

511

Sl. No. 51798 स्वराक्षरदेवताः Ms. No. P. 4538-5

Beginning :

अकारं ब्रह्मदैवत्यं स्वे(?)तं सर्ववशीकरम् ।
सर्वज्ञत्वं मनोज्ञत्वं कामरूपत्(?)रञ्चिके ॥
अकारन्तु महाशक्तिः श्वेतमाकर्षसिद्धिदम् ।
इच्छासिद्धि(!)र(?)यात्मसिद्धिं रससिद्धिर्वरानने ॥

End :

ओङ्कारं शिवदैवत्यं ज्योतिर्मयसमप्रभम् ।
मनोवेगप्रदं श्रेष्ठं शान्तं सर्वजयप्रदम् ॥
ओङ्कारं शङ्करं विन्द्यात् स्फटिकं(?)सर्वार्थसिद्धिदम् ।
सारस्वतं विशेषेण शत्रूणां + + + शनम् ॥

Colophon :

———

512

Sl. No. 51799 स्वरूपप्रकाशः Ms. No. P. 4445-4

Beginning :

विश्वात्मिकां तदुत्तीर्णां हृदयं परमेशितुः ।
परादिशक्तिरूपेण स्फुरन्तीं संविदं नुमः ॥ १ ॥

End :

सद्भावक्षपितप्रपञ्चनिचयं तत्तत्पदार्थानुगं
स्वात्मीकृत्य विसर्जनीयपरमं स्वातन्त्र्यशक्त्यात्मनि ।
सद्भावे परमेश्वरस्य सततोद्योगे स्वरूपोक्रिया-
ज्ञानेच्छाभरनारतं (?)हजुहुमसद्भावसम्पूर्तये ॥

Colophon :

———

513

Sl. No. 51800 स्वरूपप्रकाशव्याख्या Ms. No. P. 4445-3

Beginning :

श्रीलोकनाथपति + + देशिकेन्द्रमभिवन्द्य तनोमि ।
व्याकृतिं मृदुतराम + + नन्ददेशिकनिरूपितसूक्तेः ॥
जय प्रपञ्चविश्वात्मश्रीदृक्पातपवित्रिता ।
चिदानन्दात्मतो जाता श्रीस्वरूपविमर्शिनी ॥

अत्र भगवान्नागानन्दाचार्यः संवित्प्रसारभूतं स्वरूपप्रकाशाख्यं ग्रन्थं चिकीर्षुः तच्छास्त्रप्रतिपाद्यां परां देवतां समुद्दिशति—श्रीविश्वात्मिक

End :

महेश्वरत्वं तादृक्षत्प्र + + तीति तन्त्रावलोकस्थित्या
क्रम + + + +
त्मकतया + + मृशामि इति शिवम् ।
श्रीरामानन्दमुनीन्द्रे + + + + +
रचिता स्यान्मया कांचिच्छ्रीस्वरूपविमर्शिनी ॥

Colophon :

इति प्रसन्नविश्वात्मकदेशिकपादपद्मान्तेवासि + + + + दि-
विषयो, ज्ञानेन्द्रविरचिता श्रीस्वरूपविमर्शिनी संपूर्णा ।

514

Sl. No. 51802 स्वर्णाकर्षणभैरवमन्त्रः Ms. No. B. 679-20

Beginning :

स्वर्णाकर्षणभैरवस्तोत्रप्रारम्भः । अद्यपूर्वोच्चरित एवं गुणविशेषणविशिष्टायां शुभपुण्यतिथौ स्वर्णाकर्षणप्रसादसिद्ध्यर्थे जपे विनियोगः । अस्य श्री स्वर्णार्षण-भैरवमन्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । .... सिध्यर्थे जपे विनियोगः ।

End :

सततं व्यापिनं तस्मै ददावेव(?) न संशयः ।
यत्नेन सर्वदा देवी सर्वकामफलप्रदम् ।।
स्वर्णभैरवमाहत्म्यं सर्वसम्पत्समृद्धिदम् ।
कथितं तु हि देवेशि भूयसं (?)श्रोतृसंश्रुतिः ।।

Colophon :

इति श्री त्रिपुरकल्पे हरपार्वतीसंवादे स्वर्णाकर्षणभैरवस्तोत्रं संपूर्णम् ।

515

Sl. No, 51805 स्वर्णाकर्षणभैरवमहामन्त्रः Ms. No. C. 3543-1

Beginning :

अस्य श्रीस्वर्णाकर्षणभैरवमहामन्त्रस्य ब्रह्मा ऋषिरिति शिरसि । त्रिष्टुप् छन्दसे नम इति मुखे । हरिहरब्रह्मात्मकस्वर्णाकर्षणभैरव देवतायै नमः हृदये । ह्रीं बीजमिति गुह्ये । नमः शक्तिरिति पादयोः + + + + +

End :

ओं ऐं क्लां क्लीं ह्लां ह्रीं हुं सः वं आपदुद्धारणाय अजामिलबद्धाय लोकेश्वराय स्वर्णाकर्षणभैरवाय मम दारिद्र्यविद्वेषणाय ओं श्रीं महाभैरवाय नमः स्वाहा ।

Beginning :

इति स्वर्णाकर्षणभैरवमन्त्रः ।

516

Sl. No. 51808 स्वर्णकर्षणभैरवमन्त्रः Ms. No. P.4868-28

Beginning :

स्वर्णाकर्षणभैरवम् ।

अस्य श्री स्वर्णाकर्षणभैरवमहामन्त्रस्य स्वच्छन्दवटुक ऋषिः । गायत्री छन्दः । स्वर्णाकर्षणभैरवो देवता । स्वां बीजम् । श्रीं शक्तिः । क्लीं कीलकम् । स्वर्णाकर्षणभैरवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

तद्दशांशं तर्पणम् । तद्दशांशं ब्राह्मण भोजनम् । बिल्वसमिद्भिः चरुं शर्करा-मिश्रक्षीरान्नम् । अनन्तरं लक्ष्मीसूक्तपारायणम् । तदृचा पूर्णहोमः । पूर्णाहुतिः पूर्णफलं नारिकेलम् । अनन्तरं ब्राह्मणसुवासिनीभोजनम् ।

Colophon :

॥ शुभं भूयात् ॥

517

Sl. No. 51816 हंसगायत्रीमन्त्रविधिः Ms. No. P. 8776-7

Beginning :

अस्य श्री हंसगायत्रीमहामन्त्रस्य परब्रह्मा ऋषिः । अव्यक्तगायत्री छन्दः । परमहंसो देवता । सोहमिति बीजम् । हंस इति शक्तिः । हंस सोहमिति कीलकम् । श्रीमत्परमहंसप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

गमागमस्थं गमनादिशून्यं
चिद्दीपदीपं तिमिरान्धकारे ।
पश्यामि ते सर्वजनान्तरस्थं
नमामि हंसं परमात्मरूपम् ॥

हंसः सोहं सोहं हंसः । हंस हंसाय विद्महे । पममहंसाय धीमहि । तन्नो हंसः प्रचोदयात् ।

Colophon :

॥ ओम् ॥

518

Sl. No. 51821 हनुमत्कवचम् Ms. No. P. 10061–4

Beginning

अस्य श्री हनुमत्कवचस्तोत्रमहामन्त्रस्य रामचन्द्रो भगवानृषिः । अनुष्टुप् छन्दः । हनुमान् देवता । मारुतात्मज इति बीजम् । अञ्जनासूनुरिति शक्तिः । वायुपुत्र इति कीलकम् । श्रीहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

स्वापकाले पठेन्नित्यं यात्राकाले तु यः पठेत् ।
तस्य मृत्युभयं नास्ति सर्वत्र विजयी भवेत् ॥
बुद्धिर्बलं यशो धैर्यं निर्भयत्वमरोगता ।
अजाड्यं वाक्पटुत्वं च हनुमत्स्मरणात् भवेत् ॥

Colophon :

इति हनुमत्कवचं संपूर्णम् ।

519

Sl. No. 51824 हनुमत्कल्पः Ms. No. P. 4525-35

Beginning :

अस्य श्री पञ्चवक्त्रहनुमन्महामन्त्रस्य मार्कण्डेय ऋषिः । अनुष्टुप् छन्दः ।
पञ्चमुखविराड्रूपी परमात्मा श्रीहनूमान् देवता । मं बीजम् । स्वाहा शक्तिः ।

End :

पार्थिवं मण्डलं लिख्य कृत्वा प्राणप्रतिष्ठितम् ।
एतद्यन्त्रं वरं धीमान् पूजयेद्धारयेत्सुधीः ॥
एतद्रहस्यममलं सर्वेषां न वदेत्सुधीः ।
धर्मिष्ठाय सुशान्ताय वदेद्धर्मार्थसिद्धये ॥

Colophon :

इति परमसंहितायां हनुमत्कल्पे पञ्चषष्ठितमोऽध्यायः ।

520

Sl. No. 51824 हनुमत्कल्पः Ms. No. P. 6915-2

Beginning :

हनुमत्कवचम् —

अस्य श्री हनुमत्कवचस्तोत्रमन्त्रस्य श्रीनारदभगवान् ऋषिः । अनुष्टुप् छन्दः ।
श्री हनुमान् देवता । मारुतात्मज इति बीजम् । अञ्जनासूनुरिति शक्तिः ।
वायुपुत्र इति कीलकम् । हनुमान् प्रीत्यर्थे जपे विनियोगः ।

End :

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥

Colophon :

इति ब्रह्मोत्तरखण्डे ब्रह्मनारदसंवादे श्रीरामचन्द्रप्रोक्तं हनूमत्कवचं संपूर्णम् ।

521

Sl. No. 51826 हनुमत्पञ्चमुखीमालामन्त्रः Ms. No. P. 4900-2

Beginning :

आं यं सन्नन्दन महावीरवराय सर्वशत्रुसंहारकारणरामदूताय हुं फट् स्वाहा ।

End :

राजभयं चोरभयं प्रशमय प्रशमय परमन्त्रपरयन्त्रपरतन्त्रान् क्षोभय क्षोभय स्वमन्त्रस्वयन्त्रस्वतन्त्रस्वविद्याः प्रकटय प्रकटय + ÷ असाध्यासाधारणाय लङ्का-पुरीदहनाय ओं श्रीं यं फट् फट् स्वाहा ।

Colophon :

———

522

Sl. No. 51833 हनुमदावेशविधिः Ms. No. C. 548-6

Beginning :

अस्य श्री आवेशहनुमान् मन्त्रस्य नारदो भगवान् ऋषिः । पंक्तिछन्दः । श्री आञ्जनेयो देवता । यं बीजम् । ह्रीं शक्तिः । ग्लौं कीलकम् । क्षिप्रा-वेशसिद्ध्यर्थे जपे विनियोगः ।

End

कपिसैन्यप्राकाराय, करुणाकराय, स्वस्थानं गच्छ गच्छ स्वाहा ।

ई मन्त्रानमन्त्रिचि विभूतिवेष्ठिते । स्वस्थानमौनू । मर्नाड्डुम्मिसेञ्चेबुञ्चि । आवेशं व्यायवचुनू ।

Colophon :

———

523

Sl. No. 51836 हनुमद्दिग्बन्धनमन्त्रः Ms. No. C. 3609

Beginning :

अस्य श्रीहनुमद्दिग्बन्धनमन्त्राणां अङ्गद ऋषिः । त्रिष्टुप् छन्दः । श्रीहनुमान् देवता । शुं बीजम् । नं शक्तिः । मं कीलकम् । दशदिग्बन्धनार्थे जपे विनियोगः ।

End :

दक्षिणदिग्भागे क्षं क्षेत्रपालकाय । पश्चिमदिग्भागे दुं दुर्गायै । उत्तरदिग्भागे ह्रीं वाण्यै नमः । ऊर्ध्वभागे कं कपीश्वराय नमः । इति दिग्बन्धः । मनुः— ओं ह्रीं हरिमर्कटमर्कटाय स्वाहा । अक्षरलक्षजपः ।

Colophon:

———

524

Sl. No. 51841 हनुमद्यन्त्रप्राणप्रतिष्ठामहामन्त्रः Ms. No. P. 4525–44

Beginning :

हनुमद्यन्त्रप्राणप्रतिष्ठामहामन्त्रस्य रक्तलोचनाकर्णकृष्णधनुर्बाणपाणि द्वन्द्वरथारूढावीरवाम ऋषिः । विराड्गायत्री छन्दसी । यन्त्ररूपो हनुमान् देवता ।

End :

एतद्यन्त्रं तु भूमौ लिखित्वा आवाह्य भानुवारं जपित्वा सप्तवारे सान्निध्यं भवति ।

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा चण्डिका तथा ॥

Colophon :

॥ श्रीः ॥

525

Sl. No. 51843 हनुमद्यन्त्रविधिः Ms. No. P. 10053–5

Beginning :

आदौ यन्त्रं प्रवक्ष्यामि सर्वकार्यार्थसिद्धये ।
आचन्द्रं समालिख्य त्रिकोणं वर्तुलं लिखेत् ॥
बहिरष्टदलं पद्मं तद्बाह्ये षोडशार्णकम् ।
द्वात्रिंशद्दलसंयुक्तं चतुष्षष्टिदलं तथा ॥

\+ + + + +

End :

महागिरिरसे वापि नाम संयोज्य पूर्ववत् ।
दक्षिणाभिमुखे वह्नौ दग्ध्वा धारयते रुणात् ॥
.... चित्रकणालिख्य निरीनेद्वेषु मन्दिरे ।
उच्चाटनं भवेत्तस्य स याति यमशासनान् ॥

Colophon :

इति सुदर्शनसंहितायां हनुमद्यन्त्रः समाप्तः ।

526

Sl. No. 51846 हनुमन्मन्त्रः Ms. No. P. 5657–55

Beginning :

अस्य श्री हनुमन्महामन्त्रस्य ईश्वर ऋषिः । अनुष्टुप् छन्दः । हनुमान्

देवता । ह्रीं बीजम् । स्वाहा शक्तिः । नमः कीलकम् । हनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

ध्यानम् —

स्फटिकाभं स्वर्णकान्तिं द्विभुजाभ्यां कृताञ्जलिम् ।
कुण्डलद्वयसंशोभिमुखाम्भोजं मुहुर्भजे ॥

पञ्चपूजा । मनुः । ओं नमो भगवते आञ्जनेयाय महाबलाय स्वाहा । पुनर्न्यासः । दिग्विमोकः ।

Colophon :

———

527

Sl. No. 51843 **हनुमन्मन्त्रः** **Ms. No. C. 2552–5**

Beginning :

ओं नमोभगतिवज्रवीरहनुमदावानलाग्निपटलवीरबलपराक्रमसान्धिकनगदलित-वज्रदेह वज्रकाय वज्रनख वज्ररोम वज्रदंष्ट्र वज्रमीकर वज्रपाल पिङ्गलाक्ष दीर्घ-प्रशय ज्वालारौद्रम शरभशार्दूल ।

End :

महावीराय सर्वदुःखनिवारणाय सर्वग्रहमण्डलसर्वभूपमण्डलसर्वप्रेतमण्डलसर्व-पिशाचमण्डलोच्चाटनामद्वितीयापाकत्रियापाकचातुर्थिकमहेश्वरज्वरवैष्णवज्वरदधि-यक्षब्रह्मराक्षसमेतालभूतप्रेतपिशाचोच्चाटनाय ओं ह्रीं ह्रां क्षीम् ।

Colophon :

॥ श्रीः ॥

528

Sl. No. 51869 हनुमन्मन्त्ररक्षा Ms. No. P. 4925-115

Beginning :

ओं ह्रीं यं ह्रीं श्रीरामदूताय लङ्कापुरीदहनाय अक्षयकुक्षिविदारणाय अपरिमित-बलपराक्रमाय रावणगिरिवज्रायुधाय ह्रीं स्वाहा । स्वप्नाख्यायिहनुमन्मन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । हनूमान् देवता । ओं बीजम् । स्वाहा शक्तिः । पूरदृष्टीति कीलकम् । हनुमत्प्रसादे विनियोगः ।

End :

प्रार्थना —

समागतानागतवर्तमानं
लोकान्तविज्ञानपरं त्रिलोक्याम् ।
दूरश्रुतं दूरगतस्य दर्शनं
स्वप्ने हनूमन् मम देहि देहि ॥

मन्त्रः —

ओं दूरदृष्टिदूरश्रवणाय अतीतानागतवर्तमानाय सर्वलोकवृत्तान्तविज्ञानाय स्वाहा । १००० जपः । वाक्यषट्केन करहृदयन्यासः ।

Colophon :

———

529

Sl. No. 51878 हनुमन्मालामन्त्रः Ms. No. P. 5056-7

Beginning :

अस्य श्रीहनुमदष्टाक्षरमन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीहनुमान् देवता । + +

वन्दे विद्युद्वलयविलसद्ब्रह्मसूत्रं वरिष्ठं
कर्णद्वन्द्वे कनकरचितं कुण्डले धारयन्तम् ।

सक्कौपीनं कपिवरबृढं(?)कामरूपं कपीन्द्रं
पुत्रं वायोः रविकरसितं वज्रदेहं वरेण्यम् ॥

End :

स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिम् ।
कुण्डलद्वयसंशोभिमुखाम्भोजं नमाम्यहम् ॥

Colophon :

इति श्रीहनुमन्मालामन्त्रस्समाप्तः ।

530

Sl. No. 51882 हनुमन्मालामन्त्रः Ms. No. P. 6651

Beginning :

अस्य श्रीहनूमन्मालामन्त्रस्य श्रीरामचन्द्रो भगवान् ऋषिः । अनुष्टुप् छन्दः । श्री हनूमान् देवता । हं बीजम् । नमः शक्तिः । मं कीलकम् । श्रीहनूमत्प्रसादसिद्ध्यर्थे मम अभीष्टफलसिद्ध्यर्थे जपे विनियोगः ।

End :

ओं ह्रीं हा हा हा हं स एहि सर्वं विषं हर हर बरबलि क्षोभय क्षोभय मम सर्वकार्याणि साधय साधय हुं फट् (?) स्वाहा । इति हनूमन्मालामन्त्रः । एतान् लक्षदि (?) राममन्त्र—गत्वा यथाश × ×

Colophon :

———

531

Sl. No. 51884 हयग्रीवकवचस्तोत्रम् Ms. No. P. 10706–18

Beginning :

लक्ष्मीकराम्भोरुहहेमकुम्भं पीयूषपूरैरभिषिक्तशीर्षम् ।
व्याख्याक्षमालाम्बुजपुस्तकानि हस्तैर्वहन्तं हयतुण्डमीडे ॥

सुधासिक्तशिरः पातु फालं पातु शशिप्रभः ।
दृशौ रक्षतु दैत्यारिः नासां वाक् ब्रह्मवारिभिः ॥

End :

पठेद्य एतत् कवचं त्रिसन्ध्यं भक्तिभावितः ।
मूढोऽपि गीष्पतिस्पर्धी जायते नात्र संशयः ॥

Colophon :

हयग्रीवकवचं सम्पूर्णम् ।

532

Sl. No. 51885 हयग्रीवचक्रोद्धारविधिः Ms. No. P. 4922-40

Beginning :

देवदेवस्य विष्णोर्यः हयग्रीवस्य तत्त्वतः ।
चक्रं साङ्गं समन्त्रं च बीजं स च मूर्तिकम् ॥
लिखित्वा पूजयेद्विद्वान् प्रतिष्ठापूर्वकं शुचिः ।
विधिवद्घटमानीय सर्वलक्षणसंयुतम् ॥

\+ + + + +

End :

नैवेद्यान्तं समर्प्याथ तद्घटादुत्थितं हरिम् ।
त्रिखण्डमुदियात्पुष्पाण्युद्धृत्य समनुं द्विजः ॥
पूजां चक्रे समावाह्य गन्धपुष्पाक्षतादिभिः ।
धूपदीपासनार्घ्यादि नैवेद्यान्तं यथाक्रमम् ॥
पूजयेन्मूलमन्त्रेण नित्यं भक्तिसमन्वितः ।
सर्वमङ्गलमाप्नोति सर्वत्र विजयी भवेत् ॥

Colophon :

इति मन्त्रशास्त्रे महाचक्रविधानेषु अथर्वशीर्षे नारदीये गौतमप्रश्ने हयग्रीवाष्टाक्षरचक्रोद्धारो नाम तृतीयः पटलः ।

533

Sl. No. 51888 हयग्रीवपञ्जरस्तोत्रम् Ms. No. P. 10706-17

Beginning :

अस्य श्रीहयग्रीवपञ्जरस्तोत्रमहामन्त्रस्य--हयग्रीवो भगवान् ऋषिः । अनुष्टुप् छन्दः । श्रीहयग्रीवो देवता । श्रीहयग्रीवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

कलशाम्बुधिसङ्काशं कमलायतलोचनम् ।

\+ + + + +

देवतासार्वभौमं तं ध्यायेदिष्टार्थसिद्धये ॥

ओं हयग्रीवः शिरः पातु ललाटं चन्द्रमध्यगः ।
शास्त्रदृष्टिदृशौ पातु शब्दब्रह्मात्मकश्श्रुती ॥

End :

रक्षाहीनं तु यत्स्थानं रक्षत्वखिलनायकः ।
एवं न्यस्तशरीरोऽसौ साक्षाद्वागीश्वरो भवेत् ॥
आयुरारोग्यमैश्वर्यं सर्वशास्त्रप्रवक्तृताम् ।
लभते नात्र सन्देहः हयग्रीवप्रसादतः ॥

Colophon :

इति श्रीहयग्रीवपञ्जरं संपूर्णम् ।

534

Sl. No. 51890 हयग्रीवपञ्चाक्षरीमन्त्रः Ms. No. P. 10053-17

Beginning :

ओं छं घं ढं यां वां शां यैं कैं पैं सौं छां यं नमः । मनुः(?)मनुः । बं सं रं हं द्रीं नैं कं ऐं । कूर्ममनुः ।

अस्य श्री हयग्रीवमन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । परमात्मा श्रीमध्व-वल्लभश्रीहयग्रीवो देवता । ह्स सौं बीजम् । अं श्रीहयग्रीवप्रीत्यर्थे जपे विनियोगः । ह्सामित्यदिषडङ्गन्यासः ।

End :

वन्दे तुरङ्गवदनं शशिबिम्बसंस्थं
चन्द्रावदातममृतात्मकरैः समन्तात् ।
अण्डान्तरं बहिरपि प्रतिभासयन्तं
शङ्खाक्षपुस्तकसुबोधयुतात्मबाहुम् ॥

\+ + + + +

इन्द्रं लं अग्निं रं यमं हं निरृऋति षं वरुणं वं + ह्रां शक्त्यादि तं वसु । +

Colophon :

इति गर्भकाले सौभाग्यपूजाविधिः ।

535

Sl. No. 51895 हयग्रीवमन्त्रः Ms. No. P. 1908-7

Beginning :

अथोच्यते हयग्रीवमन्त्रस्सर्वसमृद्धिदः ।
चन्द्रस्थं गगनं वामकर्णबिन्दुसमन्वितम् ॥
एकाक्षरो मनुः प्रोक्तः हयग्रीवस्य मन्त्रिभिः ॥

End :

प्रातःकाले जपेद्विद्वान् भस्मोद्धूलितविग्रहः ।
बृहस्पतिसमो भूत्वा ऋषिवन्मन्त्रविद्भवेत् ॥

Colophon:

पुरश्चरणविधिस्समाप्तः ।

536

Sl. No. 51897 हयग्रीवमन्त्रराजः Ms. No. P. 10264-15

Beginning :

अस्य श्रीहयग्रीवमन्त्रराजस्य— सङ्कर्षण ऋषिः । अनुष्टुप् छन्दः । हयग्रीवो देवता । + + + श्रीहयग्रीवप्रसादार्थे जपे विनियोगः ।

+ + + + वेदाहरणकर्मणे ।
प्रणवोद्गीथवपुषे महाश्वशिरसे नमः ॥

+ + + + +

अस्य तु नित्यं यथाशक्त्यावर्तनं कर्तव्यम् । अनन्तरं—

तारैकाक्षरवाच्याय ताराय नतिभागिने ।
तथा भगवते तुभ्यं हयग्रीवाय योगिने ॥

+ + + +

इत्थं गिरिशवागीशबृहस्पतिमुखैस्सुरैः ।
संस्तुतो भगवान् विष्णुः स्तोत्रेणानेन तोषितः ॥

+ + + + +

आनुष्टुभस्याङ्गन्यासाद्यंशे एकाक्षर एव सर्वाङ्गेष्वपि प्रयोक्तव्य इति मन्त्रशास्त्रसिद्धमेतत् ।

End :

आनुष्टुभस्यायुतजपेन सिद्धिर्भवति । एकाक्षरस्य तु चतुर्लक्षजपेनेति विवेकः । अनयोरन्यतरस्मिन् हयग्रीवमन्त्रे अनन्यप्रयोजनतया कृतायां निष्ठायां श्रीमद्रहस्यत्रयसार + + विज्ञानेन कृतकृत्यतां + + श्रियःपतिः प्रयच्छतीति निस्संशयमेतत् ।

Colophon :

———

537

Sl. No. 51900 हयग्रीवमालामन्त्रः Ms. No. P. 7526-10

Beginning :

मालामन्त्रः —

श्रीहयग्रीवमालामन्त्रस्य शरभ ऋषिः। अतिजगती छन्दः। परमात्मा श्रीहयवदनो देवता। ओं क्रां बीजम्। क्रौं शक्तिः। क्रूं कीलकम्। आत्म-रक्षणोच्चाटनमारणमोहनस्तम्भनसर्वार्थसिद्ध्यर्थे जपे विनियोगः।

End :

हुं फट् स्वाहा। अयुतं जपेत् ओं हसूं ह्रीं क्ष्रौं हयग्रीवनारसिंहाय यं रं सर्वशत्रून् स्तम्भय स्तम्भय भ्रामय भ्रामय हुं फट् स्वाहा। तन्मन्त्रार्थसिद्ध्यर्थं × × दरात्।

Colophon :

इति श्रीपराशरसंहितायां अष्टाविंशोऽध्यायः।

538

Sl. No. 51905 हयग्रीवमन्त्रः Ms. No. P. 6128-8

Beginning :

मध्ये वृत्तं समालिख्य तन्मध्ये प्रणवं लिखेत्।
एकाक्षरं च प्रणवं लिखेत्साध्यादिसंयुतम्॥
एकाक्षरं हयग्रीवं लिखेत् + + +

End :

इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा।
इत्युक्त्वा अमृतं वै प्राणः अमृतमापः प्राणानेव यथास्थानमुपह्वयत इति।

Colophon :

इति प्राणप्रतिष्ठा संपूर्णा ।

539

Sl. No. 51906 हयग्रीवयन्त्रः Ms. No. P. 1908–13

Beginning :

सर्वरत्नसमाकीर्णे गोपुराद्यादिशोभिते ।
मण्डपे च वितानादिसर्वालङ्कारसंयुते ॥

क्रमाद्युपर्युपरि च दिव्यलोकामृते शुभे ।
शेषधर्मादिपीठे वै श्वेताब्जे कर्णिकोपरि ॥

End :

षट्कोणं पूर्वमालिख्य मुखे ह्रींकारमेव च ।
पृष्ठे मनसबीजं च जपात् कोटिगुणं भवेत् ॥

Colophon :

———

540

Sl. No. 51910 हयग्रीवानुष्टुप्मन्त्रविधिः Ms. No. P. 6128–44

Beginning :

अस्य श्री हयग्रीवमहामन्त्रस्य सङ्कर्षण ऋषिः । अनुष्टुप् छन्दः । हयग्रीव-
रूपी विष्णुर्देवता । ऋग्बीजम् । नमश्शक्तिः । श्रीहयग्रीवप्रसादसिद्ध्यर्थे +

End :

अनन्तरं हयग्रीवमन्त्रजपः कार्यः ।

ऋग्यजुस्सामरूपाय वेदाहरणकर्मणे ।
प्रणवोद्गीथवपुषे महाश्वशिरसे नमः ॥ इति मन्त्रः ।

Colophon :

॥ श्रीः ॥

541

Sl. No. 51911 हयग्रीवानुष्टुप्मन्त्रविधिः Ms. No. P. 7526-6

Beginning :

ओं तं वागीश्वराय विद्महे हयग्रीवाय धीमहि तन्नो हंसः प्रचोदयात् ।
अस्य श्री हयग्रीवानुष्टुप्महामन्त्रस्य सङ्कर्षणः + देवता । ईं बीजम् । मकार शक्तिः । मम सकलविद्याज्ञानहयग्रीवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

मनुनाऽनेन संजप्तं घृतं ब्राह्मीरसैश्चितम् ।
कवितामावहेत्पुंसां अनर्गळविजृम्भिणीम् ॥
रसामनेन संजप्तां भक्षयेत् प्रातरन्वहम् ।
स च वेदागमादीनां व्याख्याता जायते चिरात् ॥
मनोरस्य समो नास्ति ज्ञानैश्वर्यप्रदायकः ॥
श्रीहयाननः ।

Colophon :

हरिः ओम् ।

542

Sl. No. 51914 हयग्रीवाष्टाक्षरीमन्त्रविधिः Ms. No. P. 10053-60

Beginning :

ओं हयग्रीवाष्टाक्षरमन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीविद्याधिराज-श्रीहयग्रीवो देवता । मन्त्रेण बीजम् । नमः शक्तिः । हयशिरस इति कील-

कम् । विनियोगः । ओं अङ्गु ओं हं ओं पृष्ठे । ओं यं ओं कण्ठे । ओं शिरसि । ओं रं ओं वक्रे । + + +

End :

हयग्रीवरूपी विष्णुः देवता । अन्यत्सर्वमेकाक्षरमन्त्रवत् ।
विश्वोत्तीर्णस्वरूपाय चिन्मयानन्दरूपिणे ।
तुभ्यं नमो हयग्रीव विद्याराजाय विष्णवे ॥ स्वाहा ।
अयं हंसादिसोमन्त्रिकः(?)पूर्वानुष्टुप् मन्त्रवरः ।

Colophon :

———

543

Sl. No. 51916 हयग्रीवैकाक्षरमन्त्रविधिः Ms. No. P. 3591-36

Beginning :

अस्य श्री हयग्रीवैकाक्षरमहामन्त्रस्य ब्रह्मा ऋषिः । देवी गायत्री छन्दः । परमात्मा श्रीमन्नारायणो देवता । हं भीजं × × × × मं कीलकम् । —

End :

हयग्रीवदयासिन्धो शरणागतवत्सल ।
नित्यमुक्तैस्सदा सेव्य विद्यां त्वं मम दापय ॥
ओमोमित्यादिषडङ्गन्यासः ।

Colophon :

॥ श्रीः ॥

544

Sl. No. 51918 हयास्यकवचम् Ms. No. P. 4922-6

Beginning :

प्राह प्रसन्नवदनः पाराशर्यमनिन्दितम् ।

नारद उवाच —

ऋषिरस्य हयग्रीवो देवता च स एव हि ।
प्रोक्तमानुष्टुभं छन्दः सर्वार्थे विनियुज्यते ॥

कलशाम्भोधिसङ्काशं कमलायतलोचनम् ।
कलानिधिकृतावासं कर्णिकापीठसंस्थितम् ॥

\+ * + + +

End :

आयुरारोग्यमैश्वर्यं सर्वशास्त्रप्रवक्तृताम् ।
लभते नात्र सन्देहो हयग्रीवप्रसादतः ॥
इतीदं कीर्तनीयं च कवचं देवपूजितम् ।

Colophon :

इति कवचस्तोत्रं संपूर्णम् ।

545

Sl. No. 51921 हरिद्रागणेशमन्त्रः Ms. No. P. 4999–25

Beginning :

हरिहरविरिञ्चयो वासवाद्यैः ?
अभिमतपूजितमुपक्रमे क्रियायाः ।
सकलदुरितहरम्बिकायाप्रथम × × ×
× × × नमामि विघ्नराजम् ॥

कैलासशिखरासीनं देवदेवं महेश्वरम् ।
प्रणम्य परया भक्त्या भार्गवो वाक्यमब्रवीत् ॥

भगवन् सर्वभूतेश × × × तत ॥

End :

हुनेदष्टशतं नित्यं संपातं गृह्यबुद्धिमान् ।
भक्षयित्वा नरो नारी मरणान्तं वशं भवेत् ॥
बहुनात्र किमुक्तेन जपेन्मन्त्रं समाहितः ।
सर्वलोकप्रियो भूत्वा सर्वत्र विजयी भवेत् ॥

Colophon :

इति हरिद्रागणपतिकल्पे वश्याधिकारः पञ्चमः पटलः ।

546

Sl. No. 51923 हरिद्रागणेशमन्त्रः Ms. No. P. 4449-27

Beginning :

अस्य श्री हरिद्रागणपतिमहामन्त्रस्य गणक ऋषिः । अनुष्टुप् छन्दः । हरिद्रागणपतिः देवता । क्लीं बीजम् । स्वाहा शक्तिः । नम इति कीलकम् । हरिद्रागणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

पायसान्नैरपूपैश्च मोदकैश्चर्पिल(?)त्रयैः ।
गणेशं प्रीणयित्वाथ ताम्बूलादीन्निवेदयेत् ॥
नैवेद्यं भोजयेत्पश्चात् ब्रह्मचारीं(?)श्च कन्यकाम् ।
ततः कार्याणि कर्माणि कुर्याद्वै सर्वसिद्धये ॥

Colophon :

इति कैन + + संहितायां सर्वसारविषये मन्त्रोद्धारं नाम द्वितीयोऽध्यायः ।

547

Sl. No. 51925 हरिपूजाविधिः Ms. No. C. 1038

Beginning:

प्रणम्य श्रीपतिं सर्वान् गुरूंश्चाथ प्रवक्ष्यहम् ।
यथामति हरेः पूजाविधिं वैष्णवसम्मतम् ॥

End:

प्रमादतो निरोधाद्वा हरेः पूजा भवेन्न चेत् ।
पठनात्पद्ममालायाः नरः पूजाफलं लभेत् ॥

Colophon:

इति श्रीजयतीर्थमुनिविरचिततन्त्रसारोक्तपूजाविधिः समाप्तिमगमत् ।

548

Sl. No. 51931 हिरण्यकेशीसर्वतोभद्रम् Ms. No. C. 4719-42

Beginning:

अथ हिरण्यकेशी सर्वतोभद्रमण्डलदेवता लिख्यन्ते ।
सङ्कल्पात्पूर्वं वा सम्भारसम्भरणम् (?) ।
ततो गणपतिपूजनादि नान्दीश्राद्धान्तं कृत्वा आचार्यादिवर्णनं कुर्यात् ।
अमुकप्रवरान्वितामुकगोत्रोत्पन्न + + + +
आचार्यं त्वामहं वृणे ।

End:

एवं इतरासु प्रतिमासु ।
एवं कृत्वा प्रयत्नेन दम्पती चैव पूजयेत् ।
तयोस्तु पूजनं कुर्यात् दम्पत्योस्तु ततोवकम् ॥
अनेन विधिना तुष्टः स्वयं युक्तस्त्वयानघे ।

Colophon :

सङ्गमेश्वरार्पणमस्तु ।

549

Sl. No. 51933 हेरम्बगणपतिमन्त्रः Ms. No. B. 288–14

Beginning :

ओं गं नमः । लक्षत्रयं जपः । मालामन्त्रः । ओं नमो भगवते महावीर दशभुज मदनकाल विनाशन ....

End :

सर्वग्रहांश्चूर्णय नागान्मोटय, रुद्ररूप त्रिभुवनेश्वर, सर्वतोमुख, हुं फट् स्वाहा ।

Colophon :

इति हेरम्बगणपतिमन्त्रः संपूर्णः ।

550

Sl. No. 51914 हेरम्बगायत्रीमहामन्त्रः Ms. No. B. 1120–2

Beginning :

अस्य श्रीहेरम्बगायत्रीमन्त्रस्य शुक्र ऋषिः । अनुष्टुप् छन्दः । गणपतिर्देवता । + + + । ध्यानम् —

रक्ताङ्गं रक्तवस्त्रं सितकुसुमगणैः पूजितं रक्तगन्धैः ।
क्षीराब्धौ रत्नपीठैः स्फुरतरविमलं रत्नसिंहासनस्थम् ।
दोर्भिः पाशांकुशेष्टाभयधृतरुचिरं चन्द्रमौलिं त्रिनेत्रं
ध्यायेच्छत्त्यर्धमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥

End :

सकलाभिवृध्याभिवर्धय नमः । संपन्नय संपन्नय खे खे मार मारय परमत्रं

परतन्त्रं छिन्दि छिन्दि यं सर्वग्रहान्निवारय निवारय गं व्याधिं विनाशय विनाशय दुःखं जन(य) जन(य) सर्वपल्लवस्वरूपाय श्रीमहागणपतये स्वाहा ।

Colophon :

॥ श्रीः ॥

551

Sl. No. 51936 होमकुण्डलक्षणम् Ms. No. P. 4252-11

Beginning :

शृणु देवि प्रवक्ष्यामि होमकुण्डस्य लक्षणम् ।
साम्राज्यं देवतानां च सर्वेषां सामुदायिकम् ॥
शुक्लपक्षे त्रयोदश्यां एकादश्यां तथैव च ।
द्विसप्ततितिथौ वापि इतरेषु मुखेषु च ॥

End :

एवमालोक्य कुण्डानां लक्षणं गुरुसन्निधौ ।
स्वेष्टं सलक्षणं कृत्वा प्रोक्ष्यकुम्भाम्भसा त्रिधा ॥
विधिवत् कुण्डमभ्यर्च्य यथाकार्यं तु विद्यया ।
तामुद्दिश्य .... प्रवृत्तये ।

Colophon :

॥ श्रीः ॥

552

Sl. No. 51940 होमलक्षणम् Ms. No. P. 5056-24

Beginning :

अथ होमप्रकारः —

ईशान्यभागे स्थण्डिलं कृत्वोल्लेखनाद्यग्निं प्रतिष्ठाप्य मध्ये पूर्वे पश्चिमे उत्तरे

दक्षिणे आवसथ्यं स × × आहवनीयं अन्वाहार्यं गार्हपत्यं इति पञ्चाग्निस्थानानि सञ्चित्य ।

End :

सहस्रार्चिर्महातेजा नमस्ते बहुरूपधृक् ।
सर्वाशिने सर्वगतपावकाय नमोऽस्तु ते ॥

इत्यग्निं प्रार्थ्य प्रधानद्रव्यैस्तत्तन्मन्त्रेण होमं कुर्यात् । ततः स्विष्टिकृदादिकं कृत्वा परिसमाप्तिं कुर्यात् ।

Colophon :

———

553

Sl. No. 51941 — होमविधानम् — Ms. No. P. 4254-14

Beginning :

शिव उवाच —
वदाम्यशेषं श्रृणु होमभेदक्रियाभिधानं गिरिराजकन्ये ।
नूनं महाद्भूतपिशाचरोगज्वराभिदुष्टौघविमोहशान्त्यै ॥
मधु मधूकं मधुकं शान्त्यै —

End :

त्रिकटुसर्षपहिङ्ग्वजमोदात्युरगमूलि ससैन्धवजीरकम् ।
सुघृतपरिदटङ्कणयुक्तं निखिलभूतगणक्षयमेतत् ॥

Colophon :

इति होमविधानं नाम विंशोऽध्यायः ।

अनिर्दिष्टम्

554

Sl No. 51943 अभिलषितार्थचिन्तामणिः Ms. No. P. 6923

(मानसोल्लासः)

Beginning

अभीष्टफलसिद्धौ सिद्धमन्त्रं गणेश्वरम् ।
कर्णतालनिलोद्धूत विघ्नतूललवं नमः ॥
+ + + + +
चालुक्यवंशतिलकः श्री सोमेश्वरभूपतिः ।
कुरुते मानसोल्लासं × × विश्वोपकारकम् ॥

End :

विक्रमादित्यपुत्रेण सो भूपेन भाषितः ।
स्वजनहृदयभूमौ दर्शपीयूषवर्ष–
न्ति × भयविपूर्णं स्वानुरागं प्रियासु ।
जयतु जयमिहशास्त्रे मानसोल्लासना–
मस्य वर्धति विनोदा विंशतिः सोमभूपः ॥

Colophon :

इति महाराजाधिराजसत्याश्रयकुलतिलक चालुक्याभरण × × मल्लसोमेश्वर-देवविरचिते अभिलषितपदार्थचिन्तमणौ मानसोल्लासे प्रमोदापदकविनोदकथने चतुर्थोऽध्याये श्लोकाः सहस्रत्रयं चत्वारिंशतान्यष्टाशीतिश्च ।

555

Sl. No. 51945 अभिलषितार्थचिन्तामणिः Ms. No. B. 948

Beginning :

अभीष्टफलसंसिद्धि सिद्धिमन्त्रं गणेश्वरम् ।
कर्णतालानिलोद्धूत विघ्नतूलं सदा नुमः ॥

संवित्सुखीज्वलत्येका कापिशुद्धा सरस्वती ।
यया चान्तः प्रबुद्धानां प्रकाशोऽपि प्रकाश्यते ॥

चालुक्यवंशतिलकः श्रीसोमेश्वरभूपतिः ।
कुरुते मानसोल्लासं शास्त्रं विश्वोपकारकम् ॥

End :

वरात्रितयमुक्तो यो वरि विनोदः परिकीर्त्यते ।
गजैः विनोदनं कुर्यात् वाद्यालीसन्ततो नृपः ॥
सङ्ग्रामार्थः श्रमस्तेषां शस्तो यावत्समीक्षणम् ।

Colophon :

एतावत्पर्यन्तमेव मातृका दृश्यते ।
(अभिलषितार्थचिन्तामणिः समाप्ता)

556

Sl. No. 51950 अष्टबन्धनविधिः Ms. No. P.10823-1

Beginning :

रोहिण्यादिगते त्रीणि मध्ये तिष्ठति चन्द्रमाः ।
मध्ये सिद्धिजलं स्वादु पूर्वे भूमिजलं शुभम् ॥

End :

गुग्गुलस्य त्रिभागस्य गुडं संयोज्य बुद्धिमान् ।
तैलद्रव्यानुसारेण डढबन्धमिहोच्यते ॥

Colophon :

इति अष्टबन्धनविधिः ।

557

Sl. No. 51953 **आत्रेयराघवाचार्यचरमश्लोकः** Ms. No. P. 6057-3

Beginning :

अब्दे चाङ्गिरसाख्ये गतवति वृषभं तिग्मगौ कृष्णपक्षे
पञ्चम्यां भानुवारे त्वहनि प्रथमके वैष्णवे मे सुमेधाः ।
आत्रेयगोत्राम्बुधीन्दुर्निगमजलनिधिश्श्रीशपादाब्जसेवी
स्वाचार्यस्य पदाम्बुजं शुभमगात् श्रीराघवार्यो महान् ॥

End :

आङ्गीरसाब्दे वृषभे पञ्चम्यां रविवासरे ।
श्रीराघवार्यः श्रवणे तारेऽगाद्वैष्णवं पदम् ॥

Colophon :

———

558

Sl. No. 51954 **आनेगोन्दिशासनम्** Ms. No. A. 47-20

Beginning :

ब्रह्मणे ह्येकपूर्वेभ्यः पूर्वेभ्यः परमात्मने ।
नमो गणाधिपतये नलिनाक्षाय शम्भवे ॥
विद्याशङ्करशिष्यस्तु विद्यारण्ययतीश्वरः ।
कदाचित् पर्यटन् भूमिं प्रादक्षिण्येन सर्वतः ॥

End :

एतेषां बलिमाधाय पुरस्तादेव भूपतिः ।
विचार्य च महादानं यज्ञार्थं वीक्षितामिह ॥

ಈ ಶಾಸನದಲ್ಲಿ ಇದ್ದ ಮರ್ಯಾದೆಯಲ್ಲಿ ನಡೆದರೆ ಸರ್ವಾರ್ಥವು ಸಾರ್ಥವಹುದು. ಈ ಶಾಸನಕ್ಕೆ ಪ್ರತಿಶಾಸನವಮಾಡಿದರೆ ಅಭಿಚಾರಿಕೆಯೆ ಬಹುದು. ಬಲ್ಲವರು ನೋಡುವರು.

Colophon :

ಆನೆಗೊಂದಿಯಲ್ಲಿದ್ದ ತಾಮ್ರಶಾಸನದ ಪ್ರತಿ ಕಲ್ಯಾಣಮಸ್ತು ।

559

Sl. No. 51956 आशीर्वादचूर्णिका Ms. No. P. 10367-20

Beginning :

स्वस्ति श्री अष्टाशीतिसहस्राणां द्विजगुरुदैवत्यानां इन्द्राग्नीयमनैऋत्यवरुण-वायव्यकुबेरईशान्याद्यष्टदिक्पालकानां अतिशयमणिमाणिक्यमयूखजाज्वल्यमान-सकलदेवत्यशिरोमणि + + + सन्दोहानाम् ।

End :

सुतिथिं सुवीरं सुनक्षत्र सुयोगं सुकरणं सुचन्द्रताराबलं सुलग्नं सुमूर्तं निरन्तर-मनुकूलं सर्वे ग्रहाः सुनक्षत्राः शुभएकादशस्थाः फलदाः सुप्रसन्नाः भवन्तु ।

Colophon :

———

560

Sl. No, 51961 कुशलपत्रम् Ms. No. P. 7531-1

Beginning :

वीटीचेटीभवति भजतां यत्प्रसादान्नराणां
वाणी काणी भवति च पुनः गीष्पतिर्यत्पुरस्तात् ।
नाम्ना भूम्नाप्यदिगतवतां सज्जयत्वं गुरूणां ,
तेषां केषामपि न × × तरन्ति केऽहं करोमि ॥

End :

तदात्वे वृत्तवृत्तान्त इयानिति मया श्रुतम् ।
ह्यस्तनेऽह्नि पुनः श्रीमान् वेदान्ताचार्यनामकः ॥

मामकश्वशुरश्चेदं उवाच विबुधाग्रणीः ।
नायान्ति यदि मासेऽस्मिन् सज्जयार्या मनीषिणः ॥
विज्ञप्तं गुरुसन्निधौ दृष्ट्वा चैतद्गुरवः प्रमाणम् ॥

Colophon :

———

561

Sl. No. 51963 क्रयदानपत्रे पठनश्लोकाः Ms. No. P. 9965-107

Beginning :

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भ मूलस्तम्भाय शम्भवे ॥
हरेर्लीलावराहस्य दंष्ट्रा दण्डः स पातु नः ।
हैमाद्रिकलशा यत्र धात्री छत्रश्रियं दधौ ॥

End :

देवद्रव्यं गुरुद्रव्यं विप्रद्रव्यं तथैव च ।
उपेक्षितं तु नरकं भक्षितं तु कुलक्षयम् ॥
तटाकानां सहस्रं तु अश्वमेधशतानि च ।
गवां कोटिप्रदानेन भूमिदानाद्भवेद्ध्रुवम् ॥

Colophon :

———

562

Sl. No. 51965 गरिकेग्रामताम्रशासनम् Ms. No. P. 8729-8

Beginning :

पुरुषानचि(?)दविशेषां दृष्ट्वा दयमानमानसस्य पुरा ।
पुरुषोत्तमस्य नाभीपुष्करगर्भे हिरण्यगर्भोऽभूत् ॥

+ + तस्य श्रीदेवराजस्य सम्मत्या शास्त्रसम्मतम् ।
तदिदं गरिके हल्या लिख्यते ताम्रशासनम् ॥

End :

स्वदत्ताद्द्विगुणं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ।
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥

Colophon :

———

563

Sl. No. 51966 चतुरङ्गक्रीडा Ms. No. C. 2779

Beginning :

अथ चतुरङ्गप्रकारश्लोकाः उच्यन्ते —
दुर्बोधं कालिदासीयं तथा वाररुचिं मतम् ।
सुबोधा चतुरङ्गस्य क्रियते चाक्षरावलिः ॥
वसिष्ठो नाम तेजस्वी महर्षिरभवत्पुरा ।

End :

नरेन्द्रा यान्ति निधनं नितरामसुहृद्गणैः ॥
अथ नरेन्द्रविजयः —
अनन्यशासनो राजा चतुस्सागरमेखलाम् ।
शशास धरणीं + क्रो देवेन्द्रः स्वपुरीमिव ॥ १५ ॥

Colophon :

इति चतुरङ्गप्रचारप्रकारः समाप्तः ।

564

Sl. No. 51972 तत्त्वदीपविवरणव्याख्या Ms. No. B. 808

Beginning :

वन्दे श्री वल्लभाचार्यानपारकरुणान्वितान् ।
स्वीयानां तत्त्वदीपेन स्वान्तध्वान्तनिवारकम् ॥ १ ॥
नन्दसूनुपदसौख्यदं नवं दुःखसङ्गदलनातिवैभवम् ।
श्रीमदग्निपदपङ्कजासनं भावयामि सततं नमामि च ॥
\+ + + + +

अथ श्रीमद्वल्लभाचार्यचरणाः + + कलासंबन्धं सोपादूघातं निरूपयन्तः तत्त्वदीपविवरणं प्रतिजानीते । सर्वोद्धारेत्यादिभिस्त्रिभिः । + + +

End :

प्रलयजलदवृष्टेर्गोकुलस्यावनाय
स्वमृदुकरनखाग्रन्यस्तगोवर्धनाद्रेः ।
भगवत इह शक्त्या तत्त्वदीपप्रकाशा-
वरणभरविभङ्गे प्रक्रियाद्या समाप्नोत् ॥

Colophon :

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रचन्द्रिकानिरस्तहार्दतमसस्तद्दासदासस्य यदुपतिसुतस्य पीताम्बरस्य कृतौ तत्त्वदीपप्रकाशावरणभङ्गे शास्त्रार्थप्रकाणं संपूर्णम् ।

565

Sl. No. 51973 तारकब्रह्मलक्षणम् Ms. No. P. 7945-6

Beginning :

चक्षुर्मध्ये सितं ज्ञेयं पर्वमङ्गुष्ठमातृकम् ।
तथार्धे चापि पर्याप्तं तस्याग्रे सूक्ष्मकं त्विदम् ॥

End :

तन्मध्ये शङ्करं वृक्षं द्वयं विद्यमानस वै ।
यात्तर्बयि (?) व्याप्ते मधेस्तित्वस्वारूपकम् ॥
अतोऽस्मिति किं नैव तारकब्रह्मलक्षणम् ।

Colophon :

566

Sl. No. 51974 तिरुमलाचार्यचरमश्लोकावळी Ms. No. P. 7304–3

Beginning :

वर्षेऽस्मिन् बहुधान्यके गृहपतौ सद्दक्षिणाशावशे
सूर्जे मञ्जुळशारदागमवशाद्वारेस्वके मित्रभे ।
शुक्लसृष्टदिने स्वसेव्यगुरुधीवैशद्यविद्योतितः
श्रीमत्तिर्मलको विदोऽद्यपरमं स्थानं जगामञ्जसा ॥

End :

बहुधान्ये शरदि ययौ कार्तिकशुक्लच्छदे द्वितीयायाम् ।
श्रोतिर्मलार्यधीराः स्वगुरोः पदपङ्कजं स निर्व्याजम् ॥

Colophon :

567

Sl. No. 51976 त्रिनयनेशश्रीमुखम् Ms. No. C. 3406–4

Beginning :

शुक्लाम्बर + शान्तये ॥
श्रीमत्सह्यशिलोच्चयोर्ध्वविलसच्चामुण्डिकादृयुत्तरे
कावेरीकपिलान्तराळमहिषाधिष्ठानन्नामाङ्किते ।

रम्यश्री महिशूरनामनगरे सर्वोत्सवैस्संयुतो
लोकानामपवर्गदाननिरतश्रीशङ्करो राजते ॥ १ ॥
श्रीमत्त्रिपुरसुन्दर्या संयुक्तः परमेश्वरः ।
तृणबिन्दुतपस्सिद्ध पूजिताङ्घ्रिसरोरुहः ॥ २ ॥ + +
श्रीमत्त्रिनयनेशेन श्रीमुखं प्रतिपाद्यते ।

End :

लोकसंरक्षकस्यास्य लिङ्गरूपमहेषितुः ।
श्रीमत्त्रिनयनेशस्य शासनं विश्वशासनम् ॥

Colophon :

568

Sl. No. 51979 दशब्राह्मणलक्षणम् Ms. No. P. 10318-2

Beginning :

दशब्राह्मणाः —
देवो मुनिर्द्विजो राजा वैश्यः शूद्रो बिडालकः ।
पशुम्लेच्छश्च चण्डालो दशब्रह्मण उच्यते ॥ १ ॥
भिक्षा चेशीज्ञाननिरतः(?) सन्तुष्टस्तु जितेन्द्रियः ।
वेदशास्त्रार्थतत्त्वज्ञो देवब्राह्मणसन्निधौ ॥ २ ॥
कन्दमूलफलाहारो वनवासरतस्तथा ।
ऋतुकाले वधूगामी मुनिर्ब्राह्मण उच्यते ॥ ३ ॥
+ + + + +

End :

अभक्ष्याभक्षणश्चैव अभोज्याभोजनस्तथा ।
अगम्यागमनश्चैव पशुर्ब्राह्मण उच्यते ॥

क्रूरात्मावाक्यनिष्ठुरः परद्रव्यापहारकः ।
ब्राह्मबाधामृगद्वेषी म्लेच्छब्राह्मण उच्यते ॥ ९ ॥
क्रुरस्वभावनिरतः सदा च परनिन्दकः ।
देवब्राह्मणद्वेषी चण्डालब्राह्मण उच्यते ॥

Colophon :

इति दशब्राह्मणलक्षणम् ।

569

Sl. No. 51981 दानशासनम् Ms. No. P. 8830

Beginning :

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भ मूलस्तम्भाय शम्भवे ॥
अगजानपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानां एकदन्तमुपास्महे ॥

End :

इदं स्वहस्तलिखितैः आत्मनामाक्षरैः शुभैः ।
संचिह्नितं भूवराहमुद्रया च यविराजितम् ।
सर्वलक्षणसम्पन्नं ताम्रशासनमुत्तमम् ॥
महिषानगरक्षेत्रे ....
दानात् स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
श्रीचामुण्डेश्वरीपादारविन्दवे गति ।

Colophon:

शुभमस्तु ।

570

Sl. No. 51982 दानशासनम् Ms. No. P. 10762-21

Beginning :

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदमं यमश्च ।
नभश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम् ॥

End :

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
षष्टिर्वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥

Colophon :

———

571

Sl. No. 51986 द्वात्रिंशल्लक्षणनिर्णयः Ms. No. P. 4212-30

Beginning :

पञ्चदीर्घः पञ्चसूक्ष्मः सप्तरक्तः षडुन्नतः ।
त्रिपृथुः लघुगम्भीरौ द्वात्रिंशल्लक्षणं स्मृतम् ॥

पञ्चदीर्घः चतुर्ह्रस्वः चतुस्सूक्ष्मः षडुन्नतः ।
सप्तरक्तः त्रिविस्तीर्णः त्रिगम्भीरः प्रशस्यते ॥

End :

तालुजिह्वाधरौष्ठौ च सप्तरक्तं प्रशस्यते ।
उरश्शिरो ललाटं च विस्तीर्णापि प्रशस्यते ॥

मुखनाभिशरीरं च त्रिगम्भीरं प्रशस्यते ।
एतानि द्वात्रिंशल्लक्षणानि ॥

Colophon :

॥ श्रीः ॥

572

Sl. No. 51987 द्वारकाचक्रलक्षणम् Ms. No. P. 3592-2

Beginning :

चक्रपाणेस्तु तद्भेदं लक्ष × × मम सांप्रतम् ।
कथयस्व महाभाग त्रैलोक्य हितकारकम् ॥
नारदस्य वचंः श्रुत्वा उवाचेदं पितामहः ।
अच्युतस्य हरेः पादात् समुद्भूतं सदाऽनघा ॥ २ ॥
भागीरथीति .... चक्रतीर्थोद्भवाः ।

End :

शङ्खं च दक्षिणावर्तं तत्पुरस्संप्रपूजयेत् ।
तत्र नित्यं महाविष्णुः महालक्ष्म्या समन्वितः ॥ ३५ ॥
सप्तजन्मकृतं पापं संहृत्य हरिरव्ययः ।
ददाति सर्वसौभाग्यं अन्ते सायुज्यमाप्नुयात् ॥ ३६ ॥

Colophon :

श्री द्वारकाचक्रलक्षणं संपूर्णम् ।

573

Sl. No. 51989 नवरत्नप्रकाशटिप्पणम् Ms. No. C. 1548

Beginning :

नवरत्नप्रकाशे चिन्ता सन्तासन्तानेति यत्पदाम्बुजरेणवः समाश्रिता देहेन्द्रि-

यादिकं शोधयन्ति । वासनात्मकं लिङ्गं नाशयन्तीत्यतः कारणशोधनद्वारा चिन्तानां वक्ष्यमाणानां सन्तानो वक्ष्यमाणप्रकारेण तन्निवर्तनेऽपि कुसृत्युद्भावनं तद्धन्तार इत्यर्थः । + + + +

End :

श्रीमदाचार्यपण्डितैः कर्तृभिः स्वयं समुद्धृतानि न तु गुर्वादिशिक्षाया तादृशानि मयाचेत्थमुज्ज्वलीकृतानि रत्नानि स्व हृदि धृत्वा एतदुक्तप्रकारेण व्रजादिपं भक्ता भजन्तु । येन चार्योद्धृष्टतरत्नप्रकारभजनेनासौ न विमुञ्चतीत्यर्थः ।

Colophon :

इति श्रीवल्लभकृतनवरत्नप्रकाशटिप्पणं समाप्तिमगमत् ।

574

Sl. No. 51993 नामामृतरसायनम् Ms. No. P. 4113–1

Beginning :

सदा सर्वेष्टदं जन्तोस्सर्वानिष्टनिवारकम् ।
श्रीरामनामजयतु श्रीयो हेतु शिखामणिः ॥

सदानन्दश्रीमाननुपधिककारुण्यविवशो-
जगत्प्रेमाय श्रीहरिगिरीशरूपं विधृतवान् ।
अपर्याप्तं रूपं जगदपन एतत्पुनरिति
अभुर्जागर्ति श्रीहरिगिरीशं नामात्मकतया ॥

End :

सकृत्प्रपन्नाखिललोकरक्षाकरः परात्मा सकलस्य हेतुः ।
रामो महेशो रमणीयकीर्तिर्दयासुधाब्धिर्दयता ममाशु ॥

श्रीरामस्य कृपादृष्ट्या तन्नामस्मृतिलब्धया ।
कृतं तत्प्रीतये भूयान्नामामृतरसायनम् ॥

Colophon :

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीमद्विश्वाधिकेन्द्रमहामुनिवरपादपद्मपरागोप-जीविना श्रीबोधेन्द्रयतिना श्रीरामचन्द्रकृपा × पदवीक्षणबलेन कृतं नामामृतरसायनं संपूर्णम् ।

575

Sl. No. 51994 नामामृतरसोदयः Ms. No. P. 4112

Beginning :

सदा सर्वेष्टदं जन्तोस्सर्वारिष्टनिवारकम् ।
श्रीरामनाम जयतु श्रेयोहेतुशिखामणिः ॥

\+ + + + +

इति रूपधरं नौमि शङ्करं लोकशङ्करम् ।
श्रीरामस्य कृपादृष्ट्या त × × मस्कृति लब्धया ॥
क्रियते जगदीशस्य नामामृतरसोदयः ।
इह खलु ....

End :

अस्य चानन्त इति ऋग्वेदसन्दर्भः । अस्य चानन्त इति यजुर्वेदसन्दर्भः । तथा त्रिर्देव इति ऋग्वेदसन्दर्भः । तथा यजुर्वेदे पारक्षुद्रशाखायां ध्रुवान इत्यादि सन्दर्भः । तथा यजुर्वेदसंहितायां प्रतत इत्यादि संदर्भः । ऋग्वेदे तमुष्टु-हीत्यादि सन्दर्भः । तत्रैव ऋग्वेदेन मस्याकलकवीः नमित्यादि सन्दर्भः । साम-वेदे × तत्त इत्यादि सन्दर्भः । × × ×

Colophon :

———

576

Sl. No. 51995 नास्तिकमतखण्डनम् Ms. No. P. 3746-1

Beginning :

ननु जीवसद्भावे किं मानमिति चेन्न । अहं सुखी दुःखीति मानसप्रत्यक्षस्य मानत्वात् । न च आत्मा तावत् न प्रत्यक्ष इति भाष्यविरोध इति वाच्यम् । तस्य परात्मिपरात्मविषयत्वात् ।

End :

.... आत्मा स च दीपप्रभावत् सङ्कोचविकासकारीत्याहुः । तदप्य-किञ्चित्करम् । तस्य नित्यात्वापत्या । तच्छिरसि पूर्वोक्तदोषवज्रप्रहारपातनात् । अत एव क्षपणका जैना इत्युच्यन्ते । इति संक्षेपः ।

Colophon :

इति नास्तिकमतखण्डनम् ।

577

Sl. No. 51996 निधिप्रदीपिका Ms. No. B. 139

Beginning :

भक्तिप्रज्ञार्थकारी प्रळयविषयमनुब्रह्मकङ्कलधारी
स्वेच्छाक्रीडानुकारी त्रिगुणमयमहासद्गुणब्रह्मचारी ।
दृश्यद्भिस्सन्द्रकारी रणभयविभुजद्वन्द्वदैत्यप्रहारी
पायान्नो नीलकण्ठः कुपितमनसिजप्राणनिर्वाणकारी ॥

\+ \+ \+ \+ \+

त्रैलोक्यध्वान्तविध्वंसप्रदीपा इव शाश्वतम् ॥
निधिप्रदीपनामायं ग्रन्थः श्रीकण्ठशम्भुना ।
क्रियते सारमादाय सिद्धशाबरतन्त्रकात् ॥

End :

मन्त्रतन्त्रादिभिः कुर्यात् भवनं नान्यथा भवेत् ।
अविचारेण यः कुर्यात्प्रतिमादिप्रभेदनम् ॥
सोऽचिरेणैव पापात्मा यमस्य सदनं व्रजेत् ।

Colophon :

इति श्रीनिधिप्रदीपे विधिस्थाननिर्देशो नाम प्रथमः परिच्छेदः ।

578

Sl. No. 51999 पट्टाभिषेकाश्वलक्षणम् Ms. No. C. 696-21

Beginning :

अथ रुद्रयामलोक्त अश्वपट्टाभिषेकविधिस्तल्लक्षणानि च लिख्यन्ते ।
अथातस्संप्रवक्ष्यामि हयानां लक्षणं शुभम् ।
मन्दास्सहिष्णुर्मतिमानरोगप्रियदर्शनः ॥ १ ॥

End :

शस्तं शिरस्समं वृत्तं आवर्तद्वयशोभितम् ।
ह्रस्वताकर्णयोश्शस्ता तीक्ष्णता तनुता तथा ॥ ९ ॥
सुदृढा कुञ्चिता दीर्घा ग्रीवा धन्या स्मृता बुधैः ।

Colophon :

इति पट्टाभिषेकाश्वलक्षणानि ।

579

Sl. No. 52001 पुराणादिगणनम् Ms. No. P. 4001-35

Beginning:

समिजस्य श्रयमाणः पुरस्तात् ब्रह्म म + नो अजरं सुवीरम् ।
....

मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनाङ्गिराः ।
यमापस्तम्भसंवर्ताः कात्यायनबृहस्पती ॥
....
इति पुराणानि अष्टादशेति पुराणे संस्पष्टमुक्तम् ॥

End :

तथाप्यष्टादशविधं शतकोटिप्रविस्तरम् ।
पुराणं मुनिभिः प्रोक्तं + + + कृतयुगे नृप ॥
उत्तमं स तु माहात्म्यं उत्तमं सेतुतीर्थकम् ।
उत्तमं दैवतं रामः गुरुवाक्यं तथोत्तमम् ॥

Colophon :

————

580

Sl. No. 52002 पूर्णय्यचरित Ms. No. C. 2405–2

Beginning :

श्रीकान्तमानम्य सुकान्तवक्त्रं
एकान्तभक्तैर्नुतदिव्यकीर्तिम् ।
नत्वा गुरून् विष्णुभक्ताग्रगामि-
श्रीपूर्णराजस्य कथां मनोज्ञाम् ॥
.... सत्सत्यशैलान्वयजातभीम
नामाप्रवक्त्यद्य पुरातनोक्तम् ।

End :

एताद्(?)दृष्ट्वानुविबुधाः त्यक्त्वा दोषान् गुणान् स्थितान् ।
हंसः क्षीरमिवात्यन्तं गृह्णन्तु दयया मयि ॥

य इदं श्रृणुयाद्भक्त्या विष्णुभक्ताग्रगामिनः ।
पूर्णराजस्य चरितं स भवेत् पुण्यकीर्तियुक् ॥

Colophon :

इति श्रीपूर्णराजचरितरत्नमाला संपूर्णा ।

581

Sl. No. 52007 भगवन्नामकौमुदी Ms. No. A. 145

Beginning :

अथ नामकौमुदी प्रारम्भः ।
अंहः संहरदखिलं सकृदुदयादेव सकललोकस्य ।
तरणिरिव तिमिरजालं जयति जगन्मङ्गलं हरेर्नाम ॥
चेतश्चकोरसन्तोषपीयूषाम्बुधिवृद्धये ।
इयं विस्तार्यते श्रीमद्भगवन्नामकौमुदी ॥

End :

किरणलहरीचान्द्री चेतश्चकोरचरन् कृति-
र्भवतु भवतां नामज्योतिर्मुदे मदनद्रुहः ।
येन भागवतव्याख्या कृतामृततरङ्गिणी ।
अद्वैतमकरन्दश्च सोऽकरोन्नामकौमुदीम् ॥

Colophon

इति श्रीपरमहंसपरिव्राजकाचार्य श्रीमदनन्तानन्दरघुनाथपादपद्मोपजीविनः श्रीमन्नृसिंहसूनोः लक्ष्मीधरस्य कृतौ श्रीभगवन्नामकौमुद्यां नामकीर्तनस्य केवलस्यैव पुरुषार्थसाधनत्वप्रतिपादनं नाम तृतीयः परिच्छेदः । समाप्ता नामकौमुदी ।

582

Sl. No. 52008 भगवन्नामसूर्योदयः Ms. No. P. 4113-2

Beginning :

सदा सर्वेष्टदं जन्तोस्सर्वारिष्टनिवारकम् ।
श्रीरामनाम जयतु श्रेयोहेतुशिखामणिः ॥

सदानन्द श्रीमाननुपधिकारुण्यविवशो-
र्जगत्प्रेमाय श्रीहरिगिरीशरूपं विधृतवान् ।
अपर्याप्तं रूपं जगदपन एतत्पुनरिति
अभुर्जगति श्रीहरिगिरीशनामात्मकतया ॥

End :

दृश्यमानप्रवृत्तेरुपपन्नत्वं तथा स्वधर्मं सङ्ग्रहेण कुर्वन्नेव नामकीर्तनं कार्य-मित्येतरादिकं च भगवत्पादादिभिस्तत्र दर्शितमेव । तद्ग्रन्थत्रये विस्तरेणोक्त-मिति सर्वं सुस्थम् । + + + + +

श्रीरामकृपया रामनामसूर्योदयश्शुभः ।
प्रकाशितः प्रीतयेस्तु श्रीरामकृपाम्बुधेः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्विश्वादिकेन्द्रमुनिवर्यपादपद्मपरागोप-जीविना श्रीमद्बोधेन्द्रमुनिना सम्यक् प्रकाशितो भगवन्नाममूर्योदयस्सम्पूर्णः ।

583

Sl. No. 52011 भूगोलनिर्णयः Ms. No. P. 3799-1

Beginning :

पञ्चाशत्कोटिभिः स्यात् मितमवनितलं योजनानां तथाहि,
स्याज्जम्बूद्वीपमेकं नियतमुदधिना तावता वेष्टितं तत् ।

प्लक्षद्वीपिने(?) सोपि द्विगुणविततिना तावतेक्ष्वब्धिनाऽसौ
द्वीपा द्वैगुण्यभाजः स्वसदृगुदधिभिः संवृतास्त्वेवमेव ॥

End :

शैलैः पातालरन्ध्रैः नवदशशतकैः सप्तभिर्भूरधोधो
मध्ये मध्ये सहस्रैः भवति हि तदधः शेषलोको जलं च ।
तस्याधो नारकाः स्युः तदध इषुदृशः कोटयः किञ्चिदूनाः
पञ्चाशत्कोटितुङ्गं विततमिदमभूत् × स्तुकोटि ॥

Colophon :

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु ब्रह्माण्डस्थितिसप्तकम् ।

584

Sl. No. 52013 मतभेदचन्द्रिका Ms. No. P. 2877-1

Beginning :

रघुनाथं सदा नत्वा रघुनाथाख्यसूरिणा ।
मतभेदान्विलिख्याथ मतभेदान्विवक्ष्यते ॥
चन्द्रिकाख्यसर्वमतभेदज्ञानविशेषिका ।
तत्तन्मतै विद्यमानविशेषश्च विलिख्यते ॥
शिवाः पाशुपताश्चैव वैष्णवा भैरवास्तथा ।
गाणापत्यमताश्चैव सौरशाक्ताश्च लैङ्गिनः ॥

End :

अवतार इति ख्यातः शोबकृत्फाल्गुने शुभे ।
कृष्णप्रतिपदि ज्ञेया आश्रमस्वीकृतिश्शुभा ॥

चतुर्थे हायने मासे एकादश्यां दिनत्रिके ।
वरदाख्यनदीतीरे स्वर्णपुर्यभिधे शुभे ॥
वृन्दावनान्त्व(?)भूत्तत्र रचमाढोपनामनि ।
रसेन्द्रमुनिचन्द्रेण १७१६ सत्यसन्धो महामुनिः ॥
हरिश्चन्द्रावतारेण जातस्सर्वसुखावहः ।
आनन्दे ज्येष्ठशुक्लस्य द्वितीयायामभूत्किल ॥
चतुर्थे हायने + + + +
ततस्सवर(?)प्रोक्तः सर्वेषां वरदायकः ॥
कर्णावतारे सञ्जातः शके × सप्तभू १७१९ ।
मिते वर्षे पैङ्गले च + + + +

Colophon :

———

585

Sl. No. 52014 मल्लिकार्जुनदानशासनम् Ms. No. P. 666–13

Beginning :

अव्यादव्याहतैश्वर्यकरुणो वारणाननः ।
वरदो विघ्नतिमिरमिहिरो हरनन्दनः ॥
+ + + +
मल्लिकार्जुननामासौ माधवप्रियदर्शनः । + +
गोदानमादौ गुरवे विधाय श्रीविष्णुवर्याय नि × × नाय ।
श्रीकार्ययज्ववरसूरिसुतात्मजाय पुत्राय गोविन्दसुधीवरस्य ॥

End :

मल्लिकार्जुनराजेन्द्रशासनाच्छिगुणात्मजः ।
शिल्पज्ञः केम्पयाचार्यो लिलिखे ताम्रशासनम् ॥

अस्याग्रहारदेशस्य चतुस्सीमाविनिर्णयः ।
सर्वेषां सुखबोधाय लिख्यते देशभाषया ॥

स्वयत्ता × × ३५ ॥ दानपालन ३६ ॥

ब्रह्मस्वपरिपुष्टानि वाहनानि बलानि च ।
युक्तकाले विशीर्यन्ते सैकताः से × × वो यथा ॥

Colophon :

586

Sl. No. 52016 मुद्राराक्षसोपोद्घातप्रकरणम् Ms. No. P. 1067-4

Beginning :

श्रीमद्विशाखदत्तीये मुद्राराक्षसनाटके ।
कथोपोद्घातमाचष्टे संविधानानुबुद्धये ॥

End :

क्रूरग्रहस्स इत्यस्मिन् पद्ये प्रस्तावनामुखे ।
उक्तमर्थं म्लेच्छदिशा कविरन्ववदन्मनाक् ॥

Colophon :

इत्युपोद्घातप्रकरणं संपूर्णम् ।

587

Sl. No. 52017 मूर्तिभेदकथनम् Ms. No. P. 3592-4

Beginning :

कूर्मश्च पारिजातश्च वराहो द्विविधस्तथा ।
विद्युज्जिह्वो नृसिंहश्च गोपालो वेणुभूषितः ॥ १ ॥

कालीयमर्दनश्चैव नरनारायणस्तथा ।

End :

कुक्षिपूर्वो नृसिंहश्च बालपूर्वो नृकेसरी ।
कलिम(?) दामोदरश्चैव श्रीकराः सूक्ष्मचक्रकाः ॥ १० ॥
(?)मालाधरमूर्तयो गण्यन्ते बहुत्वतः ।

Colophon :

588

Sl. No. 52019 रामानुजार्यचरमश्लोकः Ms. No. P. 7260-6

Beginning :

अब्दे दुन्दुभिनामके दिनमणौ तौलिं गते सोमभे
पक्षेन्दो(?)रभिवृद्धिकारिणि दिने सोमे चतुर्थ्यां तिथौ ।।
श्रीवादीभमृगेन्द्रवंशजलधिः रामानुजार्यो ह्यगात्
स्वार्थप्राप्तशठारिसूक्तिविवृतिश्रीभव्यवित्तत्पदम् ।।

End :

दुन्दुभ्याख्ये हायनेऽस्मिन् तुलायां मृगशीर्षभे ।
इन्दुनारेऽगमद्रामानुजार्यः स्वार्थपद्युगम् ।।

Colophon :

।। श्रीः ।।

589

Sl. No. 52024 विजयसोमनाथपुरे देवालयनिर्माणचरितम् Ms. No. P. 9097-6
(नुग्गेहळ्ळिदेवालयनिर्माणचरितम्)

Beginning :

॥ ಶ್ರೀಃ ॥ ಇಂತು ಬೊಮ್ಮಣ್ಣದಣ್ಣಾಯಕರು ತಾವಗ್ರಹಾರವಮಾಡಿದ ವಿಜಯ
ಸೋಮನಾಥಪುರವಾದ ನುಗ್ಗೆಹಳ್ಳಿಯಲ್ಲಿ ಶಕವರ್ಷ ೧೧೬೮ ನೆಯ ಪರಾಭವಸಂವತ್ಸರದ ಚೈತ್ರ

ಶುದ್ಧ ಬುಧವಾರದಂದು ತಾವು ಪ್ರತಿಷ್ಠೆ ಮಾಡಿದ ಪ್ರಸನ್ನಕೇಶವ–ನೃಸಿಂಹ–ಗೋಪಾಲ ದೇವರಿಗೆ ... ಸದಾಶಿವ ದೇವರಿಗೆ ....

End :

सोमान्थोऽयं धर्मसेतुर्नृपाणां
काले काले पालनीयो भवद्भिः ।
सर्वानेतान् भाविनः पार्थिवेन्द्रान्
भूयो भूयो याचते रामचन्द्रः ॥
दानं वा पालनं वापि दानाद्भूयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादमृतं पदम् ॥

Colophon :

॥ श्रीरस्तु ॥

590

Sl. No. 52025 विजयसोमनाथाग्रहारनिर्माणवृत्तम् Ms. No. P. 9097–5

Beginning :

श्रीकान्तः सततं तनोतु जगतीपोषं परः पूरुषः
क्रीडाक्रोडवपुर्धरस्य धरणी यस्याग्रदंष्ट्रालया ।
सद्यः सन्ततसंपदस्तु वितता सत्त्वोदयादातनोत्
स्पन्दं सिन्धुभिरङ्घ्रिपैश्च पुळकं स्पन्दन्तु भूमीधरैः ॥

End :

लक्ष्म्या यः सहभूतिसौरभयशाः प्रोद्दामदामोदर
क्षीरक्षीराब्धिपारिजातविटपीश्रीवत्सगोत्रोऽभवत ।
सोयं ब्रह्मवरूथिनीपरिवृढः सर्वोत्तमोर्वीपुर-
त्रातोत्तंसितसोमनाथनगरी नामाग्रहारं व्यधात् ।

तत्र केशवगोपालनरसिंहपदोदितम् ।
तत्रैव गिरिजाजानिं सदाशिवसमाह्वयम् ॥

Colophon :

॥ श्रीः श्रीः ॥

591

Sl. No. 52027 वीरोल्लासः Ms. No. P. 908-3

Beginning :

गुरो जपं नामनुतिं पठन् द्विजः
सदा स्मरन् मूर्ध्नि मन + + तः ।
भजन्महामूर्ध्नि च पादुकाह्वं
(?)अलिं पिबन् धन्यजना प्रवर्तते ॥ १ ॥

End :

पेयं पेयं द्रव्यपाने च पेयं
खाद्यं खाद्यं शुद्धिखाद्येति खाद्यम् ।
गन्तं गन्तं वेश्यगृहेषु गन्तं
भावं भावं सर्वदा भावयामि ॥
अभक्ष्यां भक्ष्यते योगी अपानः पिबते सदा ।
अगम्यागमनं यान्ति स योगी नात्र संशयः ॥

Colophon :

इति श्री भुशुण्डिविरचितवीरोल्लासः समस्तः ।

592

Sl. No. 52029 वेङ्कटयतीन्द्रचरमश्लोकः Ms. No. P. 9545-5

Beginning :

अब्दे शोभकृदाह्वये दिनमणौ सिंहं गते पाण्डरे ।
पक्षे सोत्तरफल्गुनीभृगुदिने नक्तं द्वितीयातिथौ ॥

End :

शेषार्यान्वयवेङ्कटार्ययतिराट् कैङ्कर्य(?)कृदङ्गिणः ।
गोविन्दार्यपदारविन्दमगमल्लोकार्यसद्वीक्षणात् ॥

Colophon :

॥ श्रीः ॥

593

Sl. No, 52030 वैदिकविजयध्वज Ms. No. B. 725

Beginning :

श्रीमच्छङ्करभगवत्पादावतारप्रमाणानि ।

सौरपुराणे —

व्याकुर्वन्व्याससूत्राणि श्रुतेरर्थं यथोचितान् ।
स एवार्थः श्रुतेर्ग्राह्यः शङ्करः सविताननः ॥

न ना । न मनुष्यः । किन्तु शिव एवेत्यर्थः ।

End :

देवदेवो महादेवो यथा सर्वैः प्रपूज्यते ।
तथैव वैदिको मर्त्यः पूज्यः सर्वजनैरपि ।
आदित्येन विहीनन्तु जगदन्धं यथा भवेत् ।
तथा वैदिकहीनन्तु जगदन्धं न संशयः ॥

Colophon :

॥ श्रीः ॥

594

Sl. No. 52031 | शङ्खलक्षणम् | Ms. No. P. 4001–29

Beginning :

शङ्खमध्ये स्थितं तोयं भ्रामितं कश(?)चोपरि ।
अग्ने(?)लग्नं मनुष्याणां ब्रह्महत्यायुतं दहेत् ॥
नग्न + न च कू + ण्डो पिशाचोरगराक्षसाः ।
धृत्वा शङ्खोदकं मूर्ध्नि विद्रवन्ति दिशो दश ॥

End :

गोक्षीरवर्णं सस्निग्धं सूत्रसप्तकसंयुतम् ।
ष + रेखात्रययुतं कांस्यनादसमन्वितम् ॥
द्वारकाक्षत्रियाख्यं तन्मध्यमं द्वादशाङ्गुलीम् ।
सहस्रस्याभिषेकस्य फलं प्राप्नोति चां + ज ॥

Colophon :

——

595

Sl. No. 52035 | शास्त्रविरुद्धाचारखण्डनम् | Ms. No. P. 2921

Beginning :

श्रीरामबन्धुं श्रुतहर्षदं हरिं सीतापतिं राघववंशभूषणम् ।
पौलस्त्य मुखे क्षणमाचर + + + शिरसा नमाम्यहम् ॥
अज्ञातश्रीशास्त्रतात्पर्यगन्धाः
तेपि + + चित्का + + ।
ज्ञात्वा चैतत्कार्यं + + मानसारं
श्रुत्वा विद्वान् कृष्णमार्यः करोति ॥

End :

रत्नाकरादिस्मृतिकोशतरात्
संदृश्यता संशययुक्तसद्भिः ।
त्वमताशु(?) या वृद्धिमन्तस्थिता चेत्
शुद्धं दृष्ट्वा × × प्रकाश्य ॥
अन्यः कार्योज्ञातृविश्वासहेतुः ।
नोचेद्दोषो गृह्यतां पण्डितैर्द्यक् ॥

Colophon :

इति विरुद्धाचारखण्डनं समाप्तम् ।

596

Sl. No. 52308 श्रीतत्त्वनिधिः Ms. No. A. 387

Beginning :

लक्ष्मीप्रदानसमये नवविद्रुमाभां
विद्याप्रदानसमये शरदिन्दुशुभ्राम् ।
विद्वेषिवर्गविजये हरिनीलवर्णां
अम्बां त्रिलोकजननीं अजनिं प्रपद्ये ॥
निगमागमतन्त्राणां पुराणवचसामपि ।
धर्मशास्त्रेतिहासानां उपतन्त्रगिरामपि ॥ + +

End :

तत्सम्प्रदायसंशोध्यं नवकं भुक्तिमुक्तिदम् ।
अत्र अतिपूर्वरहस्य का इति वचनात् परापररहस्याख्या योगिनीत्वतिपूर्विकेति दक्षिणामूर्तिवचनात् परापरातिरहस्य .... योगिनीनामसङ्केतः ॥

Colophon :

इति श्रीकृष्णराजमहाराजविरचिते श्रीतत्त्वनिध्याख्यग्रन्थे सङ्ख्यालिपिप्रमुख-कौतुकनिरूपणं नाम नवमो निधिः संपूर्णः । ग्रन्थः सम्पूर्णः ।

597

Sl. No. 52041 **सदाशिवरायदानशासनम्** Ms. No. P. 666-14

Beginning :

नमस्तुङ्गशिर .... । .... शम्भवे ॥

\+ + + + + +

सोऽयं नीतिविशारदः सुरतरुस्पर्धार्थविश्राणन (?)

सर्वोर्वीशनुतः सदाशिवमहारायः क्षमानायकः ।

बाहावद्भुदनिर्विशेषनिखिलां सर्वंसहामुद्वहन्

विद्वत्त्राणपरायणो विजयते वीरप्रतापोन्नतः ॥

End :

मद्वंशजाः परमहीपतिवंशजा वा

ये भूमिपाः सततमुज्वलधर्मचित्ताः ।

\+ + न्तर्ममेव परिपान्ति मुदा चिरेण

तत्पादपद्मयुगलं शिरसा नमामि ॥

Colophon :

598

Sl. No. 52043 **सभानायकलक्षणम्** Ms. No. P. 4212-55

Beginning :

इदं वचनं काशीखण्डे दक्षशङ्करसंवादे श्रीमुष्णमाहात्म्ये व्यासेनोक्तम् —

श्रीमान् धीमान् विवेकी वितरणनिपुणो गानविद्याप्रवीणः

सर्वज्ञः कीर्तिशाली सरसगुणयुतः हावभावेष्वभिज्ञः ।

End :

मात्सर्याद्यैर्विहीनः प्रकृतिहित सदाचारयुक्तो दयालुः
धीरोदाता कलावान् प्रवचनचतुरोऽसौ सभानायकः स्यात् ॥

Colophon :

॥ श्रीः ॥

599

Sl. No. 52044 समरसारसंग्रहः Ms. No. C. 4411–3

Beginning :

नत्वा गुरून् समालोक्य स्वरशास्त्राणि भूरिशः
वक्ष्ये युद्धजपो यापं धार्मिकाणां महीभृताम् ।
बहुधाविदधे सदाशिवोत्र
स्वरतन्त्राणि तदेकवाक्यतां तु ।
भगवानयमेव वेदसम्यक्
गुरुमार्गानुगतोयरस्तु लोकः ॥

End :

वंशे वत्समुनीश्वरस्य शिवदासाख्याङुख्यातितः
सम्राडग्निचिदाय यस्य जनकः श्रीसूर्यदासोऽजनि ।
यन्मातुर्यशसादिष्टो दशविशालाक्ष्यावलाक्ष्यावलासा-
व्यदात्सम्प्राम्यस्वर × सुसारविचिर्तिं रामो वसन्नैमिषे ॥

Colophon:

———

600

Sl No. 52045 **समरसारसंग्रहटीका** Ms. No. C. 4411-4

Beginning

अभिवन्द्य रामचन्द्रं गुरुं तदुक्तं स्वरग्रन्थं
विवृणोमि यथा प्रज्ञं तदभिहितानुसारेण ।

तत्र श्री रामचन्द्रनामग्रन्थकृत्प्रारीप्सितग्रन्थपरिसमाप्तिपरिपन्थिप्रत्यूहापोहाय शिष्टाचारपरिपालनाय च गुरुप्रणामं विधाय चिकीर्षितं परिजानीते । नत्वेति—

End :

भूतेन दयादिशोवलाक्षाः धवलिताः स रामचन्द्र नाम सोमयाजी कविः नैमिषे अरण्ये वसन् प्राज्यतत्त्वर सुतस्य सारोभ्युपयुक्तां तस्य विचिंत संचयं व्यदधा × करोत् इत्यन्वयः ।

Colophon :

इति श्री समरसारसंग्रहटीका भरतकृता समाप्तिमगमत् ।

601

Sl. No. 52050 **सहस्रर्षिगोत्राध्यायः** Ms. No. P. 1895

Beginning :

श्रीमदयोध्यापुरवरश्रीधर्मपालवरगे —
श्रीमद्भुवनगिरिनगरीनाथं नगरेश्वराभिधं वन्दे ।
नमः परमकल्याणरूपिणेऽर्धेन्दुयोनये ॥
नगरेश्वरदेवाय श्रीधनाद्रिकृतौकसे ।
कुबेरमहाऋषिगोत्रम् । कण्वमहाऋषिगोत्रम् ।
कोशाढ्यमहाऋषिगोत्रम् । कोविदेन्द्रमहाऋषिगोत्रम् ।....

End :

गोत्रजां × गजां कन्यां कामतः परिणीय यः ।
प्रजामुत्पाद्य तत् कुर्यात् गुरुतत्प्रकृतव्रतम् ॥

त्यागं कृत्वा ततस्तां तु पश्चात् चान्द्रायणं चरेत् ।
योगात्तु तां परित्यक्त्वा पालयेज्जननीमिव ॥

Colophon :

सम्पूर्णम् ।

602

Sl. No. 52052 सिद्धान्तरहस्यम् Ms. No. A. 819

Beginning :

अत्रेदं रहस्यम्.। अस्ति भगवतो रूपद्वयम् । तत्र जीवान्तस्थमाद्यं बहिष्ठं द्वितीयम् । तदेव प्रलये सकलावतारलयाधिष्ठानम् । तस्मादेव च सृष्टावखिलावताराणां सम्भवः ।

End :

भगवत्समीप एव तमुपासीना स्वरूपेण लीलागृहीतविग्रहैवासङ्कल्पमात्रसाध्यान् दिव्यभोगान् तारतम्येन भुञ्जाना न कदाचित्पर्यावर्तन्ते इत्यशेषमिति मङ्गलम् ।

Colophon :

इति मोक्षप्रकरणम् ।
रूपैः विचित्रैः .... हृदये नमोस्तु ।
विस्तरस्तु अस्मद्गुरुचरणविरचितायां अध्यात्मरञ्जन्यां द्रष्टव्यः ।

603

Sl. No. 52053 सृष्टिप्रकरणम् Ms. No. P. 4212–42

Beginning :

सृष्टिप्रकरणम् ।

एवं विहितवृत्तीनां जीवन्मुक्तिदशायुजाम् ।
निजसौख्यानुभवता × × जामदुद्यतः ॥
प्रलये चरमाङ्गस्य नाशं प्राप्ते क्रमेण तान् ।
प्रवेशयति बिम्बानां देहेषु श्रीपतिः प्रभुः ॥

End :

एवं त्रिरूपो भगवान् पुरुषाख्यो रमापतिः इति मार्कण्डेयपुराणे —

श्रीमद्बृहदारण्यकभाष्ये —

सदा सर्वगुणापानात् आपो नारायणः स्मृतः ।
द्वितीयं रूपमसृजत् वासुदेवं स आत्मनः ॥ इति ।

Colophon :

———

604

Sl. No. 52056 **होमविध्यनुक्रमणिका** Ms. No. C. 4697-18

Beginning :

नक्षत्र दिन	अश्विनी १०	भरणी २१	कृत्तिका ७	रोहिणी ८	मृगशिरा ५	आरिद्रा १२
देवता	अश्विनौ	यम	अग्नि	प्रजापति	सोम	रुद्र
मन्त्रः	प्रातर्युजा	यमायसोमं	अग्निं दूतं	प्रजापते	आप्यायस्व	कद्रुद्राय
छन्दः	गायत्री	अनुष्टुप्	गायत्री	त्रिष्टुप्	गायत्री	गायत्री
ऋषिः	मेधातिथिः	यज्ञः	मेधातिथिः	हिरण्यगर्भः	गौतमः	घोरकण्वः
बलि	दध्योदन	माषान्नं	ओदन	क्षीरान्नं	मुद्गतिलाश्च	पायसान्नं

End :

वार	रवि	चन्द्र	मङ्गल	बुध	गुरु	शुक्र
दीप	घृत	घृत	घृत	घृत	घृत	घृत
नैवेद्य	पायस	नानाभक्ष्याणि	पायस	पायसलड्डुक	शर्कराज्य	घृतपक्व
बलि	पायसपुष्प	नानाखाद्य घृतपायस	पायस	पायस	अपपूपायस	पायस
होमद्रव्य	पायस	तिलयव	तिलयवाज्य-पायस	तिलयवाज्य	तिलयवधाना	यवाज्यमधु

Colophon :

———

605

Sl. No. 52066 अश्वलक्षणम् Ms. No. P. 4809-2

Beginning :

ಯಾವ್ರದೊಂದು ಕುದುರೆಯು ಶಂಖಧ್ವನಿ + + + ಗೆ। ಪುಣ್ಯಾಹದ ಘೋಷದ ಹಾಗೆ ಗಜಧ್ವನಿ ಹಾಗೆ ಸಿಂಹದ ಹಾಗೆ ಕರ್ಣಶ್ರಾವ್ಯವಾಗಿ ನಾದಯುಕ್ತವಾಗಿಯೂ ಧ್ವನಿ ಮಾಡುತ್ತದೆಯೋ

End :

येषां वै जनता सम्यक् शिक्षवाहककोविदाः ।

मुरलीझलिकीऋजली क्रमात् ।

पादशुद्धिस्तु विज्ञेया षट्सूत्राणि विदुर्बुधाः ।

ಪಂಚ ಧಾರೆಗಳೂ ಪಂಚ ಮಂಡಲಗಳೂ

मण्डला पञ्च सु तथा

द्वात्रिंशद्धनुराकृतिः । तदर्धं च तदर्धं च ।

Colophon :

———

606

Sl. No. 52124 दत्तशासनम् Ms. No. P. 7525-6a

Beginning :

ವಿಲಂಬಿಸಂವತ್ಸರಕಾರ್ತಿಕಬಹುಳದಲ್ಲು ಶ್ರೀರಂಗಮಂಗಳಮಣಿಂ .... ಯದುಶೈಲ ದೀಪಂ ಎಂಬ ' ಮರ್ಯಾದೆಯಲ್ಲಿ ಅಷ್ಟೋತ್ತರಶತಸ್ಥಾನಸಾರಮಯವಾದ ತಿರುನಾರಾಯಣ ಪುರದ ಶ್ರೀಯವರ ಸನ್ನಿಧಿ ಅರ್ಚಕರ ಶ್ರೀರಂಗರಾಜಭಟ್ಟರ —

End :

ವೆಂಕಟಾಚಾರ್ಯರ ಒಪ್ಪಿತ, ಕಂಚೀ ತಿರುನಾರಾಯಣ ಪೆರುಮಾಳ್‌ವರದರಯ್ಯಗಾ ಒಪ್ಪಿತ ಆನಂದಾಳ್‌ವಾರೊಪ್ಪಿತ ಬೂದಿಹಾಳ್ ಗೋವಿಂದರಾಜರ ಒಪ್ಪಿತ ಆನಂದಾಂ ಪಿಳ್ಳೈ ಒಪ್ಪಿತ.

Colophon :

॥ श्रीः ॥

607

Sl. No. 52125 दानपत्रम् Ms. No. P. 9775-1

Beginning :

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥

ಸ್ವಸ್ತಿಶ್ರೀ ವಿಜಯಾಭ್ಯುದಯ ಶಾಲಿವಾಹನಶಕ ವರ್ಷಂಗಳು ೧೭೨೩ನೇ ವರ್ತಮಾನಕ್ಕೆ ಸಲ್ಲುವ .... ನಾರಾಯಣಭಟ್ಟರಿಗೆ ಬರೆಯಿಸಿ ಕೊಟ್ಟ ದಾನಸಾಧನಕ್ರಮವೆಂತೆಂದರೆ —

End :

ಗುರುವಮೂರ್ತಿಭಟ್ಟರ ಮಕ್ಕಳು ಶಿವಭಟ್ಟರ ಸಾಕ್ಷಿ. ಅಂಸ್ರಿಯ ಜೋಯಿಸರ ಸಾಕ್ಷಿ. ವೆಂಕಟಕೃಷ್ಣಭಟ್ಟರಸಾಕ್ಷಿ. ಶಿವಭಟ್ಟನ ಸಾಕ್ಷಿ. ವೆಂಕಟಭಟ್ಟನ ಸಾಕ್ಷಿ ಅಣ್ಣಯ್ಯ ಭಟ್ಟನ ಸಾಕ್ಷಿ.

Colophon :

ಇವರ ಉಭಯಾನುಸಮ್ಮತಿಯಿಂದ ಹೆಬ್ಬಾಗಿಲ ಕಪನಿಸತಿ ಭಟ್ಟರ ಮಗ ನೀಲಕಂಠ ಭಟ್ಟನ ಬರಹಾ.

608

Sl. No. 52144 नारायणनुतिपद्यम् Ms. No. P. 8995-6

Beginning :

ಅಣೋರಣೀಯಾನ್ ಮಹತೋ ಮಹೀಯಾನ್ ನಿಖಿಲಗುಣಭರಿತ ಪರಮಪಾವನ ಚರಿತಾ ನಿರ್ಯಾಣಸಮಯದಲ್ಲಿ + + = ಯಣ ಕೃಷ್ಣ ಗೋವಿಂದ ಮುಕುಂದನೆಂದೆಂಬ.

End :

ಅನಾಥಬಾಂಧವ ಅಚ್ಯುತಾನಂತ ಗೋವಿಂದ ಮುಕುಂದನೆಂದೆಂಬ ಮಾತನಾಡಿಸಿ ಮುಕುತಿಯನೋ × × ಸೈಯಾ ಹರಿಯೆ.

ಅಣೋರಣೀಯಾನ್ಮಹತೊ ಮಹೀಯಾನ್.

Colophon :

———

609

Sl. No. 52301 वैश्यवंशसुधाकरः Ms. No. P. 1894–1

Beginning :

प्रारिप्सितस्य ग्रन्थस्य निष्प्रत्यूहसमाप्तये ।
लक्ष्मीनारयणस्याङ्घ्रिपङ्कजद्वयमाश्रये ॥

मङ्गलं विधाय वाणिज्य × जात्योर्विवदमानयोः विवादशान्त्यर्थं काञ्चीस्थ × नोक्तप्रकारेण वैश्यशब्दाभिधेयमाह ---

End :

अर्थाल्लु तेलिसि निश्चयिंचि नागर ऊरुजभयकुलप्रसिद्धतम तृतीयजातीयक्रय-विक्रयगोपालन कृषिवाणिज्याधिकारिकस्याध्ययनं .... कोमटिंशब्दपर्यायवाचक निश्चयम् ।

Colophon :

मङ्गलमहा श्रीः श्रीः

610

Sl. No. 52307 सिद्धरामशतकम् Ms. No. P. 10331

Beginning :

श्रीकरसमुदीर्णलोकैकनुतदेवनयमार्गतत्त्वनिर्णयस्वभाव । महिचतुर्विधयोगमान-साभ्युदयागकलितपटुलभव्यकारणाङ्ग । त्रिविधलिंगज्ञानदीक्षाविधानांगसकलवेद-पुराणशास्त्रधुर्यपञ्चमुद्रोल्लासपञ्चाक्षरीमंत्रमन्जुलतत्त्वसन्ततिविशेषनादुहृदयाब्जकणिकं बादुकेन्नाशैलकेतारदेशिकसेव्यधूर्य । मीकुशनुकम्बुगूर्चेदलोकमेन्नचित्कलाधामश्री-गुरुसिद्धरामा ।

End :

मायानुकड्डुगेप्पि मरिगोग्गयनु ब्रोचि मुक्तायकिनि बुद्धियक्तिचेप्पि सिद्ध-रामय्यकु शिवज्ञानमुनञ्चि कल्याणबसवेशुकचूचि मरुलसिद्धेश्वरुमहिमवर्णन चेशि अक्कमहादेविनक्कमेरशि गोरक्षरक्षिचि गुरु × नुलकुदेल्पिशूनापि कलरूढिचूचि-येक्क । अनयम्बुलक्षपैनबदिवेलयुनरिंचि पाकांबलोगिभुजिंचि । तेलियनच्च × अदीप्तिचेशि बसवराजय्यमोदलयिन प्रमथलनु परगपर × पदेशंच्येनर्चिन प्रभुवु नीवे चित्कलधाम श्रीगुरुसिद्धराम ।

Colophon :

————

APPENDIX II

Alphabetical Index of Authors

———

APPENDIX III

Index of Publishers

(In front of the Publishers refer to the Serial number of Manuscripts.)

50180	S.S.P.C.	1862
50276	V.V.H.B.	1913
50323	S.C.B.	1934
50374	G.P.K.	1946(Sam)
50463	S.D.K.	1939 (,,)
50498	G.S.C.B.	1924
50646	S.P.C.	1892
50779	T.V.P.B.	1901
50793	A.L.M.	1941
	V.P.B.	
51105	A.S.S.C.	1933
51339	G.U.P.A.	1924
51435	T.B.I.B.	
51487	N.S.P.B.	1904
51943	O.R.I.	1926
51947	O.I.B.	
52038	V.P.B.	
52048	N.S.P.B,	1924
52055	V.M.S.K.	1892
52070	H.C.P.B.	1236
	M.P.P.	1978
52087	G,B.H.M.	1985
52108	K.S.P.B.	1977
	O.R.I.	1923
52111	S.P.M.	1950
	S.R.B.B.	
	M.P.P.B.	1931
52121	O.R.I.	1959
	I.K.S.	
52136	I.K.S.	1990
52146	K.U.D.	1979
52161.	S.P.M.	1967
52168	S.M.M.	1964
52172	G.K.B.	1958
52195	K.U.D.	1968
52198	I.K.S.	1979
52201	M.S.P.M.	1898
	M.P.D.	
	V.P.M.	1981
52203	G.O.L.M.	1950
52208	M.M.H.	
	S.K.P.M.	1989
52212	D.M.M.	
52222	K.P.V.P.	1927
	B.M.S.B.	1982
52226	K.U.D.	1968
52232	K.S.P.B.	1972
	V.P.M.	1893
	V.P.B.	1886
52236	P.K.M.B.	1955
